हठ	(भ्वा. प. से.)	३२५
हद	(भ्वा. आ. अ.)	९७७
हन	(अ. प. अ.)	१०१२
हम्म	(भ्वा. प. से.)	४६७
हय	(भ्वा. प. से.)	५१२

हर्य	(भ्वा. प. से.)	५१४
हल	(भ्वा. प. से.)	८१७
हसे	(भ्वा. प. से.)	७२१
(ओ) हाक्	(जु. प. अ.)	१०९०
(ओ) हाङ्	(जु. आ. अ.)	१०८९
हि	(स्वा. प. अ.)	१२५८
हिक्क	(भ्वा. उ. से.)	८६१
हिट (पा.)	(भ्वा. प. से.)	३१७
हिडि	(भ्वा. आ. से.)	२६८
हिल	(तु. प. से.)	१३६२
हिवि	(भ्वा. प. से.)	५९१
हिष्क (पा)	(चु. आ. से.)	१६८६
हिसि	(रु. प. से.)	१४५०
हिसि	(चु. उ. से.)	१८३०
हु	(जु. प. से.)	१०८३
हुडि	(भ्वा. आ. से.)	२६९
हुडि	(भ्वा. आ. से.)	२७७
हुडृ	(भ्वा. प. से.)	३५२
हुर्छा	(भ्वा. प. से.)	२११
हुल	(भ्वा. प. से.)	८४४
हूडृ	(भ्वा. प. से.)	३५३
हृ	(जु. प. अ.)	१०९७
हृञ्	(भ्वा. उ. से.)	८९९
हृष	(दि. प. से.)	१२३०
हृषु	(भ्वा. प. से.)	७०९
हेट	(क्र्या. प. से.)	१५३३
हेठ	(भ्वा. आ. से.)	२६६
हेड	(भ्वा. प. से.)	७७८
हेडृ	(भ्वा. आ. से.)	२८४
हेषृ	(भ्वा. आ. से.)	६२१
होडृ	(भ्वा. आ. से.)	२८५
होडृ	(भ्वा. प. से.)	३५४
ह्नुङ्	(अ. आ. अ.)	१०८२
ह्मल	(भ्वा. प. से.)	८०६
ह्लगे	(भ्वा. प. से.)	७८७
ह्लस	(भ्वा. प. से.)	७११

ह्राद	(भ्वा. आ. से.)	२६	ह्लस	(भ्वा. प. से.)	७१२
ह्री	(जु. प. अ.)	१०८५	ह्लादी	(भ्वा. आ. से.)	२७
ह्रीच्छ	(भ्वा. प. से.)	२१०	ह्वल	(भ्वा. प. से.)	८०५
ह्रेषृ	(भ्वा. आ. से.)	६२२	ह्वृ	(भ्वा. प. से.)	९३१
ह्लगे	(भ्वा. प. से.)	७८८	ह्वृ	(भ्वा. प. अ.)	९३४
ह्लप	(चु. प. से.)	१६५९	ह्वेञ्	(भ्वा. उ. से.)	१००८

सौत्रधातुकोशः

ऋतिः ३·१·२९.
कत्रिः ३·१३७. उ.
काडिः ४·८२. उ.
कविः ४·८,२ उ.
क्षविः २·९२. उ.
जुः ३·२·१५०.
तविः ४·६६. उ.
तव १·४८. उ.
तुः ७·३·९५.
दृभिः ३·१·१२४·३ वा.
पीयुः ३·७६. उ.
भड्डः १·५४. उ.
युषः १·९७. उ.
वर्णिः ४·१२३. उ.
सातिः ३·१·१३८.
स्कम्भुः ३·१·८२.
स्कुम्भुः ३·१·८२.
स्तन्भुः ३·१·८२.
स्तुन्भुः ३·१·८२.
शुः २·२५. उ.

गणपाठकोशः

वार्तिकस्थगणपाठपदसूचिः

लिङ्गानुशासनशब्दकोशः ।

शाकटायनसाधिताः शब्दाः ।

फिट्सूत्रशब्दकोशः

अष्टाध्यायीसूत्रपाठः।

सवार्तिकः

१ सिद्धे शब्दार्थसंबन्धे लोकतोर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमो यथा लौकिकवैदिकेषु[1] ।

२ अस्त्यप्रयुक्त इति चेन्नार्थे शब्दप्रयोगात्।

३ अप्रयोगः प्रयोगान्यत्वात् ।

४ अप्रयुक्ते दीर्घसत्रवत्।

५ सर्वे देशान्तरे ।

६ ज्ञाने धर्म इति चेत्तथाधर्मः ।

७ आचारे नियमः ।

८ प्रयोगे सर्वलोकस्य ।

९ शास्त्रपूर्वकेप्रयोगेऽभ्युदयस्तत्तुल्यं वेदशब्देन ।

१० सूत्रे व्याकरणे षष्ठ्यर्थोऽनुपपन्नः ।

११ शब्दाप्रतिपत्तिः ।

१२ शब्दे ल्युडर्थः ।

१३ भवे[2] प्रोक्तादयश्च तद्धिताः ।

१४ लक्ष्यलक्षणे व्याकरणम् ।

१५ वृत्तिसमवायार्थ उपदेशः ।

१६ अनुबन्धकरणार्थश्च ।

१७ इष्टबुद्ध्यर्थश्चेति चेदुदात्तानुदात्तस्वरितानुनासिकदीर्घप्लुतानामप्युपदेशः ।

१८ आकृत्युपदेशात्सिद्धमिति चेत्संवृतादीनां प्रतिषेधः[3] ।

अइउण् १ ।

१ अकारस्य विवृतोपदेश आकारग्रहणार्थः।

२ तस्य विवृतोपदेशादन्यत्रापि विवृतोपदेशः सवर्णग्रहणार्थः ।

३ दीर्घप्लुतवचने च संवृतनिवृत्त्यर्थः[4] ।

४ तत्रानुवृत्तिनिर्देशे सवर्णाग्रहणमनण्त्वात्।

५ एकत्वादकारस्य सिद्धम् ।

६ अनुबन्धसंकरस्तु ।

७ एकाजनेकाज्ग्रहणेषु चानुपपत्तिः ।

८ द्रव्यवच्चोपचाराः ।

९ विषयेण तु नानालिङ्गकरणात् सिद्धम् ।

१० एकाजनेकाज्ग्रहणेषु चावृत्तिसंख्यानात्।

११ आन्यभाव्यं तु कालशब्दव्यवायात् ।

१२ युगपच्च देशपृथक्त्वदर्शनात् ।

१३ आकृतिग्रहणात्सिद्धम् ।

१४ तद्वच्च तपरकरणम् ।

१५ हल्ग्रहणेषु च ।

१ लोकतः इत्यधिकं प. पुस्तके। २ भवे च तद्धित इति प. पुस्तके। ३ प. पुस्तके इतः परमधिकम् 'लिङ्गार्था तु प्रत्यापत्तिः'। ४ प. पुस्तके इतः परमधिकं स्थानी प्रकल्पयेदेतावनुस्वारो यथा यणम् ।

१६ रूपसामान्याद्वा ।

ऋलृक् २ ।

१ लृकारोपदेशो यदृच्छाशक्तिजानुकरणप्लुताद्यर्थः ।

२ न्याय्यभावात्कल्पनं संज्ञादिषु ।

३ अनुकरणं शिष्टाशिष्टाप्रतिषिद्धेषु यथा लौकिकवैदिकेषु ।

४ एकदेशविकृतस्यानन्यत्वात्प्लुत्यादयः ।

५ रवत्प्रतिषेधाच्च ।

एओङ् ३ ।

ऐऔच् ४ ।

१ संध्यक्षरेषु तपरोपदेशश्चेत्तपरोच्चारणम् ।

२ प्लुत्यादिष्वज्विधिः ।

३ प्लुतसंज्ञा च ।

४ अतपर एच इग्घ्रस्वादेशे ।

५ एकादेशे दीर्घग्रहणम् ।

६ वर्णैकदेशा वर्णग्रहणेन चेत् संध्यक्षरे समानाक्षरविधिप्रतिषेधः ।

७ दीर्घे ह्रस्वविधिप्रतिषेधः ।

८ एकवर्णवच्च ।

९ नाव्यपवृक्तस्यावयवे तद्विधिर्यथा द्रव्येषु ।

१० संध्यक्षरेषु विवृतत्वात् ।

११ अग्रहणं चेन्नुड्विधिलादेशविनामेष्वृकारग्रहणम् ।

१२ प्लुतावैच इदुतौ ।

१३ तुल्यरूपे संयोगे द्विव्यञ्जनविधिः ।

हयवरट् ५ ।

१ हकारस्य परोपदेशेऽड्ग्रहणेषु हग्रहणम् ।

२ उत्त्वे च ।

३ पूर्वोपदेशे किस्त्वकूसेड्विषयो झल्ग्रहणानि च ।

४ रेफस्य परोपदेशेऽनुनासिकद्विर्वचनप सवर्णप्रतिषेधः ।

५ पूर्वोपदेशे किस्त्वप्रतिषेधो व्यलोपवचनं च ।

६ अयोगवाहानामट्सु णत्वम् ।

७ शर्षु जश्भावषत्वे ।

८ अविशेषेण संयोगोपधासंज्ञालोन्त्यद्विर्वचनस्थानिवद्भावप्रतिषेधाः ।

९ अर्थवन्तो वर्णा धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनात् ।

१० वर्णव्यत्यये चार्थान्तरगमनात् ।

११ वर्णानुपलब्धौ चानर्थगतेः ।

१२ संघातार्थवत्त्वाच्च ।

१३ संघातस्यैकार्थ्यात्सुबभावो वर्णात् ।

१४ अनर्थकास्तु प्रतिवर्णमर्थानुपलब्धेः ।

१५ वर्णव्यत्ययापायोपजनविकारेष्वर्थदर्शनात् ।

लण्[1] ६ ।

---

१ प. पुस्तके इतः परमधिकम् । प्रत्याहारानुबन्धानां कथमज्ग्रहणेषु न । आचाराद्प्रधानत्वात् लोपश्च बलवत्तरः । ऊकालोजिति वा योगस्तत्कालानां यथा भवेत् । अचां ग्रहणमच्कार्यं तेनैषां न भविष्यति ॥ अनुवर्तते विभाषा शरोचि यद्वारयत्ययं द्वित्वम् । नित्ये हि तस्य लोपे प्रतिषेधार्थो न कश्चित्स्यात् । २ सवर्णेन तपरं सूर्णाद्वारेन्यत्र परेणेण् स्यात् ।

अमङणनम् ७ ।

झभञ्' ८ ।

घढधष् ९ ।

जबगडदश् १० ।

खफछठथचटतव् ११ ।

कपय् १२ ।

शषसर् १३ ।

हल् १४ ।

वृद्धिरादैच् ॥ १ ॥

१ संज्ञाधिकारः संज्ञासंप्रत्ययार्थः ।

२ इतरथा ह्यसंप्रत्ययो यथा लोके ।

३ संज्ञासंज्ञ्यसंदेहश्च ।

४ आचार्याचारात्संज्ञासिद्धिः यथा लौकिकवैदिकेषु ।

५ संज्ञासंज्ञ्यसंदेहश्च ।

६ अनाकृतिः ।

७ लिङ्गेन वा ।

८ सतो वृद्ध्यादिषु संज्ञाभावात्तदाश्रय इतरेतराश्रयत्वादप्रसिद्धिः ।

९ सिद्धं तु नित्यशब्दत्वात् ।

१० किमर्थं शास्त्रमिति चेन्निवर्तकत्वात्सिद्धम् ।

११ अन्यत्र सहवचनात्समुदाये संज्ञाप्रसङ्गः ।

१२ प्रत्यवयवं च वाक्यपरिसमाप्तेः ।

१३ आकारस्य तपरकरणं सवर्णार्थं ।

भेदकत्वात्स्वरस्य

अदेङ् गुणः ॥ २ ॥

इको गुणवृद्धी ॥ ३ ॥

१ इग्ग्रहणमात्संध्यक्षरव्यञ्जननिवृत्त्यर्थम् ।

२ संज्ञया विधाने नियमः ।

३ वृद्धिगुणावलोऽन्त्यस्येति चेन्मिदिपुगन्तलघूपधर्च्छिदृशिक्षिप्रक्षुद्रेष्विग्ग्रहणम् ।

४ सर्वादेशप्रसङ्गश्चानिगन्तस्य ।

५ इग्मात्रस्येति चेज्जु[illegible]तुकह्रस्वाद्योर्गुणेष्वनन्त्यप्रतिषेधः ।

६ पुगन्तलघूपधग्रहणमनन्त्यनियमार्थम् ।

७ वृद्धिग्रहणमुत्तरार्थम् ।

८ मृज्यर्थमिति चेद्योगविभागात्सिद्धम् ।

९ अंटि चोक्तम् ।

१० वृद्धिप्रतिषेधानुपपत्तिस्त्विक्प्रकरणात् ।

११ तस्मादिग्लक्षणा वृद्धिः ।

१२ षष्ठ्याः स्थानेयोगत्वादिग्निवृत्तिः ।

१३ अन्यतरार्थं पुनर्वचनम् ।

१४ प्रसारणे च ।

१५ विषयार्थं पुनर्वचनम् ।

१६ उरण्रपरे च ।

१७ सिद्धं तु षष्ठ्यधिकारे वचनात् ।

न धातुलोप आर्धधातुके ॥ ४ ॥

१ यङ्यकयवलोपे प्रतिषेधः ।

२ नुम्लोपस्त्र्यनुबन्धलोपेऽप्रतिषेधार्थम् ।

३ इक्प्रकरणान्नुम्लोपे वृद्धिः ।

४ निपातनात्स्यदादिषु ।

१ अक्षरं न क्षरं विद्यादश्नोतेर्वा सरोऽक्षरम् । वर्णं वाहुः पूर्वसूत्रे किमर्थमुपदिश्यते । वर्णज्ञानं वाग्विषयो यत्र च ब्रह्म वर्तते । तदर्थमिष्टबुद्ध्यर्थं लघ्वर्थं चोपदिश्यते २ इतः परमधिकम् । प्रत्येकं गुणवृद्धिसंज्ञे भवतः इति वक्तव्यम् इति प. पुस्तके । ३-४ परपुस्तके नास्ति ।

५ प्रत्ययाश्रयत्वादन्यत्र सिद्धम् ।
६ रकि ज्यः प्रसारणम् ।
७ अल्लोपस्य स्थानिवत्त्वात् । अनारम्भो वा ।
८ उक्तं शेषे ।

क्ङिति च ॥ ५ ॥

१ क्ङिति प्रतिषेधे तन्निमित्तग्रहणम् ।
२ उपधारोरवीत्यर्थम् ।
३ श्नचङन्तस्यान्तरङ्गलक्षणत्वात् ।
४ तद्धितकाम्योरिक्प्रकरणात् ।
५ लकारस्य ङित्त्वादादेशेषु स्थानिवद्भावप्रसङ्ग इति चेद्यासुटो ङिद्वचनात्सिद्धम् ।

दीधीवेवीटाम् ॥ ६ ॥

१ दीधीवेव्योश्छन्दोविषयत्वाद्दृष्टानुविधित्वाच्च च्छन्दसोऽदीधेददीधयुरिति च गुणदर्शनादप्रतिषेधः ।
२ दीध्यदिति च श्यन् व्यत्ययेन ।

हलोऽनन्तराः संयोगः ॥ ७ ॥

१ संयोगसंज्ञायांसहवचनं यथान्यत्र ।
२ समुदाये संयोगादिलोपो मस्जेः ।
३ द्वयोर्हलोः संयोग इति चेद्द्विर्वचनम् ।
४ न वाज्विधेः ।
५ स्वरानन्तर्हितवचनम् ।
६ दृष्टमानन्तर्यं व्यवहितेऽपि ।
७ आनन्तर्यवचनं किमर्थमिति चेदेकप्रतिषेधार्थम् ।
८ न[1] वातज्जातीयव्यवायात् ।

मुखनासिकावचनोऽनुनासिकः ॥८॥

१ अनुनासिकसंज्ञायामितरेतराश्रय उक्तम्[2] ।

तुल्यास्यप्रयत्नं सवर्णम् ॥ ९ ॥

१ सवर्णसंज्ञायां भिन्नदेशेष्वतिप्रसङ्गः प्रयत्नसामान्यात्[5] ।
२ सिद्धं त्वास्ये तुल्यदेशप्रयत्नं सवर्णम् ।
३ तस्यावचनं वचनप्रामाण्यात् ।
४ संबन्धिशब्दैर्वा तुल्यम् ।
५ ऋकारऌकारयोः सवर्णविधिः ।

नाज्झलौ ॥ १० ॥

१ अज्झलोः प्रतिषेधे शकारप्रतिषेधोऽज्झल्त्वात् ।
२ तत्र सवर्णलोपे दोषः ।
३ सिद्धमनच्त्वात् ।
४ वाक्यापरिसमाप्तेर्वा ।

ईदूदेद्द्विवचनं प्रगृह्यम् ॥ ११ ॥

१ ईदादयो द्विवचनं प्रगृह्या इति चेदन्त्यस्य विधिः ।
२ ईदाद्यन्तमिति चेदेकस्य विधिः ।
३ न वाद्यन्तवत्त्वात् ।
४ ईदाद्यन्तं द्विवचनान्तमिति चेल्लुकि प्रतिषेधः ।
५ सप्तम्यामर्थग्रहणं ज्ञापकं प्रत्ययलक्षणप्रतिषेधस्य ।

अदसो मात् ॥ १२ ॥

१ संप्रसारणमिति प. पुस्तके । २ प. पुस्तके नास्ति । ३ प. °जातीयक । ४ प. पुस्तके नास्ति । ५ प. °साम्यात् ।

१ मात्मगृह्यसंज्ञायां [1]तस्यासिद्धत्वादयावे-
कादेशप्रतिषेधः ।

२ वचनार्थो हि सिद्धे ।

३ विप्रतिषेधाद्वा ।

४ आश्रयात्सिद्धत्वं च यथा रोरुत्वे ।

५ असिद्धे ह्यत्व आद्गुणाप्रसिद्धिः ।

६ [2]उक्तं वा ।

७ तत्र सकि दोषः ।

८ न वा ग्रहणविशेषणत्वात् ।

शे ॥ १३ ॥

१ शेऽर्थवद्ग्रहणात् ।

निपात एकाजनाङ् ॥ १४ ॥

ओत् ॥ १५ ॥

१ ओतश्च्विप्रतिषेधः ।

संबुद्धौ शाकल्यस्येतावनार्षे ॥१६॥

उञः॥ १७ ॥ ऊँ ॥ १८ ॥

१ उञ इति योगविभागः ।

२ ऊँ वा शाकल्यस्य ।

ईदूतौ च सप्तम्यर्थे[3] ॥ १९ ॥

दाधा घ्वदाप् ॥ २० ॥

१ घुसंज्ञायां प्रकृतिग्रहणं शिदर्थम् ।

२ समानशब्दप्रतिषेधः ।

३ समानशब्दाप्रतिषेधोऽर्थवद्ग्रहणात् ।

४ अनुपसर्गाद्वा ।

५ न वार्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्र-
हणेन गृह्यते यथान्यत्र ।

६ दीङः प्रतिषेधः स्थाघ्वोरित्त्वे ।

७ दाप्प्रतिषेधे न दैप्यनेजन्तत्वात् ।

८ सिद्धमनुबन्धस्यानेकान्तत्वात् ।

९ पित्प्रतिषेधाद्वा ।

आद्यन्तवदेकस्मिन् ॥ २१ ॥

१ सत्यन्यस्मिन्नाद्यन्तवद्भावादेकस्मिन्ना-
द्यन्तवद्वचनम् ।

२ तत्र व्यपदेशिवद्वचनम् ।

३ एकाचो द्वे प्रथमार्थम् ।

४ षत्वे चादेशसंप्रत्ययार्थम् ।

५ अवचनाल्लोकविज्ञानात्सिद्धम् ।

६ अपूर्वानुत्तरलक्षणत्वादाद्यन्तयोः सिद्ध-
मेकस्मिन् ।

७ आदिवत्त्वे प्रयोजनं प्रत्ययञ्निदाद्यु-
दात्तत्वे ।

८ वलादेरार्धधातुकस्येट् ।

९ यस्मिन्विधिस्तदादित्वे ।

१० अजाद्याट्त्वे ।

११ अन्तवद्द्विवचनान्तप्रगृह्यत्वे ।

१२ मिदचोऽन्त्यात्परः ।

१३ अचोऽन्त्यादि टि ।

१४ अलोऽन्त्यस्य ।

१५ येन विधिस्तदन्तत्वे ।

तरप्तमपौ घः ॥ २२ ॥

१ घसंज्ञायां नदीतरे प्रतिषेधः ।

२ घसंज्ञायां नदीतरेऽप्रतिषेधः ।

३ तरब्ग्रहणं ह्यौपदेशिकम् ।

---

१ प. पुस्तके असिद्धत्वादिति नास्ति । २ प. पुस्तके नास्ति । ३ ईदूतौ सप्तमीत्येव लुप्तेऽर्थग्रहणाद्भवेत् । पूर्वस्य चेत्सवर्णोऽसावाडाम्भावः प्रसज्यते । वचनाद्यत्र दीर्घत्वं तत्रापि सरसी यदि । ज्ञापकं स्यात्तदन्तत्वे । इदं प. पुस्तकेऽधिकं वार्तिकत्वेन ।

बहुगणवतुडति संख्या ॥ २३ ॥

१ संख्यासंज्ञायां संख्याग्रहणम् ।

२ संख्यासंप्रत्ययार्थम् ।

३ इतरथा ह्यसंप्रत्ययोऽकृत्रिमत्वाद्यथालोके।

४ उत्तरार्थं च ।

५ अध्यर्धग्रहणं च समासकन्विध्यर्थम् ।

६ लुकि चाग्रहणम् ।

७ अर्धपूर्वपदश्च पूरणप्रत्ययान्तः ।

८ अधिकग्रहणं चालुकि समासोत्तरपद-वृद्ध्यर्थम् ।

९ बहुव्रीहौ चाग्रहणम् ।

१० बह्वादीनामग्रहणम् ।

ष्णान्ता षट् ॥ २४ ॥

१ षट्संज्ञायामुपदेशवचनम् ।

२ शताद्यष्टनोर्नुम्नुडर्थम् ।

३ उक्तं वा ।

डति च ॥ २५ ॥

क्तक्तवतू निष्ठा ॥ २६ ॥

१ निष्ठासंज्ञायां समानशब्दप्रतिषेधः ।

२ निष्ठासंज्ञायां समानशब्दाप्रतिषेधः ।

३ अनुबन्धोऽन्यत्वकर इति चेन्न लोपात् ।

४ सिद्धविपर्यासश्च ।

५ कारककालविशेषात्सिद्धम् ।

६ लुङि सिजादिदर्शनात् ।

सर्वादीनि सर्वनामानि ॥ २७ ॥

१ सर्वनामसंज्ञायां निपातनाण्णत्वाभावः ।

२ संज्ञोपसर्जनप्रतिषेधः ।

३ पाठात्पर्युदासः पठितानां संज्ञाकरणम् ।

४ सर्वाद्यानन्तर्यकार्यार्थम् ।

५ प्रयोजनं डतरादीनामद्भावे ।

६ त्यदादिविधौ च ।

७ उभस्य सर्वनामत्वेऽकजर्थः ।

८ अन्याभावो द्विवचनटाब्विषयत्वात् ।

९ उभयोऽन्यत्र ।

१० अवचनादापि तत्परविज्ञानमिति चेत्के-ऽपि तुल्यम् ।

११ भवतोऽकच्छेषात्वानि ।

विभाषा दिक्समासे बहुव्रीहौ ॥ २८ ॥

न बहुव्रीहौ ॥ २९ ॥

१ प्रतिषेधे भूतपूर्वस्योपसंख्यानम् ।

२ प्रतिषेधे भूतपूर्वस्योपसंख्यानानर्थक्यं पूर्वादीनां व्यवस्थायामिति वचनात् ।

तृतीयासमासे ॥ ३० ॥

द्वन्द्वे च ॥ ३१ ॥

विभाषा जसि ॥ ३२ ॥

प्रथमचरमतयाल्पार्धकतिपयनेमाश्च ३३

पूर्वपरावरदक्षिणोत्तरापराधराणि व्यव-स्थायामसंज्ञायाम् ॥ ३४ ॥

१ अवरादीनां च पुनः सूत्रपाठे ग्रहणा-नर्थक्यं गणे पठितत्वात् ।

स्वमज्ञातिधनाख्यायाम् ॥ ३५ ॥

अन्तरं बहिर्योगोपसंव्यानयोः ॥३६॥

१ उपसंव्यानग्रहणमनर्थकं बहिर्योगेण कृतत्वात् ।

२ न वा शाटकयुगाद्यर्थम् ।

---

१ प. पुस्तके नास्ति। २ प. पुस्तके इतः परमधिकम् अपुरीति वक्तव्यम् । ' गणसूत्र एतत्कर्तव्यं ' इति कैयटः।

३ वाप्रकरणे तीयस्य ङित्सूपसंख्यानम् ।

स्वरादिनिपातमव्ययम् ॥ ३७ ॥

तद्धितश्चासर्वविभक्तिः ॥ ३८ ॥

१ असर्वविभक्तावविभक्तिनिमित्तस्योपसंख्यानम् ।

२ सर्वविभक्तिर्ह्यविशेषात् ।

३ त्रलादीनां चोपसंख्यानम् ।

४ अविभक्तावितरेतराश्रयत्वादप्रसिद्धिः ।

५ अलिङ्गमसंख्यमिति वा ।

६ सिद्धं तु पाठात् ।

कृन्मेजन्तः ॥ ३९ ॥

१ कृन्मेजन्तश्चानिकारोकारप्रकृतिः ।

२ अनन्यप्रकृतिरिति वा ।

३ न वा संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्य ।

४ प्रयोजनं ह्रस्वत्वं तुग्विधेर्ग्रामणिकुलम् ।

५ नलोपो वृत्रहभिः ।

६ उदुपधत्वमकित्त्वस्य निकुचिते ।

७ नाभावो यञि दीर्घत्वस्यामुना ।

८ आत्त्वं कित्त्वस्योपादास्त ।

९ तिसृचतसृत्वं ङीब्विधेः ।

१० तस्य दोषो वर्णाश्रयः प्रत्ययो वर्णविचालस्य ।

११ आत्त्वं पुग्विधेः क्रापयति ।

१२ पुग्घ्रस्वत्वस्यादीदपत् ।

१३ त्यदाद्यकारष्टाब्विधेः ।

१४ इड्विधिराकारलोपस्य पपिवान् ।

१५ मतुब्विभक्त्युदात्तत्वं पूर्वनिघातस्य ।

१६ नदीह्रस्वत्वं संबुद्धिलोपस्य ।

क्त्वातोसुन्कसुनः ॥ ४० ॥

अव्ययीभावश्च ॥ ४१ ॥

१ अव्ययीभावस्याव्ययत्वे प्रयोजनं लुग्मुखस्वरोपचाराः ।

शि सर्वनामस्थानम् ॥ ४२ ॥

सुडनपुंसकस्य ॥ ४३ ॥

१ शि सर्वनामस्थानं सुडनपुंसकस्येति चेज्जसि शिप्रतिषेधः[१] ।

न वेति विभाषा ॥ ४४ ॥

१ न वेति विभाषायामर्थसंज्ञाकरणम् ।

२ शब्दसंज्ञायां ह्यर्थासंप्रत्ययो यथान्यत्र ।

३ इतिकरणोऽर्थनिर्देशार्थः ।

४ समानशब्दप्रतिषेधः ।

५ न वा विधिपूर्वकत्वात्प्रतिषेधसंप्रत्ययो यथा लोके ।

६ विध्यनित्यत्वमनुपपन्नं प्रतिषेधसंज्ञाकरणात् ।

७ सिद्धं तु प्रसज्यप्रतिषेधात् ।

८ विप्रतिषिद्धं तु ।

९ न वा प्रसङ्गसामर्थ्यादन्यत्र प्रतिषेधविषयात् ।

१० विधिप्रतिषेधयोर्युगपद्वचनानुपपत्तिः ।

११ भवतीति चेन्न प्रतिषेधः ।

१२ नेति चेन्न विधिः ।

१३ सिद्धं तु पूर्वस्योत्तरेण बाधितत्वात् ।

१४ साध्वनुशासनेऽस्मिन्यस्य विभाषा तस्य साधुत्वम् ।

१५ द्वैधाप्रतिपत्तिः ।

१६ कार्ये युगपदन्वाचययौगपद्यम् ।

---

१ इतःपरमाधिकं प. पुस्तके वार्तिकद्वयम् । नञ्प्रतिषेधात् अप्राप्तिर्वा ।

१७ आचार्यदेशशीलने च तद्विषयता ।
१८ तत्कीर्तने च द्वेधाप्रतिपत्तिः ।
१९ [1]अशिष्यो वा विदितत्वात्
२० [2]अप्राप्ते त्रिसंशयाः ।
२१ [3]प्राप्ते च ।
२२ [4]उभयत्र च ।

इग्यणः संप्रसारणम् ॥ ४५ ॥

१ संप्रसारणसंज्ञायां वाक्यसंज्ञा चेद्वर्णविधिः ।
२ वर्णसंज्ञा चेन्निर्वृत्तिः ।
३ विभक्तिविशेषनिर्देशस्तु ज्ञापक उभयसंज्ञात्वस्य ।

आद्यन्तौ टकितौ ॥ ४६ ॥

१ टकितोराद्यन्तविधाने प्रत्ययप्रतिषेधः ।
२ परवचनात्सिद्धमिति चेन्नापवादत्वात् ।
३ सिद्धं तु षष्ठ्यधिकारे वचनात् ।
४ आद्यन्तयोर्वा षष्ठ्यर्थत्वात्तदभावेऽसंप्रत्ययः ।

मिदचोऽन्त्यात्परः ॥ ४७ ॥

१ मिदचोऽन्त्यात्पर इति स्थानपरप्रत्ययापवादः ।
२ अन्त्यात्पूर्वो मस्जेरनुषङ्गसंयोगादिलोपार्थम् ।
३ भर्जिमच्योश्च ।
४ अभक्ते दीर्घनलोपस्वरणत्वानुस्वारशीभावाः ।
५ परादौ गुणवृद्ध्यौत्वदीर्घनलोपानुस्वारशीभावेनकारप्रतिषेधः ।
६ पूर्वान्ते नपुंसकोपसर्जनह्रस्वत्वं द्विगुस्वरश्च ।
७ न वा बहिरङ्गलक्षणत्वात् ।

एच इग्घ्रस्वादेशे ॥ ४८ ॥

१ ऐच इक् सवर्णाकारनिवृत्त्यर्थम् ।
२ [5]दीर्घाप्रसङ्गस्तु निवर्तकत्वात् ।
३ सिद्धमेङः सस्थानत्वात् ।
४ ऐचोश्चोत्तरभूयस्त्वात् ।

षष्ठी स्थानेयोगा ॥ ४९ ॥

१ षष्ठ्याः स्थानेयोगवचनं नियमार्थम् ।
२ अवयवषष्ठ्यादिष्वतिप्रसङ्गः शासो गोह इति ।
३ अवयवषष्ठ्यादीनां चाप्राप्तिर्योगस्यासंदिग्धत्वात् ।
४ विशिष्टा वा षष्ठी स्थानेयोगा ।

स्थानेऽन्तरतमः ॥ ५० ॥

१ स्थानिन एकत्वनिर्देशादनेकादेशनिर्दे-

---

१ प. पुस्तके नास्ति । २ इतः परमधिकं प. पुस्तके । द्वन्द्वे च विभाषा जसि । ऊर्णोतेर्विभाषा । विभाषोपयमने । अनुपसर्गाद्वा । विभाषा वृक्षमृगादीनाम् । उषविदजागृभ्योऽन्यतरस्याम् । दीपादीनां विभाषा । विभाषाग्रे-प्रथमपूर्वेषु । तृणादीनां विभाषा । एकहलादौ पूरयितव्येऽन्यतरस्याम् । श्वादेरिञि पदान्तस्यान्यतरस्याम् सपूर्वायाः प्रथमाया विभाषा । ३ प. पुस्तके इतः परधिकम् । विभाषा विप्रलापे । विभाषोपपदेन प्रतीयमाने । तिरोऽन्तर्धौ । विभाषा कृञि । अधिरीश्वरे । विभाषा कृञि । दिवस्तदर्थस्य । विभाषोपसर्गे । ४ प. पुस्तके इतः परमधिकम् । हृक्रोरन्यतरस्याम् । न यदि । विभाषा साकाङ्क्षे । विभाषा श्वेः । विभाषा संघुषास्वनाम् । ५ पुस्तके इतः परमधिकं परवचनात्सिद्धमिति । ६ प. पुस्तके परमधिकम् दीर्घप्रसङ्गः इति ।

शाच्च सर्वप्रसङ्गस्तस्मात्स्थानेऽन्तरतमवचनम् ।

२ स्थानेऽन्तरतमनिर्वर्तके स्थानिनिवृत्तिः ।

३ निर्वृत्तप्रतिपत्तौ निर्वृत्तिः ।

४ अनर्थकं च ।

५ उक्तं वा ।

६ प्रत्यात्मवचनं च ।

७ प्रत्यात्मवचनमशिष्यं स्वभावसिद्धत्वात् ।

८ अन्तरतमवचनं च ।

९ व्यञ्जनस्वरव्यतिक्रमे च तत्कालप्रसङ्गः ।

१० अक्षु चानेकवर्णादेशेषु ।

११ गुणवृद्ध्येज्भावेषु च ।

१२ ऋवर्णस्य गुणवृद्धिप्रसङ्गे सर्वप्रसङ्गोऽविशेषात् ।

१३ न वा ऋवर्णस्य स्थाने रपरप्रसङ्गादवर्णस्यान्तर्यम् ।

१४ सर्वादेशप्रसङ्गस्त्वनेकाल्त्वात् ।

१५ न वानेकाल्त्वस्य तदाश्रयत्वादृवर्णादेशस्याविघातः ।

१६ संप्रयोगो वा नष्टाश्वदग्धरथवत् ।

१७ एजवर्णयोरादेशेऽवर्णं स्थानिनोऽवर्णप्रधानत्वात् ।

१८ सिद्धं तूभयान्तर्यात् ।

उरण् रपरः ॥ ५१ ॥

१ उरण्रपरवचनमन्यनिवृत्त्यर्थं चेदुदात्तादिषु दोषः ।

२ य उः स्थाने स रपर इति चेद् गुणवृद्ध्योरवर्णाप्रतिपत्तिः ।

३ सिद्धं तु प्रसङ्गे रपरत्वात् ।

४ आदेशो रपर इति चेद्दीरिविधिषु रपरप्रतिषेधः ।

५ उदात्तादिषु च ।

६ एकादेशस्योपसंख्यानम् ।

७ अवयवग्रहणात्सिद्धमिति चेदादेशे रान्तप्रतिषेधः ।

८ अभक्ते दीर्घलत्वयगभ्यस्तस्वरहलादिशेषविसर्जनीयप्रतिषेधः प्रत्ययाव्यवस्था च ।

९ पूर्वान्ते वेवधारणं विसर्जनीयप्रतिषेधो यक्स्वरश्च ।

१० परादावकारलोपौत्वपुक्प्रतिषेधश्चक्युपधाह्रस्वत्वमिटोऽव्यवस्थाभ्यासलोपोऽभ्यस्ततादिस्वरो दीर्घत्वं च ।

अलोऽन्त्यस्य ॥ ५२ ॥

१ अलोऽन्त्यस्येति स्थाने विज्ञातस्यानुसंहारः ।

२ इतरथा ह्यनिष्टप्रसङ्गः ।

३ योगशेषे च ।

ङिच्च ॥ ५३ ॥

१ तातङि ङित्करणस्य सावकाशत्वाद्विप्रतिषेधात्सर्वादेशः ।

आदेः परस्य ॥ ५४ ॥

१ अलोऽन्त्यस्यादेः परस्यानेकाल्शित्सर्वे

१ प. पुस्तके नास्ति २ प. पुस्तके अवयवग्रहणात्सिद्धमित्यधिकम् ।

स्येत्यपवादविप्रतिषेधात्सर्वादेशः ।

अनेकाल्शित् सर्वस्य ॥ ५५ ॥

स्थानिवदादेशो ऽनल्विधौ ॥ ५६ ॥

१ स्थान्यादेशपृथक्त्वादादेशे स्थानिवदनुदेशो गुरुवद्गुरुपुत्र इति यथा ।

२ अल्विधौ प्रतिषेधेऽविशेषणेऽप्राप्तिस्तस्यादर्शनात् ।

३ सामान्यातिदेशे विशेषानतिदेशः ।

४ सत्याश्रये विधिरिष्टः ।

५ प्रतिषेधस्तु प्राप्नोत्यल्विधित्वात् ।

६ न वानुदेशिकस्य प्रतिषेधादितरेण भावः ।

७ आदेश्यल्विधिप्रतिषेधे कुरुवधपिबां गुणवृद्धिप्रतिषेधः ।

८ आदेश्यादेश इति चेत्सुप्तिङ्कृदतिदिष्टेषूपसंख्यानम् ।

९ एकदेशविकृतस्योपसंख्यानम् ।

१० एकदेशविकृतस्यानन्यत्वात्सिद्धम् ।

११ अनित्यविज्ञानं तु तस्मादुपसंख्यानम्[1] ।

१२ अनुपपन्नं स्थान्यादेशत्वं नित्यत्वात् ।

१३ सिद्धं तु यथा लौकिकवैदिकेष्वभूतपूर्वेऽपि स्थानशब्दप्रयोगात् ।

१४ कार्यविपरिणामाद्वा सिद्धम् ।

१५ अपवादप्रसङ्गस्तु स्थानिवत्त्वात् ।

१६ उक्तं[2] वा ।

१७ सिद्धं तु षष्ठीनिर्दिष्टस्य स्थानिवद्वचनात् ।

१८ तस्य दोषस्तयादेश उभयप्रतिषेधः ।

१९ जात्याख्यायां वचनातिदेशे स्थानिवद्भावप्रतिषेधः ।

२० ल्यब्ग्रहणेऽदीर्घः ।

२१ आहिभुवोरीट्प्रतिषेधः ।

२२ वध्यादेशे वृद्धितत्त्वप्रतिषेधः ।

२३ इड्विधिश्च ।

२४ आकारान्तान्नुक्षुक्प्रतिषेधः ।

२५ लोडादेशे शाभावजभावधित्वहिलोपैत्त्वप्रतिषेधः ।

२६ त्र्यादेशे स्रन्तप्रतिषेधः ।

२७ आम्विधौ च ।

२८ स्वरे वस्वादेशे ।

२९ गोः पूर्वणित्त्वात्वस्वरेषु ।

३० करोतिपिब्योः प्रतिषेधः ।

३१ उक्तं[3] वा ।

अचः परस्मिन्पूर्वविधौ[4] ॥ ५७ ॥

१ अचः पूर्वविज्ञानादैचोः सिद्धम् ।

२ तत्रादेशलक्षणप्रतिषेधः ।

३ असिद्धवचनात्सिद्धमिति चेदुत्सर्गलक्षणानामनुदेशः ।

४ असिद्धवचनात्सिद्धमिति चेन्नान्यस्यासिद्धवचनादन्यस्य भावः ।

५ तस्मात्स्थानिवद्वचनमसिद्धत्वं च ।

६ उक्तं[6] वा[7] ।

---

१ इतः परमधिकं प. पुस्तके । एकदेशविकृतेषूपसंख्यानम् । अनादेशत्वात् । रूपान्यत्वाच्च । आदेशः स्थानिवादिति चेन्नानाश्रितत्वात् । आश्रय इति चेदल्विधिप्रसङ्गः । इति भारद्वाजीयपाठः । २ प. पुस्तके इदं नास्ति । ३ प. पुस्तके नास्ति । ४ अपरविधाविति वक्तव्यम् इदमधिकमितः परं प. पुस्तके । ५ प. पुस्तके इतः परमिदमधिकम् । असिद्धवचनात्सिद्धम् । ६ प. पुस्तके नास्ति । ७ प. पुस्तके इतः परमधिकम् । काममतिदिश्यतां वा सच्चासच्चापि नेह भारोऽस्ति । कल्प्यो हि वाक्यशेषो वाक्यं वक्तर्यधीनं हि ॥

७ अनन्तरस्य चेदेकाननुदात्तद्विगुस्वरगतिनिघातेषूपसंख्यानम् ।
८ पूर्वमात्रस्येति चेदुपधाह्रस्वत्वम् ।
९ गुरुसंज्ञा च ।
१० न वा संयोगस्यापूर्वविधित्वात् ।
११ एकादेशस्योपसंख्यानम् ।
१२ उभयनिमित्तत्वात् ।
१३ उभयादेशत्वाच्च ।
१४ हल्चोरादेशः स्थानिवदिति चेद्विंशतेस्तिलोप एकादेशः ।
१५ [1]स्थूलादीनां यणादिलोपेऽवादेशः ।
१६ केकयमित्रय्वोरियादेश एत्वम् ।
१७ उत्तरपदलोपे च ।
१८ यङ्लोपे यणियङुवङः ।
१९ अस्थानिवत्त्वे यङ्लोपे गुणवृद्धिप्रतिषेधः ।
२० अविशेषेण स्थानिवदिति चेल्लोपयणादेशे गुरुविधिः ।
२१ द्विर्वचनादयश्च प्रतिषेधे ।
२२ क्सलोपे लुग्वचनम् ।
२३ हन्तेर्घत्वम् ।
२४ ग्रहणेषु स्थानिवदिति चेज्जग्ध्यादिष्वादेशप्रतिषेधः ।
२५ यणादेशे युलोपेत्वानुनासिकात्त्वप्रतिषेधः ।
२६ रायात्वप्रतिषेधश्च ।
२७ दीर्घे यलोपप्रतिषेधः ।
२८ अतो दीर्घे यलोपवचनम् ।

न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु ॥ ५८ ॥

१ प्रतिषेधे स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानिवत् ।
२ क्विलुगुपधात्वचङ्परनिर्ह्रासकुत्वेषूपसंख्यानम् ।
३ पूर्वत्रासिद्धे च ।
४ प्रयोजनं क्सलोपः सलोपे ।
५ दध आकारलोप आदिचतुर्थत्वे ।
६ हलो यमां यमि लोपे ।
७ अल्लोपणिलोपौ संयोगान्तलोपप्रभृतिषु ।
८ द्विर्वचनादीनि च ।
९ वेरयलोपस्वरवर्जम् ।
१० तस्य दोषः संयोगादिलोपलत्वणत्वेषु ।

द्विर्वचनेऽचि ॥ ५९ ॥

१ आदेशे स्थानिवदनुदेशात्तद्वतो द्विर्वचनम् ।
२ तत्राभ्यासरूपम् ।
३ अज्ग्रहणं तु ज्ञापकं रूपस्थानिवद्भावस्य ।
४ तत्र गाङ्प्रतिषेधः ।
५ [2]कृत्येजन्तदिवादिनामधातुष्वभ्यासरूपम् ।
६ प्रत्यय इति चेत्कृत्येजन्तनामधातुष्वभ्यासरूपम् ।
७ द्विर्वचननिमित्तेऽचि स्थानिवदिति चेण्णौ स्थानिवद्वचनम् ।

१ प. पुस्तके नास्ति । २ प. पुस्तके दिवादीत्यधिकम् ।

८ ओः पुयण्जिषु वचनं ज्ञापकं णौ स्थानिवद्भावस्य ।

अदर्शनं लोपः ॥ ६० ॥

१ [1]लोपसंज्ञायामर्थसतोरुक्तम् ।

२ सर्वप्रसङ्गस्तु सर्वस्यान्यत्रादृष्टत्वात् ।

३ तत्र प्रत्ययलक्षणप्रतिषेधः ।

४ सिद्धं तु प्रसक्तादर्शनस्य लोपसंज्ञित्वात् ।

प्रत्ययस्य लुक्श्लुलुपः ॥ ६१ ॥

१ लुमति प्रत्ययग्रहणमप्रत्ययसंज्ञाप्रतिषेधार्थम् ।

२ प्रयोजनं तद्धितलुकि कंसीयपरशव्ययोर्लुकि च गोप्रकृतिनिवृत्त्यर्थम् ।

३ योगविभागात्सिद्धम् ।

४ कंसीयपरशव्ययोर्विशिष्टनिर्देशात्सिद्धम् ।

५ उक्तं वा ।

६ षष्ठीनिर्देशार्थं तु ।

७ अनिर्देशे हि षष्ठ्यर्थाप्रसिद्धिः ।

८ सर्वादेशार्थं वा वचनप्रामाण्यात् ।

९ उत्तरार्थं तु ।

प्रत्ययलोपे प्रत्ययलक्षणम् ॥ ६२ ॥

१ प्रत्ययलोपे प्रत्ययलक्षणवचनं सदन्वाख्यानाच्छास्त्रस्य ।

२ लुक्युपसंख्यानम् ।

३ लोपे हि विधानम् ।

४ न वादर्शनस्य लोपसंज्ञित्वात् ।

५ प्रत्ययादर्शनं तु लुमत्संज्ञम् ।

६ तत्र लुकि श्लुविधिप्रतिषेधः ।

७ न वा पृथक्संज्ञाकरणात् ।

८ लुमति प्रतिषेधाद्वा ।

९ सतो निमित्ताभावात्पदसंज्ञाभावः ।

१० तुग्दीर्घत्वयोश्च विप्रतिषेधानुपपत्तिरेकयोगलक्षणत्वात्परिवीरिति ।

११ सिद्धं तु स्थानिसंज्ञानुदेशादान्यभाव्यस्य ।

१२ भसंज्ञाङीप्ष्फगोरात्वेषु च सिद्धम् ।

१३ तस्य दोषो ङीनकारलोपेत्वेम्विधयः ।

१४ प्रयोजनमपृक्तशिलोपे नुममामौ गुणवृद्धिदीर्घत्वेमडाट्श्नम्विधयः ।

१५ भसंज्ञाङीप्ष्फगोरात्वेषु च दोषः ।

न लुमताङ्गस्य ॥ ६३ ॥

१ लुमति प्रतिषेध एकपदस्वरस्योपसंख्यानम् ।

२ सर्वामन्त्रितसिज्लुक्स्वरवर्जम् ।

३ प्रयोजनं ञ्निति किल्लुकि स्वराः ।

४ पथिमथोः सर्वनामस्थाने ।

५ अह्नो रविधौ ।

६ उत्तरपदत्वे चापदादिविधौ ।

७ द्वन्द्वेऽन्त्यस्य ।

८ सिच उसोऽप्रसङ्ग आकारप्रकरणात् ।

९ युष्मदस्मदोः स्थग्रहणात् ।

१० आमि लिलोपात्तस्य चानिघातस्तस्माच्च निघातः ।

११ [2]अङ्गाधिकार इष्टो विधिप्रतिषेधौ ।

१२ क्रमेदीर्घत्वं च ।

१ प. पुस्तके नास्ति । २ प. पुस्तके नास्ति ।

१३ न लुमता तस्मिन्निति चेद्धनिणिङादेशास्तल्लोपे ।

अचो ऽन्त्यादि टि ॥ ६४ ॥

अलो ऽन्त्यात्पूर्व उपधा ॥ ६५ ॥

१ उपधासंज्ञायामल्ग्रहणमन्त्यनिर्देशश्चेत्संघातप्रतिषेधः ।

२ अन्त्यविज्ञानात्सिद्धमिति चेन्नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे ।

३ प्रयोजनमव्यक्तानुकरणस्यात इतौ ।

४ घ्वसोरेद्धावभ्यासलोपश्च ।

५ आपि लोपोऽकोऽनचि ।

६ अत्र लोपोऽभ्यासस्य ।

७ अलोऽन्त्यात्पूर्वोऽलुपधेति वा ।

८ अवचनाल्लोकविज्ञानात्सिद्धम् ।

तस्मिन्निति निर्दिष्टे पूर्वस्य ॥ ६६ ॥

तस्मादित्युत्तरस्य ॥ ६७ ॥

१ निर्दिष्टग्रहणमानन्तर्यार्थम् ।

२ तस्मिंस्तस्मादिति पूर्वोत्तरयोर्योगयोरविशेषान्नियमार्थं वचनं दध्युदकं पचत्योदनम् ।

३ उभयनिर्देशे विप्रतिषेधात्पञ्चमीनिर्देशः ।

४ प्रयोजनमतो लसार्वधातुकानुदात्तत्वे ।

५ बहोरिष्ठादीनामादिलोपे ।

६ गोतो णित् ।

७ रुदादिभ्यः सार्वधातुके ।

८ आने मुगीदासः ।

९ आमि सर्वनाम्नः सुट् ।

१० घेर्ङित्याण्नद्याः ।

११ याडापः ।

१२ ङमो ह्रस्वादचि ङमुण्नित्यम् ।

१३ विभक्तिविशेषनिर्देशानवकाशत्वादविप्रतिषेधः ।

१४ यथार्थं वा षष्ठीनिर्देशः ।

१५ प्रकल्पकमिति चेन्नियमाभावः ।

१६ प्रकृतिविकाराव्यवस्था च ।

१७ सप्तमीपञ्चम्योश्च भावादुभयत्र षष्ठीप्रकॢप्तिस्तत्रोभयकार्यप्रसङ्गः ।

स्वं रूपं शब्दस्याशब्दसंज्ञा ॥ ६८ ॥

१ शब्देनार्थगतेरर्थस्यासंभवात्तद्वाचिनः संज्ञाप्रतिषेधार्थं स्वंरूपवचनम् ।

२ न वा शब्दपूर्वको ह्यर्थे संप्रत्ययस्तस्मादर्थनिवृत्तिः ।

३ संज्ञाप्रतिषेधानर्थक्यं वचनप्रामाण्यात् ।

४ मन्त्राद्यर्थमिति चेच्छास्त्रसामर्थ्यादर्थगतेः सिद्धम् ।

५ सित्तद्विशेषाणां वृक्षाद्यर्थम् ।

६ पित्पर्यायवचनस्य च स्वाद्यर्थम् ।

७ जित्पर्यायवचनस्यैव राजाद्यर्थम् ।

८ झित्तस्य च तद्विशेषाणां च मत्स्याद्यर्थम् ।

अणुदित् सवर्णस्य चाप्रत्ययः ॥ ६९ ॥

१ अणसवर्णस्येति स्वरानुनासिक्यकालभेदात् ।

२ तत्र प्रत्याहारग्रहणे सवर्णाग्रहणमनुपदेशात् ।

३ ह्रस्वसंप्रत्ययादिति चेदुच्चार्यमाणसंप्रत्यायकत्वाच्छब्दस्यावचनम् ।

---

१ प. पुस्तके इतः परमधिकम् अन्त्यविज्ञानात्सिद्धमिति ।

४ वर्णपाठ उपदेश इति चेदवरकालत्वात्परिभाषाया अनुपदेशः ।
५ तस्मादुपदेशः ।
६ तत्रानुवृत्तिनिर्देशे सवर्णाग्रहणमनण्त्वात् ।
७ सवर्णेऽण्ग्रहणमपरिभाष्यमाकृतिग्रहणात् ।
८ अनन्यत्वाच्च ।
९ अनेकान्तो ह्यनन्यत्वकरः ।
१० तद्वच्च हल्ग्रहणेषु ।
११ द्रुतविलम्बितयोश्चानुपदेशात् ।
१२ वृत्तिपृथक्त्वं तु नोपपद्यते ।
१३ तस्मात्तत्र तपरनिर्देशात्सिद्धम् ।

तपरस्तत्कालस्य ॥ ७० ॥

१ तपरस्तत्कालस्येति नियमार्थमिति चेद्दीर्घग्रहणे स्वरभिन्नाग्रहणम् ।[1]
२ प्रापकमिति चेद्ध्रस्वग्रहणे दीर्घप्लुतप्रतिषेधः ।
३ विप्रतिषेधात्सिद्धम् ।
४ द्रुतायां तपरकरणे मध्यमविलम्बितयोरुपसंख्यानं कालभेदात् ।
५ सिद्धं त्ववस्थिता वर्णा वक्तुश्चिराचिरवचनाद्वृत्तयो विशिष्यन्ते[2] ।

आदिरन्त्येन सहेता ॥ ७१ ॥

१ आदिरन्त्येन सहेतेत्यसंप्रत्ययः संज्ञिनोऽनिर्देशात् ।
२ सिद्धं त्वादिरिता सह तन्मध्यस्येति वचनात् ।
३ संबन्धिशब्दैर्वा तुल्यम् ।

येन विधिस्तदन्तस्य ॥ ७२ ॥

१ येन विधिस्तदन्तस्येति चेद्ग्रहणोपाधीनां तदन्तोपाधिप्रसङ्गः ।
२ सिद्धं तु विशेषणविशेष्ययोर्यथेष्टत्वात् ।
३ समासप्रत्ययविधौ प्रतिषेधः ।
४ उगिद्वर्णग्रहणवर्जम् ।
५ अकच्छ्म्वतः सर्वनामाव्ययधातुविधावुपसंख्यानम् ।
६ सिद्धं तु तदन्तान्तवचनात् ।
७ तदेकदेशविज्ञानाद्वा सिद्धम् ।
८ प्रयोजनं सर्वनामाव्ययसंज्ञायाम् ।
९ उपपदविधौ भयाढ्यादिग्रहणम् ।
१० ङीब्विधावुगिद्ग्रहणम् ।
११ प्रतिषेधे स्वस्रादिग्रहणम् ।
१२ अपरिमाणबिस्तादिग्रहणं च प्रतिषेधे ।
१३ दिति ।
१४ रोण्या अण् ।
१५ तस्य च ।
१६ रथसीताहलेभ्यो यद्विधौ ।
१७ सुसर्वार्धदिक्शब्देभ्यो जनपदस्य ।
१८ ऋतोर्वृद्धिमद्विधाववयवानाम् ।
१९ ठञ्विधौ संख्यायाः ।
२० धर्मान्नञः ।
२१ पदाङ्गाधिकारे तस्य च तदुत्तरपदस्य च ।
२२ प्रयोजनमिष्टकेषीकामालानां चिततूलभारिषु ।
२३ महदप्स्वसृनप्तॄणां दीर्घविधौ ।
२४ पद्युष्मदस्मदस्थ्याद्यनडुहो नुम् ।
२५ युपाथिमथिपुंगोसखिचतुरनडुत्त्रिग्रहणम् ।

१ इदं प. पुस्तके नास्ति । २ प. पुस्तके इतः परमधिकं भेर्याघातवत् ।

२६ त्यदादिविधिभक्तादिविग्रहणं च।
२७ वर्णग्रहणं च सर्वत्र ।
२८ प्रत्ययग्रहणं चापञ्चम्याः ।
२९ यस्मिन्विधिस्तदादावल्ग्रहणे ।

वृद्धिर्यस्याचामादिस्तद्वृद्धम् ॥ ७३ ॥

१ वृद्धसंज्ञायामजसंनिवेशादनादित्वम् ।
२ एकान्तादित्वे च सर्वप्रसङ्गः ।
३ सिद्धमजाकृतिनिर्देशात् ।
४ व्यञ्जनस्याविद्यमानत्वं यथान्यत्र ।
५ वा नामधेयस्य ।
६ गोत्रोत्तरपदस्य च ।
७ गोत्रान्ताद्वासमस्तवत् ।
८ जिह्वाकात्यहरितकात्यवर्जम् ।

त्यदादीनि च ॥ ७४ ॥

एङ् प्राचां देशे ॥ ७५ ॥

प्रथमाध्यायस्य प्रथमः पादः ।

गाङ्कुटादिभ्यो ऽञ्णिन्ङित् ॥ १ ॥

१ ङित्किद्वचने तयोरभावादप्रसिद्धिः ।
२ भवतीति चेदादेशप्रतिषेधः ।
३ संज्ञाकरणे ङिद्ग्रहणेऽ संप्रत्ययः शब्दभेदात् ।
४ तद्वदतिदेशेऽकिद्विधिप्रसङ्गः ।
५ सिद्धं तु प्रसज्यप्रतिषेधात् ।
६ सर्वत्र सन्नन्तात्मनेपदप्रतिषेधः।
७ सिद्धं तु पूर्वस्य कार्यातिदेशात् ।
८ पृथगनुबन्धत्वे प्रयोजनं वञ्चिस्वपियजादीनामसंप्रसारणं सार्वधातुकवच्चादिषु ।
९ जाग्रोऽगुणविधिः ।
१० कुटादीनामिट्प्रतिषेधः ।
११ क्त्वायां कित्प्रतिषेधश्च ।

विज इट् ॥ २ ॥

विभाषोर्णोः ॥ ३ ॥

सार्वधातुकमपित् ॥ ४ ॥

१ अपिन्ङिदिति चेच्छ्वेकादेशप्रतिषेध आदिवत्त्वात् ।
२ न पिन्ङिदिति चेदुत्तमैकादेशप्रतिषेधः।

असंयोगाल्लिट् कित् ॥ ५ ॥

१ ऋदुपधेभ्यो लिटः कित्त्वं गुणाद्विप्रतिषेधेन ।
२ उक्तं वा[1] ।

इन्धिभवतिभ्यां च ॥ ६ ॥

१ इन्धेश्छन्दोविषयत्वाद्भुवो वुको नित्यत्वात्ताभ्यां किद्वचनानर्थक्यम्[2] ।

मृडमृदगुधकुषक्लिशवदवसः क्त्वा ॥ ७ ॥

रुदविदमुषग्रहिस्वपिप्रच्छः संश्च ॥ ८ ॥

इको झल् ॥ ९ ॥

हलन्ताच्च ॥ १० ॥

१ दम्भेर्हल्ग्रहणस्य जातिवाचकत्वात्सिद्धम्[3] ।

---

१ प. पुस्तके नास्ति । २ प. पुस्तके इतः परमधिकम् । इकः कित्त्वं गुणो मा भूत् । दीर्घारम्भात् । कृते भवेत् । अनर्थकं तु ह्रस्वार्थम् । दीर्घाणां तु प्रसज्यते । सामर्थ्याद्धि पुनर्भाव्यम् । ऋदित्वं दीर्घसंश्रयम् । दीर्घाणां नाकृते दीर्घे । णिलोपस्तु प्रयोजनम् । ३ प. पुस्तके इतः परमधिकम् इच्च कस्य तकारेत्वम् । दीर्घो मा भूद् । ऋतेऽपि सः । अनन्तरे प्लुतो मा भूत् । प्लुतश्च विषये स्मृतः । न सेडिति कृते कित्वे । निष्ठायामवधारणात् । ज्ञापकान्न परोक्षायाम् । सनि झल्ग्रहणं विदुः । इत्वं कित्संनियोगेन । रेण तुल्यं सुधीवनि । वस्वर्थम् । किद्वतीदेशात् । निगृहीतिः । क्त्वा च विग्रहात् ।

लिङ्सिचावात्मनेपदेषु ॥ ११ ॥
उश्च ॥ १२ ॥
वा गमः ॥ १३ ॥
हनः सिच् ॥ १४ ॥
यमो गन्धने ॥ १५ ॥
विभाषोपयमने ॥ १६ ॥
स्थाघ्वोरिच्च ॥ १७ ॥
न क्त्वा सेट् ॥ १८ ॥
निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः १९
मृषस्तितिक्षायाम् ॥ २० ॥
उदुपधाद्भावादिकर्मणोरन्यतरस्याम् २१
१ उदुपधाच्छपः ।
पूङः क्त्वा च ॥ २२ ॥
१ पूङः क्त्वानिष्ठयोरिटि वा प्रसङ्गः सेट्-प्रकरणात् ।
२ न वा सेट्त्वास्याकिदाश्रयत्वादनिटि वा कित्त्वम् ।
३ इड्विधौ च ग्रहणम्[१] ।
नोपधात् थफान्ताद्वा ॥ २३ ॥
वञ्चिलुञ्च्यृतश्च ॥ २४ ॥
तृषिमृषिकृशेः काश्यपस्य ॥ २५ ॥
रलो व्युपधाद्धलादेः संश्च ॥ २६ ॥
१ रलः क्त्वासनोः कित्त्वम् ।
ऊकालोऽज्झ्रस्वदीर्घप्लुतः ॥ २७ ॥
१ ह्रस्वादिषु समसंख्याप्रसिद्धिर्निर्देशवैषम्यात् ।
२ सिद्धं तु समसंख्यत्वात् ।
३ त्रयाणां हि विकारनिर्देशः ।
४ दीर्घप्लुतयोस्तु पूर्वसंज्ञाप्रसङ्गः ।
५ सिद्धं तु तपरनिर्देशात् ।
६ द्रुतादिषु चोक्तम्[२] ।
अचश्च ॥ २८ ॥
१ ह्रस्वादिविधिरलोऽन्त्यस्येति चेद्व्रश्चिप्रच्छिशमादिप्रभृतिहानिगमिदीर्घेष्वज्ग्रहणम् ।
२ अचश्चेन्नपुंसकह्रस्वाकृत्सार्वधातुकनामिदीर्घेष्वनन्त्यप्रतिषेधः ।
३ संज्ञया विधाने नियमः ।
४ अज्ग्रहणं संयोगाच्समुदायनिवृत्त्यर्थम् ।
उच्चैरुदात्तः ॥ २९ ॥
१ उच्चनीचस्यानवस्थितत्वात्संज्ञाप्रसिद्धिः ।
२ सिद्धं तु समानप्रक्रमवचनात् ।
नीचैरनुदात्तः ॥ ३० ॥
समाहारः स्वरितः ॥ ३१ ॥
१ समाहारोऽचोश्चेन्नाभावात् ।
२ गुणयोश्चेन्नाच्प्रकरणात् ।
३ सिद्धं त्वच्समुदायस्याभावात्तद्गुणे संप्रत्ययः ।
तस्यादित उदात्तमर्धह्रस्वम् ॥ ३२ ॥
१ स्वरितस्यार्धह्रस्वोदात्तादोदात्तस्वरितपरस्य सन्नतरादूर्ध्वमुदात्तादनुदात्तस्य स्वरितात्कार्यं स्वरितादिति सिद्ध्यर्थम् ।
२ स्वरितोदात्तार्थं च ।

१ प. पुस्तके इतः परमधिकम् । नित्यमकित्त्वमिडाद्योः क्त्वाग्रहणमुत्तरार्थम् इति भारद्वाजीयः पाठः॥ २ इदं प. पुस्तके नास्ति ।

३ स्वरितोदात्तार्थास्वरितार्थम् ।
४ स्वरितपरसन्नतरार्थं च ।
५ देवब्रह्मणोरनुदात्तवचनं ज्ञापकं स्वरितादिति सिद्धत्वस्य ।

एकश्रुति दूरात्संबुद्धौ ॥ ३३ ॥

यज्ञकर्मण्यजपन्यूङ्खसामसु ॥ ३४ ॥

उच्चैस्तरां वा वषट्कारः ॥ ३५ ॥

विभाषा छन्दसि ॥ ३६ ॥

न सुब्रह्मण्यायां स्वरितस्य तूदात्तः॥३७॥

१ सुब्रह्मण्यायामोकार उदात्तः ।
२ आकार आख्याने परादिश्च ।
३ वाक्यादौ च द्वे द्वे ।
४ मघवन्वर्जम् ।
५ सुत्यापराणामन्तः ।
६ असावित्यन्तः ।
७ अमुष्येत्यन्तः ।
८ स्यान्तस्योपोत्तमं च ।
९ वा नामधेयस्य ।

देवब्रह्मणोरनुदात्तः ॥ ३८ ॥

१ देवब्रह्मणोरनुदात्तत्वमेके ।

स्वरितात्संहितायामनुदात्तानाम् ॥३९॥

१ स्वरितात्संहितायामनुदात्तानामिति चेद्व्येकयोरैकश्रुत्यवचनम् ।
२ अविशेषणैकश्रुत्यामिति चेद्व्यवहितानामप्रसिद्धिः ।
३ अनेकमपीति तु वचनात्सिद्धम् ।

उदात्तस्वरितपरस्य सन्नतरः ॥ ४० ॥

अपृक्त एकाल् प्रत्ययः ॥ ४१ ॥

१ अपृक्तसंज्ञायां हल्ग्रहणं स्वादिलोपे हलोऽग्रहणार्थम्[1] ।
२ अणिञोर्लुगर्थमिति चेण्णेऽतिप्रसङ्गः ।
३ वचनप्रामाण्यादिति चेत्फिञ्निवृत्त्यर्थं वचनम् ।
४ पैलादिषु वचनात्सिद्धम् ।

तत्पुरुषः समानाधिकरणःकर्मधारयः४२

१ तत्पुरुषः समासाधिकरणः कर्मधारय इति चेत्समासैकार्थत्वादप्रसिद्धिः ।
२ सिद्धं तु पदसामानाधिकरण्यात् ।

प्रथमानिर्दिष्टं समास उपसर्जनम्॥४३॥

१ प्रथमानिर्दिष्टं समास उपसर्जनमिति चेचेदनिर्देशात्प्रथमायाः समासे संज्ञाप्रसिद्धिः ।
२ सिद्धं तु समासविधाने वचनात् ।
३ न वा तादर्थ्यात्ताच्छब्द्यम् ।
४ यस्य विधौ प्रथमानिर्देशस्ततोऽन्यत्राप्युपसर्जनसंज्ञाप्रसङ्गः ।
५ सिद्धं तु यस्य विधौ तं प्रतीति वचनात्[2] ।
६ षष्ठयन्तयोश्चोपसर्जनत्व उक्तम्[3] ।
७ उक्तं वा[3] ।

एकविभक्ति चापूर्वनिपाते ॥ ४४ ॥

१ एकविभक्तावषष्ठ्यन्तवचनम् ।
२ उक्तं वा[3] ।
३ प्रयोजनं द्विगुप्राप्तापन्नालंपूर्वोपसर्गाः क्तार्थे ।

१ प. पुस्तके इतः परमधिकम् । अणिञोर्लुगर्थमल्ग्रहणम् । २ प. पुस्तके इतः परमधिकम् नाप्रतिषेधात् अप्राप्तेर्वा । ३ इदं प. पुस्तके नास्ति ।

अर्थवदधातुरप्रत्ययः प्रातिपदिकम् ४५

१ अर्थवत्यनेकपदप्रसङ्गः ।
२ समुदायोऽनर्थक इति चेदवयवार्थवत्त्वात् समुदायार्थवत्त्वं यथा लोके ।
३ वाक्यप्रतिषेधोऽर्थवत्त्वात् ।
४ पदार्थादन्यस्यानुपलब्धिरिति चेत्पदार्थाभिसंबन्धस्योपलब्धिः ।
५ तस्मात्प्रतिषेधः ।
६ अर्थवत्समुदायानां समासग्रहणं नियमार्थम् ।
७ अर्थवत्ता नोपपद्यते केवलेनावचनात् ।
८ न वा प्रत्ययेन नित्यसंम्बन्धात्केवलस्याप्रयोगः ।
९ सिद्धं त्वन्वयव्यतिरेकाभ्याम् ।
१० वर्णस्यार्थवदनर्थकत्व उक्तम् ।
११ संघातार्थवत्त्वाच्चेति चेदृष्टो ह्यतदर्थेन गुणेन गुणिनोऽभिभावः ।
१२ निपातस्यानर्थकस्य प्रातिपदिकत्वम् ।
१३ अप्रत्यय इति चेत्तिबेकादेशे प्रतिषेधोन्तवत्त्वात् ।
१४ न प्रत्यय इति चेदूङेकादेशे प्रतिषेध आदिवत्त्वात् ।
१५ सुब्लोपे च प्रत्ययलक्षणत्वात् ।

कृत्तद्धितसमासाश्च ॥ ४६ ॥

१ समासग्रहण उक्तम्[1] ।

ह्रस्वो नपुंसके प्रातिपदिकस्य ॥ ४७ ॥

१ नपुंसकह्रस्वत्वे प्रातिपदिकग्रहणं तिङ्निवृत्त्यर्थम् ।
२ अव्ययप्रतिषेधः ।
३ न वा लिङ्गाभावात् ।
४ यजेकादेशदीर्घत्त्वेषु प्रतिषेधः ।
५ यजेकादेशदीर्घत्त्वेषु बहिरङ्गलक्षणत्वात्सिद्धम् ।

गोस्त्रियोरुपसर्जनस्य ॥ ४८ ॥

१ उपसर्जनह्रस्वत्वे च ।
२ गोटाङ्ग्रहणं कृन्निवृत्त्यर्थम् ।
३ ईयसो बहुव्रीहौ पुंवद्वचनम् ।
४ पूर्वपदस्य च प्रतिषेधो गोसमासनिवृत्त्यर्थम् ।
५ कपि च ।
६ द्वन्द्वे च ।
७ [2]उक्तं वा ।

लुक्तद्धितलुकि ॥ ४९ ॥

१ तद्धितलुक्यवन्त्यादीनां प्रतिषेधः ।
१ तद्धितलुक्यवन्त्यादीनामप्रतिषेधोऽलुक्परत्वात्[3] ।

इद्गोण्याः ॥ ५० ॥

लुपि युक्तवद्व्यक्तिवचने ॥ ५१ ॥

१ अन्यत्राभिधेयव्यक्तिवचनभावाल्लुपि युक्तवदनुदेशः ।
२ लुपोऽदर्शनसंज्ञित्वादर्थगतिर्नोपपद्यते ।

---

१ इदं प. पुस्तके नास्ति । २ इदं प. पुस्तके नास्ति । ३ प. पुस्तक इतः परमाधिकम् । इद्गोण्या नेति वक्तव्यम् । ह्रस्वता हि विधीयते । इति वा वचने तावत् । मात्रार्थं वा कृतं भवेत् । गोण्या ह्रस्वं प्रकरणात् । सूच्याद्यर्थमथापि वा ।

३ न वा दर्शनस्याशक्यत्वादर्थगतिः साहचर्यात् ।

४ योगाभावाच्चान्यस्य ।

५ समास उत्तरपदस्य बहुवचनस्य लुपः ।

विशेषणानां चाजातेः ॥ ५२ ॥

१ विशेषणानां वचनं जातिनिवृत्त्यर्थम् ।

२ समानाधिकरणत्वात्सिद्धम् ।

३ हरीतक्यादिषु व्यक्तिः ।

४ खलतिकादिषु वचनम् ।

५ मनुष्यलुपि प्रतिषेधः ।

तदशिष्यं संज्ञाप्रमाणत्वात् ॥ ५३ ॥

लुब्योगाप्रख्यानात् ॥ ५४ ॥

योगप्रमाणे च तदभावेऽदर्शनं स्यात् ॥

प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात् ॥ ५६ ॥

कालोपसर्जने च तुल्यम् ॥ ५७ ॥

जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम् ॥ ५८ ॥

१ जात्याख्यायां सामान्याभिधानादैकार्थ्यम् ।

२ तत्रैकवचनादेश उक्तम् ।

३ अर्थातिदेशात्सिद्धम् ।

४ संख्याप्रयोगे प्रतिषेधः ।

५ अस्मदो नामयुवप्रत्यययोश्च[१] ।

६ अशिष्यं वा बहुवत्पृथक्त्वाभिधानात् ।

७ जातिशब्देन हि द्रव्याभिधानम् ।

अस्मदो द्वयोश्च ॥ ५९ ॥

फल्गुनीप्रोष्ठपदानां च नक्षत्रे ॥ ६० ॥

छन्दसि पुनर्वस्वोरेकवचनम् ॥ ६१ ॥

विशाखयोश्च ॥ ६२ ॥

१ पुनर्वसुविशाखयोः सुपां सुलुक्पूर्वसवर्णेति सिद्धम् ।

तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम् ॥ ६३ ॥

सरूपाणामेकशेष एकविभक्तौ ॥ ६४ ॥

१ प्रत्यर्थं शब्दनिवेशान्नैकेनानेकस्याभिधानम् ।

२ तत्रानेकार्थाभिधानेऽनेकशब्दत्वम् ।

३ तस्मादेकशेषः ।

४ एकविभक्ताविति चेन्नाभावाद्विभक्तेः ।

५ पृथक्सर्वेषामिति चेदेकशेषे पृथग्विभक्त्युपलब्धिस्तदाश्रयत्वात् ।

६ समास इति चेत्स्वरसमासान्तेषु दोषः ।

७ अङ्गाश्रये चैकशेषवचनम् ।

८ तिङ्समासे तिङ्समासवचनम् ।

९ तिङ्विधिप्रतिषेधश्च ।

१० असमासे वचनलोपः ।

११ द्विवचनबहुवचनविधिः ।

१२ द्वन्द्वप्रतिषेधश्च ।

१३ विभक्त्यन्तानामेकशेषे, एकविभक्त्यन्तानामिति तु पृथग्विभक्तिप्रतिषेधार्थम्

१४ न वार्थविप्रतिषेधादयुगपद्वचनाभावः ।

१५ अनेकार्थाश्रयश्च पुनरेकशेषः ।

१६ तस्मान्नैकशब्दत्वम् ।

१ इदं प. पुस्तके नास्ति । १ प. इदमधिकम् । ('अस्मदः सविशेषणस्य प्रयोगेनेत्येव' इत्यपर आह ।)

१७ प्रातिपदिकानामेकशेषे मातृमात्रोः प्रतिषेधः सरूपत्वात् ।
१८ हरितहरिणश्येतश्येनरोहितरोहिणानां स्त्रियामुपसंख्यानम् ।
१९ न वा पदस्यार्थे प्रयोगात् ।
२० सर्वत्रापत्यादिषूपसंख्यानम् ।
२१ सिद्धं तु समानार्थानामेकशेषवचनात् ।
२२ नानार्थानामपि सरूपाणाम् ।
२३ एकार्थानामपि विरूपाणाम् ।
२४ स्वरभिन्नानां यस्योत्तरस्वरविधिः ।
२५ संख्याया अर्थासंप्रत्ययादन्यपदार्थत्वाच्चानेकशेषः ।
२६ प्रथममध्यमोत्तमानामेकशेषोऽसरूपत्वात्
२७ द्विवचनबहुवचनाप्रसिद्धिश्चैकार्थत्वात्[1] ।
२८ नैकार्थ्यमिति चेदारम्भानर्थक्यम् ।
२९ अशिष्य एकशेष एकेनोक्तत्वात् ।
३० प्रत्यर्थं शब्दनिवेशादेकेनानेकस्याभिधानादप्रत्यर्थमिति चेत्तदपि प्रत्यर्थमेव[2]।
३१ यावतामभिधानं तावतां प्रयोगो न्याय्य इति चेदेकेनाप्यनेकस्याभिधानम्[3] ।
३२ एकेनोक्तत्वादपरस्य प्रयोगोऽनुपपन्न इति चेदनुक्तत्वात्प्लक्षेण न्यग्रोधस्य न्यग्रोधप्रयोगः ।
३३ अभिधानं पुनः स्वाभाविकम् ।
३४ उभयदर्शनाच्च ।
३५ आकृत्यभिधानाद्वैकं विभक्तौ वाजप्यायनः ।
३६ प्रख्याविशेषात् ।
३७ अव्यपवर्गगतेश्च ।
३८ ज्ञायते चैकोपदिष्टम् ।
३९ धर्मशास्त्रं च तथा ।
४० अस्ति चैकमनेकाधिकरणस्थं युगपदितीन्द्रवद्विषयः ।
४१ नैकमनेकाधिकरणस्थं युगपदिति चेत्तथैकशेषे ।
४२ द्रव्याभिधाने ह्याकृत्यसंप्रत्ययः ।
४३ तत्रासर्वद्रव्यगतिः ।
४४ चोदनायां चैकस्योपाधिवृत्तेः ।
४५ द्रव्याभिधानं व्याडिः ।
४६ तथा च लिङ्गवचनसिद्धिः ।
४७ चोदनासु च तस्यारम्भात् ।
४८ न चैकमनेकाधिकरणस्थं युगपत् ।
४९ विनाशे प्रादुर्भावे च सर्वं तथा स्यात् ।
५० अस्ति च वैरूप्यम् ।
५१ तथा च विग्रहः ।
५२ व्यर्थेषु च मुक्तसंशयम् ।
५३ लिङ्गवचनसिद्धिर्गुणस्यानित्यत्वात् ।
५४ गुणवचनवद्वा ।
५५ अधिकरणगतिः साहचर्यात् ।
५६ न चैकमनेकाधिकरणस्थं युगपदित्यादित्यवद्विषयः ।
५७ अविनाशोऽनाश्रितत्वात् ।
५८ वैरूप्यविग्रहौ द्रव्यभेदात् ।
५९ व्यर्थेषु च सामान्यात्सिद्धम् ।

१ प. पुस्तके इतः परमधिकम् । नैकार्थ्यम् । २ प. पुस्तके इतः परमधिकम् । यावतामभिधानं तावतां प्रयोगे न्याय्यः । ३ प. पुस्तके इतः परमधिकम् । एकेनोक्तत्वादपरस्य प्रयोगोऽनुपपन्नः ।

वृद्धो यूना तल्लक्षणश्चेदेव विशेषः ॥६५॥

स्त्री पुंवच्च ॥ ६६ ॥

पुमान्स्त्रिया ॥ ६७ ॥

भ्रातृपुत्रौ स्वसृदुहितृभ्याम् ॥ ६८ ॥

१ असरूपाणां युवस्थविरस्त्रीपुंसानां विशेषस्याविवक्षितत्वात्सामान्यस्य च विवक्षितत्वात्सिद्धम् ।

२ ब्राह्मणवत्साब्राह्मणीवत्सयोर्लिङ्गस्य विभक्तिपरस्य विशेषवाचकत्वादनेकशेषः ।

नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम् ॥ ६९ ॥

१ प्रधाने कार्यसंप्रत्ययाच्छेषः ।

२ आकृतिवाचित्वादेकवचनम्[१] ।

पिता मात्रा ॥ ७० ॥

श्वशुरः श्वश्र्वा ॥ ७१ ॥

१ भ्रातृपुत्रपितृश्वशुराणां कारणाद्द्रव्ये शब्दनिवेश इति चेत्तुल्यकारणत्वात् सिद्धम् ।

२ दर्शनं हेतुरिति चेत्तुल्यम् ।

३ तद्विषयं च ।

४ अन्यत्रापि तद्विषयदर्शनात् ।

त्यदादीनि सर्वैर्नित्यम् ॥ ७२ ॥

१ त्यदादितः शेषे पुंनपुंसकतो लिङ्गवचनानि ।

२ अद्वन्द्वतत्पुरुषविशेषणानाम् ।

३ त्यदादीनां सामान्यार्थत्वात् ।

४ परस्य चोभयवाचित्वात्[३] ।

५ पूर्वशेषदर्शनाच्च ।

६ सामान्यविशेषवाचिनोश्च द्वन्द्वाभावात् सिद्धम् ।

ग्राम्यपशुसंघेष्वतरुणेषु स्त्री[४] ॥ ७३ ॥

इति प्रथमाध्यायस्य द्वितीयः पादः ।

भूवादयो धातवः ॥ १ ॥

१ पाठेन धातुसंज्ञायां समानशब्दप्रतिषेधः ।

२ परिमाणग्रहणं च ।

३ क्रियावचन उपसर्गप्रत्ययप्रतिषेधः ।

४ सङ्घातेनार्थगतेः ।

५ अस्तिभवतिविद्यतीनां धातुत्वम् ।

६ प्रत्ययार्थस्याव्यतिरेकात्प्रकृत्यन्तरेषु । धातोश्चार्थभेदात्प्रत्ययान्तरेषु । [७]सिद्धं त्वन्वयव्यतिरेकाभ्याम् ।

७ क्रियाविशेषक उपसर्गः ।

८ भाववचने तदर्थप्रत्ययप्रतिषेधः ।

९ इतरेतराश्रयं च प्रत्यये भाववचनत्वं तस्माच्च प्रत्ययः ।

१० सिद्धं तु नित्यशब्दत्वादनाश्रित्य भाववचनत्वं प्रत्ययः ।

११ प्रथमभावग्रहणं च ।

---

१ प. पुस्तके इतः परमधिकम् भ्रातृपुत्रपितृश्वशुराणां कारणाद् द्रव्ये शब्दनिवेशः । २ प. पुस्तके इतः परमधिकम् दर्शनं वै हेतुः । ३ प. पुस्तके इदमधिकमितःपरम् । न वा एष लोके संप्रत्ययः । ४ इदं प. पुस्तके नास्ति । ५ प. पुस्तके इतः परमधिकं वार्तिकम् । अनेकशफेष्विति वक्तव्यम् । प. पुस्तके इतः परमधिकम् । भूवादीनां वकारोऽयं मङ्गलार्थः प्रयुज्यते । ७ सिद्धं तु इत्यधिकं कीलहॉर्नपाठे । अपि तूक्तमंषु हस्तलिखितेषु न दृश्यते ।

१२ भूवादिपाठः प्रातिपदिकाणपयत्यादिनिवृत्त्यर्थः ।

१३ स्वरानुबन्धज्ञापनाय च ।

उपदेशेऽजनुनासिक इत् ॥ २ ॥

१ इत्संज्ञायां सर्वप्रसङ्गोऽविशेषात् ।

२ सिद्धं तूपदेशनेऽनुनासिकवचनात् ।

हलन्त्यम् ॥ ३ ॥

१ हलन्त्ये सर्वप्रसङ्गः सर्वान्त्यत्वात् ।

२ सिद्धं तु व्यवसितान्त्यत्वात् ।

३ लकारस्यानुबन्धाज्ञापितत्वाद्धल्ग्रहणाप्रसिद्धिः ।

४ सिद्धं तु लकारनिर्देशात् ।

५ एकशेषनिर्देशाद्वा ।

६ प्रातिपदिकप्रतिषेधोऽकृत्तद्धिते ।

७ इदर्थाभावात्सिद्धम् ।

न विभक्तौ तुस्माः ॥ ४ ॥

१ विभक्तौ तवर्गप्रतिषेधोऽतद्धिते ।

आदिर्ञिटुडवः ॥ ५ ॥

षः प्रत्ययस्य ॥ ६ ॥

चुटू ॥ ७ ॥

१ चुञ्चुप्चणपोश्चकारप्रतिषेधः ।

२ इदर्थाभावात्सिद्धम् ।

३ पित्करणं किमर्थमिति चेत्पर्यायार्थम् ।

४ इर उपसंख्यानम् ।

५ अवयवग्रहणादिति चेदिदिद्विधिप्रसङ्गः।[१]

लशक्वतद्धिते ॥ ८ ॥

तस्य लोपः ॥ ९ ॥

१ इतो लोपे णल्क्त्वानिष्ठासूपसंख्यानमित्प्रतिषेधात् ।

२ सिद्धं तु णलादीनां ग्रहणप्रतिषेधात् ।

३ निर्दिष्टलोपाद्वा ।

४ तत्र तुस्मानां प्रतिषेधः ।

५ न वोच्चारणसामर्थ्यात् ।

६ अनुबन्धलोपे भावाभावयोर्विप्रतिषेधादप्रसिद्धिः ।

७ सिद्धं त्वपवादन्यायेन ।

८ भावो हि कार्यार्थोऽनन्यार्थो लोपः ।

९ एकान्तस्तत्रोपलब्धेः ।

१० तत्रासरूपसर्वादेशदाप्प्रतिषेधे पृथक्त्वनिर्देशोऽनाकारान्तत्वात् ।

११ अनेकान्ते वृत्तिविशेषः ।

१२ अनन्तर इति चेत्पूर्वपरयोरित्कृतप्रसङ्गः ।

१३ सिद्धं तु व्यवसितपाठात् ।

१४ इतरथा ह्येकान्तेऽपि संदेहः ।

१५ वृत्ताद्वा ।

यथासंख्यमनुदेशः समानाम् ॥ १० ॥

१ संज्ञासमासनिर्देशात्सर्वप्रसङ्गोऽनुदेशस्य तत्र यथासंख्यवचनं नियमार्थम् ।

२ संज्ञासमासनिर्देशःपृथग्विभक्ति संज्ञ्यनुच्चरणार्थः ।

३ प्रकरणे च सर्वसंप्रत्ययार्थः ।

४ संख्यासाम्यं शब्दतश्चेण्णलादयः परस्मैपदानां डारौरसः प्रथमस्यायवायाव एच इत्यनिर्देशः ।

१ प. पुस्तके इतः परमाधिकम् । अवयवग्रहणात्सिद्धम् ।

५ अर्थवत्श्वेलल्टुटोर्नन्वरीहणसिन्धुतक्षशिलादिषु दोषः ।
६ आत्मनेपदविधिनिष्ठासार्वधातुकद्विग्रहणेषु ।
७ एङः पूर्वत्वे प्रतिषेधः ।
८ अतिप्रसङ्गो गुणवृद्धिप्रतिषेधे क्ङिति ।
९ उदिकूले रुजिवहोः ।
१० तच्छीलादिषु धातुत्रिग्रहणेषु ।
११ घञादिषु द्विग्रहणेषु ।
१२ अवे तॄस्त्रोः करणाधिकरणयोः ।
१३ कर्तृकर्मणोश्च भूकृञोः ।
१४ अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि ।
१५ कृभ्वोः क्त्वाणमुलौ ।
१६ अधीयानविदुषोश्छन्दोब्राह्मणानि ।
१७ रोपधेतोः पथिदूतयोः ।
१८ तत्र भवस्तस्य व्याख्यानः क्रतुयज्ञेभ्यश्च ।
१९ संघादिष्वञ्प्रभृतयः ।
२० वेशोयशआदेर्भगाद्यल्खौ ।
२१ ङसिङसोः ख्यत्यात्परस्य ।
२२ न वा समानयोगवचनात् ।
२३ तस्य दोषो विदो लटो वा ।
२४ ध्माधेटोर्नाडीमुष्ट्योश्च ।
२५ खलगोरथादिनित्रकट्यचश्च ।
२६ सिन्धवपकाराभ्यां कन् अणञौ च ।
२७ युष्मदस्मदोश्चादेशाः ।

स्वरितेनाधिकारः ॥ ११ ॥

१ अधिकारः प्रतियोगं तस्यानिर्देशार्थः ।
२ न वा निर्दिश्यमानाधिकृतत्वाद्यथा लोके ।
३ अन्यनिर्देशस्तु निवर्तकस्तस्मात्परिभाषा ।
४ अधिकारपरिमाणाज्ञानं तु ।
५ अधिकारपरिमाणाज्ञानार्थं तु नाधिकार इति चेदुक्तम् ।
६ यावतिथोऽलनुबन्धस्तावतो योगाननतिवचनात्सिद्धम् ।
७ भूयसि प्राग्वचनम्[1] ।

अनुदात्तङित आत्मनेपदम् ॥ १२ ॥

१ आत्मनेपदवचनं नियमार्थम् ।
२ लविधानाद्विहितम् ।
३ तत्र प्रत्ययनियमे शेषवचनं परस्मैपदस्यानिवृत्तत्वात् ।
४ क्यष आत्मनेपदवचनं तस्यान्यत्र नियमात् ।
५ प्रकृत्यर्थनियमेऽन्याभावः ।
६ शेषवचनं च ।
७ कर्तरि चात्मनेपदविषये परस्मैपदप्रतिषेधार्थम्[2] ।

भावकर्मणोः ॥ १३ ॥

कर्तरि कर्मव्यतिहारे ॥ १४ ॥

१ कर्मव्यतिहारादिषु कर्तृग्रहणं भावकर्मनिवृत्त्यर्थम् ।
३ न वानन्तरस्य प्रतिषेधात् ।

न गतिहिंसार्थेभ्यः ॥ १५ ॥

१ प्रतिषेधे हसादीनामुपसंख्यानम् ।
२ हरिवह्योरप्रतिषेधः ।

१ प. पुस्तके इतः परं नास्ति । २ प. पुस्तके इतः परमधिकम् । विकरणेभ्यः प्रतिषेधः । ३ प. पुस्तके इतः परमधिकम् । क्रियाव्यतिहार इति वक्तव्यम् ।

इतरेतरान्योऽन्योपपदाच्च ॥ १६ ॥
१ परस्परोपपदाच्च ।
नेर्विशः ॥ १७ ॥
परिव्यवेभ्यः क्रियः ॥ १८ ॥
विपराभ्यां जेः ॥ १९ ॥
आङो दोऽनास्यविहरणे ॥ २० ॥
१ आङो दोऽव्यसनक्रियस्य ।
२ स्वाङ्गकर्मकाच्च ।
क्रीडोऽनुसंपरिभ्यश्च ॥ २१ ॥
१ समोऽकूजने ।
२ आगमेः क्षमायाम् ।
३ शिक्षेर्जिज्ञासायाम् ।
४ किरतेर्हर्षजीविकाकुलायकरणेषु ।
५ हरतेर्गतताच्छील्ये ।
६ आङि नुप्रच्छ्योः ।
७ आशिषि नाथः ।
८ शप उपलम्भने ।
समवप्रविभ्यः स्थः ॥ २२ ॥
१ आङः स्थः प्रतिज्ञाने ।
प्रकाशनस्थेयाख्ययोश्च ॥ २३ ॥
उदोऽनूर्ध्वकर्मणि ॥ २४ ॥
१ उद ईहायाम् ।
उपान्मन्त्रकरणे ॥ २५ ॥
१ उपाद्देवपूजासंगतकरणयोः[1] ।
२ वा लिप्सायाम् ।
अकर्मकाच्च ॥ २६ ॥
उद्विभ्यां तपः ॥ २७ ॥
१ स्वाङ्गकर्मकाच्च ।
आङो यमहनः ॥ २८ ॥
समो गम्यृच्छिभ्याम् ॥ २९ ॥
१ समो गमादिषु विदिप्रच्छिस्वरतीनामुपसंख्यानम् ।
२ अर्तिश्रुदृशिभ्यश्च ।
३ उपसर्गादस्यत्यूह्योर्वावचनम् ।
निसमुपविभ्यो ह्वः ॥ ३० ॥
स्पर्धायामाङः ॥ ३१ ॥
गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः ॥ ३२ ॥
अधेः प्रसहने ॥ ३३ ॥
वेः शब्दकर्मणः ॥ ३४ ॥
अकर्मकाच्च ॥ ३५ ॥
संमाननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः ॥ ३६ ॥
कर्तृस्थे चाशरीरे कर्मणि ॥ ३७ ॥
वृत्तिसर्गतायनेषु क्रमः ॥ ३८ ॥
उपपराभ्याम् ॥ ३९ ॥
आङ उद्गमने ॥ ४० ॥
१ ज्योतिषामुद्गमने ।
वेः पादविहरणे ॥ ४१ ॥
प्रोपाभ्यां समर्थाभ्याम् ॥ ४२ ॥
अनुपसर्गाद्वा ॥ ४३ ॥
अपह्नवे ज्ञः ॥ ४४ ॥
अकर्मकाच्च ॥ ४५ ॥
संप्रतिभ्यामनाध्याने ॥ ४६ ॥

---

१ प. पुस्तके इतः परमधिकम् । उपसर्गग्रहणम् । २ प. पुस्तके इतः परमधिकम् । °मित्रकरण पृथिव्विति वक्तव्यमित्यपर आह ।

भासनोपसंभाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः ॥ ४७ ॥

व्यक्तवाचां समुच्चारणे ॥ ४८ ॥

अनोरकर्मकात् ॥ ४९ ॥

विभाषा विप्रलापे ॥ ५० ॥

अवाद्ग्रः ॥ ५१ ॥

१ अवाद्ग्रो गिरतेः ।

समः प्रतिज्ञाने ॥ ५२ ॥

उदश्चरः सकर्मकात् ॥ ५३ ॥

समस्तृतीयायुक्तात् ॥ ५४ ॥

दाणश्च सा चेच्चतुर्थ्यर्थे ॥ ५५ ॥

उपाद्यमः स्वकरणे ॥ ५६ ॥

ज्ञाश्रुस्मृदृशां सनः ॥ ५७ ॥

नानोर्ज्ञः ॥ ५८ ॥

१ अनोर्ज्ञः प्रतिषेधे सकर्मकवचनम् ।

२ न वाकर्मकस्योत्तरेण विधानात् ।

३ प्रतिषेधः पूर्वस्य च ।

प्रत्याङ्भ्यां श्रुवः ॥ ५९ ॥

शदेः शितः ॥ ६० ॥

१ शदे शितः परस्मैपदाश्रयत्वादात्मनेपदाभावः ।

२ सिद्धं तु लडादीनामात्मनेपदवचनात् ।

३ उपसर्गपूर्वनियमेऽड्व्यवाय उपसंख्यानम् ।

४ नित्यत्वाल्लादेशस्यात्मनेपदेऽडागम इति चेदटोऽपि नित्यनिमित्तत्वादात्मनेपदाभावः ।

५ तस्मादुपसंख्यानम् ।

म्रियतेर्लुङ्लिङोश्च ॥ ६१ ॥

पूर्ववत्सनः ॥ ६२ ॥

१ पूर्ववत्सन इति शदिम्रियत्यर्थम् ।

२ इतरथा हि ताभ्यां सनन्ताभ्यामात्मनेपदप्रतिषेधः ।

३ पूर्वस्यात्मनेपददर्शनात्सन्नन्तादात्मनेपदभाव इति चेद्रुपादिष्वप्रसिद्धिः ।

४ सिद्धं तु पूर्वस्य लिङ्गातिदेशात् ।

५ कृञादिषु तु लिङ्गप्रतिषेधः ।

६ प्रत्ययग्रहणं णियगर्थम् ।

७ तत्र हेतुमण्णिचः प्रतिषेधः ।

आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य ॥ ६३ ॥

प्रोपाभ्यां युजेरयज्ञपात्रेषु ॥ ६४ ॥

समः क्ष्णुवः ॥ ६५ ॥

१ समः क्ष्णुवः सकर्मकार्थम्[१]।

भुजोऽनवने ॥ ६६ ॥

णेरणौ यत्कर्म णौ चेत्स कर्तानाध्याने[२]

१ णेरात्मनेपदविधानेऽण्यन्तस्य कर्मणस्तत्रोपलब्धिः ।

२ इतरथा हि सर्वप्रसङ्गः ।

३ कर्मकर्तृत्वात्सिद्धमिति चेद्यक्चिणोर्निवृत्त्यर्थं वचनम् ।

४ न वा यक्चिणोः प्रतिषेधात् ।

५ इतरथा हि यत्र नियमस्ततोऽन्यत्र प्रतिषेधः ।

६ आत्मनेपदस्य च ।

---

१ प. पुस्तके इतःपरमधिकम् । स्वराद्युपसृष्टादिति वक्तव्यम् । स्वराद्युन्तोसृष्टादिति वक्तव्यम् । २ प. पुस्तके इतः परमाधिकम् । अनवनकौटिल्ययोरिति वक्तव्यम् ।

७ आत्मनेपदप्रतिषेधार्थं तु ।
८ आत्मनः कर्मत्वे प्रतिषेधः ।
९ न वा ण्यन्तेऽन्यस्य कर्तृत्वात् ।

भीस्म्योर्हेतुभये ॥ ६८ ॥

गृधिवञ्च्योः प्रलम्भने ॥ ६९ ॥

लियः संमाननशालीनीकरणयोश्च ॥७०॥

मिथ्योपपदात्कृञोऽभ्यासे ॥ ७१ ॥

स्वरितञितः कर्त्रभिप्राये क्रियाफले ॥७२॥

अपाद्वदः ॥ ७३ ॥

णिचश्च ॥ ७४ ॥

समुदाङ्भ्यो यमो ऽग्रन्थे ॥ ७५ ॥

अनुपसर्गाज्ज्ञः ॥ ७६ ॥

विभाषोपपदेन प्रतीयमाने ॥ ७७ ॥

शेषात्कर्तरि परस्मैपदम् ॥ ७८ ॥

१ शेषवचनं पञ्चम्या चेदर्थे प्रतिषेधः ।
२ सप्तम्या चेत्प्रकृतेः ।
३ सिद्धं तूभयनिर्देशात् ।
४ कर्तृग्रहणमनुष्यपराद्यर्थम् ।

अनुपराभ्यां कृञः ॥ ७९ ॥

१ परस्मैपदप्रतिषेधात्कृञादिषु विधानम्[१] ।
२ तत्रात्मनेपदप्रतिषेधोऽप्रतिषिद्धत्वात् ।
३ न वा युतादिभ्यो वावचनात् ।
४ आत्मनेपदनियमे वा प्रतिषेधः ।

अभिप्रत्यतिभ्यः क्षिपः ॥ ८० ॥

प्राद्वहः ॥ ८१ ॥

परेर्मृषः ॥८२ ॥

व्याङ्परिभ्यो रमः ॥ ८३ ॥

उपाच्च ॥ ८४ ॥

विभाषाकर्मकात् ॥ ८५ ॥

बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः ॥ ८६ ॥

निगरणचलनार्थेभ्यश्च ॥ ८७ ॥

अणावकर्मकाच्चित्तवत्कर्तृकात् ॥ ८८ ॥

१ अणावकर्मकादिति चुरादिणिचोऽण्यन्तात्परस्मैपदवचनम् ।
२ सिद्धं त्वतसिण्णाविति वचनात् ।

न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः ॥ ८९ ॥

वा क्यषः ॥ ९० ॥

द्युद्भ्यो लुङि ॥ ९१ ॥

वृद्भ्यः स्यसनोः ॥ ९२ ॥

लुटि च क्लृपः ॥ ९३ ॥

१ पादिषु धेट उपसंख्यानम् ।

॥ प्रथमाध्यायस्य तृतीयः पादः ॥

आ कडारादेका संज्ञा ॥ १ ॥

१ अन्यत्र संज्ञासमावेशान्नियमार्थं वचनम् ।
२ तत्रैकसंज्ञाधिकारे तद्वचनम्[२] ।
३ अङ्गसंज्ञया भपदसंज्ञयोरसमावेशः ।
४ कर्मधारयत्वे तत्पुरुषग्रहणम्[३] ।
५ तत्पुरुषत्वे द्विगुचग्रहणम् ।
६ गतिदिवःकर्महेतुमत्सु च ग्रहणम् ।
७ गुरुलघुसंज्ञे नदीघिसंज्ञे ।
८ परस्मैपदसंज्ञा पुरुषसंज्ञा ।
९ परवचने सिति पदं भम् ।

---

१ प. पुस्तके विधानस्य स्थाने वचनमिति । २ प. पुस्तके इतः परमाधिकम् । अदेः प्रतिषेधो वक्तव्यः । ३ प. पुस्तके कर्मधारय तत्पुरुषग्रहणमिति ।

१० गतिबुद्ध्यादीनां ण्यन्तानां कर्म कर्तृसंज्ञम् ।
११ शेषवचनं च घिसंज्ञानिवृत्त्यर्थम् ।
१२ न वा संभवात् ।
१३ ह्रस्वलक्षणा हि नदीसंज्ञा घिसंज्ञायां च गुणः ।
१४ तत्र वचनप्रामाण्यान्नदीसंज्ञायां घिसंज्ञाभावः ।
१५ आश्रयाभावान्नदीसंज्ञायां घिसंज्ञानिवृत्तिरिति चेद्यणादेशाभावः ।
१६ नद्याश्रयत्वाद्यणादेशस्य ह्रस्वस्य नदीसंज्ञाभावः ।
१७ बहुव्रीह्यर्थं[१] तु
१८ प्रयोजनमव्ययीभावोपमानद्विगुकृल्लोपेषु ।
१९ तत्र शेषवचनाद्दोषः संख्या समानाधिकरणनञ्समासेषु बहुव्रीहिप्रतिषेधः ।
२० कृल्लोपे च शेषवचनात्प्रादिभिर्न बहुव्रीहिः[२] ।
२१ एकसंज्ञाधिकारे विप्रतिषेधाद्बहुव्रीहिरिति चेत् क्तार्थे प्रतिषेधः ।
२२ तत्पुरुष इति चेदन्यत्र क्तार्थात्प्रतिषेधः ।
२३ सिद्धं तु प्रादीनां क्तार्थे तत्पुरुषवचनात् ।
२४ प्रयोजनं ह्रस्वसंज्ञां दीर्घप्लुतौ ।
२५ तिङ्सार्वधातुकं लिङ्लिटोरार्धधातुकम् ।
२६ अपत्यं वृद्धं युवा ।
२७ घिं नदी ।
२८ लघु गुरु ।
२९ पदं भम् ।
३० अपादानमुत्तराणि धनुषा विध्यति कंसपात्र्यां भुङ्क्ते गां दोग्धि धनुर्विध्यतीति ।
३१ क्रुधद्रुहोरुपसृष्टयोः कर्म संप्रदानम् ।
३२ करणं पराणि साध्वसिश्छिनत्ति ।
३३ अधिकरणं कर्म गेहं प्रविशति ।
३४ अधिकरणं कर्ता । स्थाली पचति ।
३५ अध्युपसृष्टं कर्म ।
३६ गत्युपसर्गसंज्ञे कर्मप्रवचनीयसंज्ञा ।
३७ परस्मैपदमात्मनेपदम् ।
३८ समाससंज्ञाश्च ।
३९ अर्थवत्प्रातिपदिकम् ।
४० गुणवचनं च[६] ।
४१ समासकृत्तद्धिताव्ययसर्वनामासर्वलिङ्गा जातिः ।
४२ संख्या ।
४३ डु च ।
४४ एकद्रव्योपनिवेशिनी संज्ञा ।

विप्रतिषेधे परं कार्यम् ॥ २ ॥

१ द्वौ प्रसङ्गावन्यार्थावेकस्मिन्स विप्रतिषेधः
२ एकस्मिन्युगपदसंभवात्पूर्वपरप्राप्तेरुभयप्रसङ्गः ।
३ तृजादिभिस्तुल्यम् ।
४ अनवयवप्रसङ्गात्प्रतिपदं विधेश्च ।

१ प. पुस्तकेइतः परमधिकम् । एक संज्ञाधिकारे विप्रतिषेधाद्बहुव्रीहिः । २-५ प. पुस्तके इतः नास्ति।
६ प. पुस्तके च स्थाने चिति ।

५ अप्रतिपत्तिर्वोभयोर्तुल्यबलत्वात् ।
६ तत्र प्रतिपत्त्यर्थं वचनम् ।
७ तव्यदादीनां त्वप्रसिद्धिः ।
८ अन्तरङ्गं च ।
९ प्रयोजनं यणेकादेशेत्त्वोत्त्वानि गुणवृद्धिद्विर्वचनाल्लोपस्वरेभ्यः ।
१० इण्ङिशीनामाद्गुणः सवर्णदीर्घत्वात् ।
११ न वा सवर्णदीर्घत्वस्यानवकाशत्वात् ।
१२ ऊङापोरेकादेश ईत्वलोपाभ्याम् ।
१३ आत्वनपुंसकोपसर्जनह्रस्वत्वान्ययवायावेकादेशतुग्विधिभ्यः ।
१४ तुम्यणेकादेशगुणवृद्ध्यौत्त्वदीर्घत्वेत्वमुमेत्त्वरीविधिभ्यः ।
१५ इयङादेशो गुणात् ।
१६ श्वेः संप्रसारणपूर्वत्वं यणादेशात् ।
१७ ह्व आकारलोपात् ।
१८ स्वरो लोपात् ।
१९ प्रत्ययविधिरेकादेशात् ।
२० लादेशो वर्णविधेः ।
२१ तत्पुरुषान्तोदात्तत्वं पूर्वपदप्रकृतिस्वरात् ।
२२ तस्य दोषः पूर्वपदोत्तरपदयोर्वृद्धिस्वरावेकादेशात् ।
२३ यणादेशादियुवौ ।
२४ उसि पररूपाच्च ।
२५ लुग्लोपयणयवायावेकादेशेभ्यः ।

यू स्त्र्याख्यौ नदी ॥ ३ ॥

१ नदीसंज्ञायामाख्याग्रहणं स्त्रीविषयत्वार्थम् ।
२ प्रथमलिङ्गग्रहणं च ।
३ प्रयोजनं किब्लुप्समासाः ।
४ अवयवस्त्रीविषयत्वात्सिद्धमिति चेदियङुवङ्स्थानप्रतिषेधे यण्स्थानप्रतिषेधप्रसङ्गोऽवयस्येयङुवङ्स्थानत्वात् ।
५ सिद्धं त्वङ्गरूपग्रहणाद्यस्याङ्गस्येयुवौ तत्प्रतिषेधात् ।
६ ह्रस्वे युग्स्थानप्रवृत्तौ च स्त्रीवचने ।

नेयङुवङ्स्थानावस्त्री ॥ ४ ॥

वामि ॥ ५ ॥

ङिति ह्रस्वश्च ॥ ६ ॥

शेषो घ्यसखि ॥ ७ ॥

पतिः समास एव ॥ ८ ॥

षष्ठीयुक्तश्छन्दसि वा ॥ ९ ॥

ह्रस्वं लघु ॥ १० ॥

संयोगे गुरु ॥ ११ ॥

दीर्घं च ॥ १२ ॥

यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् ।

१ अङ्गसंज्ञायां तदादिवचनं स्यादिनुमर्थम् ।
२ मित्सुटोरुपसंख्यानम् ।
३ सिद्धं तु तदाद्यादिवचनात् ।
४ तदेकदेशविज्ञानाद्वा सिद्धम् ।
५ प्रत्ययग्रहणं पदादावप्रसङ्गार्थम् ।
६ परिमाणार्थं च ।

१ प. पुस्तके इतः परमधिकम् ।अनङानङ्भ्यां चेति वक्तव्यम् । २ प. पुस्तके इतः परमधिकम् उवङादेशश्चेति वक्तव्यम् । ३ प. पुस्तके इतः परमधिकम् । यणादेशाच्चेति वक्तव्यम् । ४ प. पुस्तके इतः परमधिकम् । अवयवस्त्रीविषयत्वात्सिद्धम् ।

७ सिद्धं तु प्रत्ययग्रहणे यस्मात्स तदादितदन्तविज्ञानात् ।

८ प्रयोजनं धातुप्रातिपदिकप्रत्ययसमासतद्धितविधिस्वराः ।

९ कृद्ग्रहणे गतिकारकपूर्वस्यापि ।

१० प्रयोजनं समासतद्धितविधिस्वराः ।

सुप्तिङन्तं पदम् ॥ १४ ॥

१ पदसंज्ञायामन्तवचनमन्यत्र संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिप्रतिषेधार्थम् ।

नः क्ये ॥ १५ ॥

सिति च ॥ १६ ॥

स्वादिष्वसर्वनामस्थाने[1] ॥ १७ ॥

यचि भम् ॥ १८ ॥

१ भसंज्ञायामुत्तरपदलोपे षषः प्रतिषेधः ।

२ सिद्धमचः स्थानिवत्त्वात् ।

३ नभोऽङ्गिरोमनुषां वत्युपसंख्यानम् ।

४ वृषण्वस्वश्वयोः ।

तसौ मत्वर्थे ॥ १९ ॥

अयस्मयादीनि च्छन्दसि[2] ॥ २० ॥

बहुषु बहुवचनम् ॥ २१ ॥

१ सुप्तिङामविशेषविधानाद्दृष्टविप्रयोगत्वाच्च नियमार्थं वचनम् ।

२ तत्र प्रत्ययानियमेऽव्ययानां पदसंज्ञाभावोऽसुबन्तत्वात् ।

राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः ॥ ११४ ॥

१ सूर्यरुच्याव्यथ्याः कर्तरि ।

२ कुप्यं संज्ञायाम् ।

३ कृष्टपच्यस्यान्तोदात्तत्वं च कर्मकर्तरि च ।

---

१ अत्र काशिकायां 'कृत्याः प्राङ्ण्वुलः' इति पाठः । परं स महाभाष्यासंमत इति न गृहीतः वै. पुस्तके तु काशिकावदुपलभ्यते । २ प. पुस्तके तकिशसिचतिजनि° इत्यधिकम् । ३ प. पुस्तके नास्ति । ४ प. पुस्तके इतः परमधिकम् । शासिदुहिगुहिभ्यो वेति वक्तव्यमिति काशिका । ५ प. पुस्तके इतः परमधिकम् । संज्ञायां पुंसि दृष्टत्वान्न ते भार्या प्रसिद्ध्यति । स्त्रियां भावाधिकारोऽस्ति तेन भार्या प्रसिध्यति । अथवा बहुलं कृत्याः संज्ञायामिति तत्स्मृतम् । यथा यत्यं यथा जन्यं यथा भित्तिस्तथैव सा ।

भिद्योद्ध्यौ नदे ॥ ११५ ॥

पुष्यसिध्यौ नक्षत्रे ॥ ११६ ॥

विपूयविनीयजित्या मुञ्जकल्कहलिषु ॥ ११७ ॥

प्रत्यपिभ्यां ग्रहेश्छन्दसि ॥ ११८ ॥

१ [1]प्रत्यपिभ्यां ग्रहेश्छन्दसि ।

पदास्वैरिबाह्यापक्ष्येषु च ॥ ११९ ॥

विभाषा कृवृषोः ॥ १२० ॥

युग्यं च पत्रे ॥ १२१ ॥

अमावस्यदन्यतरस्याम् ॥ १२२ ॥

छन्दसि निष्टर्क्यदेवहूयप्रणीयोन्नीयोच्छिष्यमर्यस्तर्याध्वर्यखन्यखान्यदेवयज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्यभाव्यस्ताव्योपचाय्यपृडानि ॥ १२३ ॥

ऋहलोर्ण्यत् ॥ १२४ ॥

१ पाणौ सृजेर्ण्यद्विधिः ।

२ समवपूर्वाच्च ।

३ लपिदभिभ्यां च ।

ओरावश्यके ॥ १२५ ॥

१ आवश्यक उपपद इति चेद्द्योत्य उपसंख्यानम् ।

२ द्योत्य इति चेत्स्वरसमासानुपपत्तिः ।

३ ओरावश्यके ण्यतः स्तौतेः क्यप्पूर्वविप्रतिषिद्धम् ।

आसुयुवपिरपिलपित्रपिचमश्च ॥ १२६ ॥

आनाय्योऽनित्ये ॥ १२७ ॥

प्रणाय्योऽसंमतौ ॥ १२८ ॥

पाय्यसांनाय्यनिकाय्यधाय्या मानहविर्निवाससामिधेनीषु ॥ १२९ ॥

१ पाय्यनिकाय्योरादिपत्वकत्वनिपातनम् ।

क्रतौ कुण्डपाय्यसंचाय्यौ ॥ १३० ॥

१ कुण्डपाय्ये यद्विधिः ।

अग्नौ परिचाय्योपचाय्यसमूह्याः ॥ १३१ ॥

१ समूह्य इत्यनर्थकं वचनं सामान्येन कृतत्वात् ।

२ वह्यर्थमिति चेदूहेस्तदर्थत्वात्सिद्धम् ।

३ ऊहिविग्रहाच्च ब्राह्मणे सिद्धम् ।

चित्याग्निचित्ये च ॥ १३२ ॥

१ अग्निचित्या भावेऽन्तोदात्तः[3] ।

ण्वुल्तृचौ ॥ १३३ ॥

१ ण्वुलि सकर्मकग्रहणम् ।

२ न वा धातुमात्राद्दर्शनाण्ण्वुलः ।

३ तृजादिषु वर्तमानकालोपदानमध्यायकवेदाध्यायाद्यर्थम् ।

४ न वा कालमात्रे दर्शनादन्येषाम् ।

नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः ॥ १३४ ॥

१ अजपि सर्वधातुभ्यः ।

२ पचाद्यनुक्रमणमनुबन्धासञ्जनार्थमपवादबाधनार्थं च ।

इगुपधज्ञाप्रीकिरः कः ॥ १३५ ॥

१ इगुपधेभ्य उपसर्गे कविधिर्मेषाद्यर्थः ।

२ न वा बुधादीनां दर्शनादनुपसर्गेऽपि ।

आतश्चोपसर्गे ॥ १३६ ॥

पाघ्राध्माधेट्दृशः शः ॥ १३७ ॥

---

१ प. पुस्तके इत्यधिकम् । हिरण्य इति वक्तव्यम् । २ प. पुस्तके इतः परमधिकम् । दाक्षिणाग्नाविति वक्तव्यम् । ३ प. पुस्तके 'भावे' इति नास्ति ।

१ जिघ्रः संज्ञायां प्रतिषेधः ।

अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च ॥ १३८ ॥

१ अनुपसर्गान्नौ लिम्पेः ।

२ गवि च विन्देः संज्ञायाम् ।

ददातिदधात्योर्विभाषा ॥ १३९ ॥

ज्वलितिकसन्तेभ्यो णः ॥ १४० ॥

१ तनोतेर्ण उपसंख्यानम् ।

श्याद्व्यधास्रुसंस्र्वतीणवसावहृलिहश्लिषश्वसश्च ॥ १४१ ॥

दुन्योरनुपसर्गे ॥ १४२ ॥

विभाषा ग्रहः ॥ १४३ ॥

गेहे कः ॥ १४४ ॥

शिल्पिनि ष्वुन् ॥ १४५ ॥

गस्थकन् ॥ १४६ ॥

ण्युट् च ॥ १४७ ॥

हश्च व्रीहिकालयोः ॥ १४८ ॥

प्रुसृल्वः समभिहारे वुन् ॥ १४९ ॥

१ प्रुसृल्वः साधुकारिणि वुन्विधानम् ।

आशिषि च ॥ १५० ॥

॥ इति तृतीयाध्यायस्य प्रथमः पादः ॥

कर्मण्यण्[1] **॥ १ ॥**

१ कर्मणि निर्वर्त्यमानविक्रियमाणे चेद्वेदाध्यायादीनामुपसंख्यानम् ।

२ यत्र च नियुक्तः ।

३ ह्वाग्रहिनीवहिभ्यश्च ।

४ अपरिगणनं वा ।

५ अनभिधानात् ।

६ अकारादनुपपदात्कर्मोपपदो विप्रतिषेधेन

७ शीलिकामिभक्ष्याचरिभ्यो णः पूर्वपदप्रकृतिस्वरत्वं च ।

८ ईक्षिक्षमिभ्यां च[2] ।

९ अन्नदायेति च कृतां व्यत्ययश्छन्दसि ।

ह्वावामश्च ॥ २ ॥

आतोऽनुपसर्गे कः ॥३॥

१ कविधौ सर्वत्र प्रसारणिभ्यो डः ।

२ के हि संप्रसारणप्रसङ्गः ।

सुपि स्थः ॥ ४ ॥

१ सुपि स्थो भावे च ।

२ योगविभागात्सिद्धम् ।

तुन्दशोकयोः परिमृजापनुदोः ॥ ५ ॥

१ तुन्दशोकयोः परिमृजापनुदोरालस्यसुखाहरणयोः ।

२ कप्रकरणे मूलविभुजादिभ्य उपसंख्यानम् ।

प्रे दाज्ञः ॥ ६ ॥

समि ख्यः ॥ ७ ॥

गापोष्टक् ॥ ८ ॥

१ सुरासाध्वोः पिबतेः ।

२ बहुलं तणि ।

हरतेरनुद्यमनेऽच् ॥ ९ ॥

१ अच्प्रकरणे शक्तिलाङ्गलाङ्कुशयष्टितोमरघटघटीधनुःषु ग्रहेरुपसंख्यानम् ।

---

१ प. पुस्तके इतः परमधिकम् । नृतिखनिरञ्जिभ्य इति वक्तव्यम् । २ प. पुस्तके इतः परमधिकम् । कर्मणि निर्वर्त्यमानविक्रियमाण इति वक्तव्यम् । ३ प. पुस्तके इतः परमधिकम् । न त्वम्भोऽभिगमा ।

२ सूत्रे च धार्यर्थे।

वयसि च ॥ १० ॥

आङि ताच्छील्ये ॥ ११ ॥

अर्हः ॥ १२ ॥

स्तम्बकर्णयो रमिजपोः ॥ १३ ॥

१ स्तम्बकर्णयोर्हस्तिसूचकयोः।

शमि धातोः संज्ञायाम् ॥ १४ ॥

१ शमि संज्ञायां धातुग्रहणं कृञो हेत्वादिषु टप्रतिषेधार्थम्।

अधिकरणे शेतेः ॥ १५ ॥

१ अधिकरणे शेतेः पार्श्वादिषूपसंख्यानम्।

२ दिग्धसहपूर्वाच्च।

३ उत्तानादिषु कर्तृषु।

४ गिरौ डश्छन्दसि।

५ तद्धितो वा।

चरेष्टः ॥ १६ ॥

१ चरेर्भिक्षाग्रहणं ज्ञापकं कर्मण्यप्रसङ्गस्य।

भिक्षासेनादायेषु च ॥ १७ ॥

पुरोऽग्रतोऽग्रेषु सर्तेः ॥ १८ ॥

पूर्वे कर्तरि ॥ १९ ॥

कृञो हेतुताच्छील्यानुलोम्येषु ॥ २० ॥

दिवाविभानिशाप्रभाभास्कारान्तानन्तादिबहुनान्दीकिंलिपिलिबिबलिभक्तिकर्तृचित्रक्षेत्रसंख्याजङ्घाबाह्वहर्यत्तद्धनुररुःषु ॥ २१ ॥

१ किंयत्तद्बहुषु कृञोऽज्विधानम्।

कर्मणि भृतौ ॥ २२ ॥

न शब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदेषु ॥ २३ ॥

स्तम्बशकृतोरिन् ॥ २४ ॥

१ स्तम्बशकृतोर्व्रीहिवत्सयोः।

हरतेर्दृतिनाथयोः पशौ ॥ २५ ॥

फलेग्रहिरात्मंभरिश्च ॥ २६ ॥

१ भृञः कुक्ष्यात्मनोर्मुम्च।

छन्दसि वनसनरक्षिमथाम् ॥ २७ ॥

एजेः खश् ॥ २८ ॥

१ खश्प्रकरणे वातशुनीतिलशर्धेष्वजधेट्तुदजहातिभ्यः।

नासिकास्तनयोर्ध्माधेटोः ॥ २९ ॥

१ स्तने धेटः।

२ [1]मुष्टौ ध्मश्च।

नाडीमुष्ट्योश्च ॥ ३० ॥

उदि कूले रुजिवहोः ॥ ३१ ॥

वहाभ्रे लिहः ॥ ३२ ॥

परिमाणे पचः ॥ ३३ ॥

मितनखे च ॥ ३४ ॥

विध्वरुषोस्तुदः ॥ ३५ ॥

असूर्यललाटयोर्दृशितपोः ॥ ३६ ॥

उग्रंपश्येरंमदपाणिंधमाश्च ॥ ३७ ॥

प्रियवशे वदः खच् ॥ ३८ ॥

१ खच्प्रकरणे गमेः सुप्युपसंख्यानम्।

२ विहायसो विह च।

३ खच्च डिद्वा।

४ डे च[3]।

१ प. पुस्तके इतः परमधिकम्। नासिकायां ध्मश्च धेटश्च। नासिकानाडीमुष्टिघटीखारीष्विति वक्तव्यम्। २ प. पुस्तके इदं नास्ति। ३ प. पुस्तके इतः परमधिकम्। गमे च डोरिति काशिका।

द्विषत्परयोस्तापेः ॥ ३९ ॥
वाचि यमो व्रते ॥ ४० ॥
पूःसर्वयोर्दारिसहोः ॥ ४१ ॥
सर्वकूलाभ्रकरीषेषु कषः ॥ ४२ ॥
मेघर्तिभयेषु कृञः ॥ ४३ ॥
क्षेमप्रियमद्रे ऽण् च ॥ ४४ ॥
आशिते भुवः करणभावयोः ॥ ४५ ॥
संज्ञायां भृतॄवृजिधारिसहितपिदमः ॥ ४६ ॥
गमश्च ॥ ४७ ॥
अन्तात्यन्ताध्वदूरपारसर्वानन्तेषु डः ॥ ४८ ॥

१ डपकरणे सर्वत्रपन्नयोरुपसंख्यानम् ।
२ उरसो लोपश्च ।
३ सुदुरोरधिकरणे ।
४ निसो देशे[1] ।

आशिषि हनः ॥ ४९ ॥

१ दारावाहनोऽणन्त्यस्य च टः संज्ञायाम् ।
२ चारौ वा ।
३ कर्मणि समि च ।

अपे क्लेशतमसोः ॥ ५० ॥
कुमारशीर्षयोर्णिनिः ॥ ५१ ॥
लक्षणे जायापत्योष्टक् ॥ ५२ ॥
अमनुष्यकर्तृके च ॥ ५३ ॥
शक्तौ हस्तिकपाटयोः ॥ ५४ ॥
पाणिघताडघौ शिल्पिनि ॥ ५५ ॥

१ राजघ उपसंख्यानम् ।

आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन् ॥ ५६ ॥

१ ख्युनि च्विप्रतिषेधानर्थक्यं ल्युट्ख्युनोरविशेषात् ।
२ मुमर्थमिति चेन्नाव्ययत्वात् ।
३ उत्तरार्थं तु ।

कर्तरि भुवः खिष्णुच्खुकञौ[2] ॥ ५७ ॥
स्पृशो ऽनुदके क्विन् ॥ ५८ ॥
ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च ॥ ५९ ॥

१ धृषेर्द्विर्वचनमन्तोदात्तत्वं च ।

त्यदादिषु दृशो ऽनालोचने कञ् च ॥ ६० ॥

१ दृशेः समानान्ययोश्चोपसंख्यानम्[3] ।
२ कृदर्थानुपपत्तिस्तु ।
३ इवार्थे तु तद्धितः ।

सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गे ऽपि क्विप् ॥ ६१ ॥

१ सदादिषु सुब्ग्रहणम् ।

भजो ण्विः ॥ ६२ ॥
छन्दसि सहः ॥ ६३ ॥
वहश्च ॥ ६४ ॥
काव्यपुरीषपुरीष्येषु ञ्युट् ॥ ६५ ॥
हव्ये ऽनन्तःपादम् ॥ ६६ ॥
जनसनखनक्रमगमो विट् ॥ ६७ ॥
अदो ऽनन्ने ॥ ६८ ॥
क्रव्ये च ॥ ६९ ॥

---

१ प. पुस्तके इतः परमधिकम् । अन्येष्वपि दृश्यते । २ प. पुस्तके इतः परमधिकम् । इष्णुच इकारादित्वमुदात्तत्वात्कृतं भुवः । मन्मस्तु स्वरसिद्धयर्थमिकारादित्वमिष्णुचः । ३ प. पुस्तके इतः परमधिकम् दृशेः क्सो वक्तव्यः इति काशिका ।

१ अचोऽनन्ते कृत्येग्रहणं वासरूपनिवृत्त्यर्थम् ।

दुहः कब्घश्च ॥ ७० ॥

मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन् ७१

१ श्वेतवहादीनां डस् ।

२ पदस्य च ।

३ वैर्थम् ।

अवे यजः ॥ ७२ ॥

विजुपे छन्दसि ॥ ७३ ॥

आतो मनिन्क्वनिब्वनिपश्च ॥ ७४ ॥

अन्येभ्यो ऽपि दृश्यन्ते ॥ ७५ ॥

क्विप् च ॥ ७६ ॥

स्थः क च ॥ ७७ ॥

सुप्यजातौ णिनिस्ताच्छील्ये ॥ ७८ ॥

१ णिन्विधौ साधुकारिण्युपसंख्यानम् ।

२ ब्रह्मणिः वदः ।

कर्तर्युपमाने ॥ ७९ ॥

व्रते ॥ ८० ॥

बहुलमाभीक्ष्ण्ये ॥ ८१ ॥

मनः ॥ ८२ ॥

आत्ममाने खश्च ॥ ८३ ॥

१ कर्मकर्तरि च ।

भूते ॥ ८४ ॥

१ निष्ठायामितरेतराश्रयत्वादप्रसिद्धिः ।

२ अव्ययनिर्देशात्सिद्धम् ।

३ न वा तद्विधानस्यान्यत्राभावात् ।

४ भूताधिकारस्य प्रयोजनं कुमारघाती शीर्षघाती आखुहा बिडालः सुत्वानः सुन्वन्तः सुषुपुषोऽन्नेद्य अग्निमादधानस्य ।

करणे यजः ॥ ८५ ॥

कर्मणि हनः ॥ ८६ ॥

ब्रह्मभ्रूणवृत्रेषु क्विप् ॥ ८७ ॥

१ ब्रह्मादिषु हन्तेः क्विब्वचनं नियमार्थम् ।

२ तथा चोत्तरस्य वचनार्थः ।

बहुलं छन्दसि ॥ ८८ ॥

सुकर्मपापमन्त्रपुण्येषु कृञः ॥ ८९ ॥

सोमे सुञः ॥ ९० ॥

अग्नौ चेः ॥ ९१ ॥

कर्मण्यग्न्याख्यायाम् ॥ ९२ ॥

कर्मणीनिर्विक्रियः ॥ ९३ ॥

१ कर्मणि कुत्सिते ।

दृशेः क्वनिप् ॥ ९४ ॥

राजनि युधिकृञः ॥ ९५ ॥

सहे च ॥ ९६ ॥

सप्तम्यां जनेर्डः ॥ ९७ ॥

पञ्चम्यामजातौ ॥ ९८ ॥

उपसर्गे च संज्ञायाम् ॥ ९९ ॥

अनौ कर्मणि ॥ १०० ॥

अन्येष्वपि दृश्यते ॥ १०१ ॥

निष्ठा ॥ १०२ ॥

१ निष्ठायामितरेतराश्रयत्वादप्रसिद्धिः ।

२ द्विर्वा क्तक्तवतुग्रहणम् ।

३ आदिकर्मणि निष्ठा ।

४ यद्वा भवन्त्यर्थे ।

५ न्याय्या त्वाद्यपवर्गात् ।

६ वा चाद्यतन्याम् ।

१ प. पुस्तके इतः परमधिकम् । अन्येभ्योऽपि दृश्यते ।

सुयजोर्ङ्वनिप् ॥ १०३ ॥

जीर्यतेरतृन् ॥ १०४ ॥

छन्दसि लिट् ॥ १०५ ॥

लिटः कानज्वा ॥ १०६ ॥

क्वसुश्च ॥ १०७ ॥

१ कानच्क्वसोर्वावचनं छन्दसि तिङो दर्शनात् ।

२ न वानेन विहितस्यादेशवचनात् ।

३ कित्करणं संयोगान्तार्थम् ।

४ ऋकारान्तगुणप्रतिषेधार्थं वा ।

भाषायां सदवसश्रुवः ॥ १०८ ॥

१ भाषायां सदादिभ्यो वा लिट् ।

२ तद्विषये लुङोऽनिवृत्त्यर्थम् ।

३ अनद्यतनपरोक्षयोश्च ।

४ अपवादविप्रतिषेधाद्धि तयोर्भावः ।

५ तस्य क्वसुरपरोक्षे नित्यम् ।

उपेयिवाननाश्वाननूचानश्च ॥ १०९ ॥

१ उपेयुषि निपातनमिडर्थमिति चेदजादावतिप्रसङ्गः ।

२ एकादिष्टस्येड्भावार्थं तु ।

३ व्यञ्जने यणादेशार्थं वा ।

४ अनूचानः कर्तरि ।

लुङ् ॥ ११० ॥

१ लुङ्लटोरपवादप्रसङ्गो भूतभविष्यतोरविशेषवचनात् ।

२ न वापवादस्य निमित्ताभावादनद्यतने हि तयोर्विधानम् ।

३ वसेर्लुङ् रात्रिशेषे ।

४ जागरणसंततौ ।

अनद्यतने लङ् ॥ १११ ॥

१ अनद्यतन इति बहुव्रीहिनिर्देशोऽद्य ह्योऽभुक्ष्महीति ।

२ परोक्षे च लोकविज्ञाते प्रयोक्तुर्दर्शनविषये ।

अभिज्ञावचने लृट् ॥ ११२ ॥

न यदि ॥ ११३ ॥

विभाषा साकाङ्क्षे ॥ ११४ ॥

१ विभाषा साकाङ्क्षे सर्वत्र ।

परोक्षे[3] लिट् ॥ ११५ ॥

१ परोक्षे लिडत्यन्तापह्नवे च ।

हशश्वतोर्लङ् च ॥ ११६ ॥

प्रश्ने चासन्नकाले ॥ ११७ ॥

लट् स्मे ॥ ११८ ॥

१ स्मपुरा भूतमात्रे न स्मपुराद्यतने ।

अपरोऽक्षे च ॥ ११९ ॥

ननौ पृष्टप्रतिवचने ॥ १२० ॥

१ ननौ पृष्टप्रतिवचन इत्यशिष्यं क्रियासमाप्तेर्विवक्षितत्वात् ।

नन्वोर्विभाषा ॥ १२१ ॥

पुरि लुङ् चास्मे ॥ १२२ ॥

---

१ प. पुस्तके इतः परमधिकम् । उपेयुषि निपातनमिडर्थम् । २ प. पुस्तके इतः परमधिकम् । नोपेयिवान्निपात्यो द्विर्वचनादिडभविष्यति परत्वात् । अन्येषामेकाचां द्विर्वचनं नित्यमित्याहुः अस्य पुनरिट् च नित्यो द्विर्वचनं च न विहन्यते ह्यस्य । द्विर्वचने चैकाच्त्वात् । तस्मादिड् बाधते द्वित्वम् । ३ प. पुस्तके इतः परमधिकम् । परोभवः परस्याक्षे परोक्षे लिटि दृश्यताम् । उत्वं वादेः परादक्ष्णः सिद्धं वास्मान्निपातनात् ।

१ हशश्वद्युगां पुरा ।

२ स्मः सर्वेभ्यो विप्रतिषेधेन ।

वर्तमाने लट् ॥ १२३ ॥

१ प्रवृत्तस्याविरामे शिष्या भवन्त्यवर्तमानत्वात् ।

२ नित्यप्रवृत्ते च कालाविभागात् ।

३ न्याय्या त्वारम्भानपवर्गात् ।

४ अस्तिं च मुक्तसंशये विरामः ।

५ सन्ति च कालविभागाः ।

लटः शतृशानचावप्रथमासमानाधिकरणे ॥ १२४ ॥

१ लस्याप्रथमासमानाधिकरणेनायोगादादेशानुपपत्तिर्यथान्यत्र ।

२ योग इति चेदन्यत्रापि योगः स्यात् ।

३ लटः शतृशानचावप्रथमासमानाधिकरण इति चेत्प्रत्ययोत्तरपदयोरुपसंख्यानम् ।

४ प्रथमाप्रतिषेध उत्तरपद आदेशानुपपत्तिः।

५ सिद्धं तु प्रत्ययोत्तरपदयोश्चेति वचनात् ।

६ तत्र प्रत्ययस्यादेशनिमित्तत्वादप्रसिद्धिः ।

७ उत्तरपदस्य च सुबन्तनिमित्तत्वाच्छतृशानचोरप्रसिद्धिः ।

८ न वा लकारस्य कृत्त्वात्प्रातिपदिकत्वं तदाश्रयं प्रत्ययविधानम् ।

९ तिङादेशात्सुबुत्पत्तिः ।

१० तस्मादुत्तरपदप्रसिद्धिः ।

संबोधने च ॥ १२५ ॥

लक्षणहेत्वोः क्रियायाः ॥ १२६ ॥

१ लक्षणहेत्वोः क्रियाया गुण उपसंख्यानम्।

२ कर्तुश्च लक्षणयोः पर्यायेणाचयोगे ।

३ तत्त्वाख्याने च ।

४ सदादयश्च बहुलम् ।

५ इङ्जुहोत्योर्वावचनम् ।

६ माङ्याक्रोशे ।

तौ सत् ॥ १२७ ॥

१ तौ सदिति वचनमसंसगार्थम् ।

२ उत्तरयोर्लादेशे वावचनम् ।

३ साधनाभिधानम् ।

४ स्वरः ।

५ उपग्रहप्रतिषेधश्च ।

६ अलादेशे षष्ठीप्रतिषेधः ।

७ द्विषः शतुर्वावचनम् ।

पूङ्यजोः शानन् ॥ १२८ ॥

ताच्छील्यवयोवचनशक्तिषु चानश् ॥ १२९ ॥

इङ्धार्योः शत्रकृच्छ्रिणि ॥ १३० ॥

द्विषोऽमित्रे ॥ १३१ ॥

सुञो यज्ञसंयोगे ॥ १३२ ॥

अर्हः प्रशंसायाम् ॥ १३३ ॥

आ क्वेस्तच्छीलतद्धर्मतत्साधुकारिषु ॥ १३४ ॥

तृन् ॥ १३५ ॥

१ तृन्विधावृत्विक्षु चानुपसर्गस्य ।

२ नयतेः षुक्च ।

---

१ प. पुस्तके इतः परं नास्ति । २ प. पुस्तके इतः परमधिकम् । अवधारणं लटि विधानम्। योगविभागतश्च विहितं सत् ।

३ न वा धात्वन्यत्वात् ।

४ नेषत्तु नेष्टादिति दर्शनात् ।

५ त्विषेर्देवतायामकारश्चोपधाया अनिट्-त्वं च।

६ क्षदेश्च युक्ते ।

७ छन्दसि तृच्च ।

अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मद-रुच्यपत्रपवृतुवृधुसहचर इष्णुच् ॥१३६॥

णेश्छन्दसि ॥ १३७ ॥

भुवश्च ॥ १३८ ॥

ग्लाजिस्थश्च क्स्नुः ॥ १३९ ॥

१ स्थोः कित्त्वे स्थ ईकारप्रतिषेधः ।[1]

२ अकिति गुणप्रतिषेधः ।

३ भुव इट्प्रतिषेधश्च ।

४ स्थादंशिभ्यां स्नुश्छन्दसि[2] ।

त्रसिगृधिधृषिक्षिपेः क्नुः ॥ १४० ॥

शमित्यष्टाभ्यो घिनुण् ॥ १४१ ॥

१ घिनुणकर्मकाणाम् ।

२ उक्तं[2] वा ।

संपृचानुरुधाङ्यमाङ्यसपरिसृसंसृजप-रिदेविसंज्वरपरिक्षिपपरिरटपरिवदपरि-दहपरिमुहदुषद्विषद्रुहदुहयुजाक्रीडविवि-चत्यजरजभजातिचरापचरामुषाभ्याह-नश्च ॥ १४२ ॥

वौ कषलसकत्थस्रम्भः ॥ १४३ ॥

अपे च लषः ॥ १४४ ॥

प्रे लपसृद्रुमथवदवसः ॥ १४५ ॥

निन्दहिंसक्लिशखादविनाशपरिक्षिप-परिरटपरिवादिव्याभाषासूयो वुञ् ॥

१ वुञमनेकाचः ।

२ निन्दादिभ्यो वुञ्वचनमन्येभ्यो ण्वुलः प्रतिषेधार्थम् ।

३ तृजादिप्रतिषेधार्थं वैके ।

देविक्रुशोश्चोपसर्गे ॥ १४७ ॥

चलनशब्दार्थादकर्मकाद्युच् ॥ १४८ ॥

अनुदात्तेतश्च हलादेः ॥ १४९ ॥

जुचङ्क्रम्यदन्द्रम्यसृगृधिज्वलशुचलष-पतपदः ॥ १५० ॥

१ पदिग्रहणमनर्थकमनुदात्तेतश्च हलादे-रिति सिद्धत्वात् ।

२ असरूपनिवृत्त्यर्थं तु ।

क्रुधमण्डार्थेभ्यश्च ॥ १५१ ॥

न यः ॥ १५२ ॥

सूददीपदीक्षश्च ॥ १५३ ॥

लषपतपदस्थाभूवृषहनकमगमशॄभ्य उ-कञ् ॥ १५४ ॥

जल्पभिक्षकुट्टलुण्टवृङः षाकन् ॥ १५५

प्रजोरिनिः ॥ १५६ ॥

जिदृक्षिविश्रीण्वमाव्यथाभ्यमपरिभूप्र-सूभ्यश्च ॥ १५७ ॥

स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच् ॥ १५८ ॥

१ आलुचि शीङ्ग्रहणम् ।

दाधेट्सिशदसदो रुः ॥ १५९ ॥

१ प. पुस्तके इतः परमधिकम् । स्थोर्गित्वान्न स्थ ईकारः । क्ङितोरीत्त्वशासनात् । गुणाभावस्त्रिषु स्मार्यः श्रुकोऽनिट्त्वं गकोरितोः । २ इदं प. पुस्तके नास्ति ।

सृघस्यदः क्मरच् ॥ १६० ॥
भञ्जभासमिदो घुरच् ॥ १६१ ॥
विदिभिदिच्छिदेः कुरच् ॥ १६२ ॥
इण्नशजिसर्तिभ्यः क्वरप् ॥ १६३ ॥
गत्वरश्च ॥ १६४ ॥
जागरूकः ॥ १६५ ॥
यजजपदशां यङः ॥ १६६ ॥
नमिकम्पिस्म्यजसकमहिंसदीपो रः ॥ १६७ ॥
सनाशंसभिक्ष उः ॥ १६८ ॥
विन्दुरिच्छुः ॥ १६९ ॥
क्याच्छन्दसि ॥ १७० ॥
आदृगमहनजनः किकिनौ लिट् च ॥ १७१ ॥

१ किकिनोः कित्वमृकारगुणप्रतिषेधार्थम् ।
२ उत्सर्गश्छन्दसि सदादिभ्यो दर्शनात् ।
३ भाषायां धाञ्कृसृजनिनमिभ्यः ।
४ सासहिवावहिचाचलिपापतीनां निपातनम् ।

स्वपितृषोर्नजिङ् ॥ १७२ ॥
शॄवन्द्योरारुः ॥ १७३ ॥
भियः क्रुक्लुकनौ[1] ॥ १७४ ॥
स्थेशभासपिसकसो वरच् ॥ १७५ ॥
यश्च यङः ॥ १७६ ॥
भ्राजभासधुर्विद्युतोर्जिपॄजुग्रावस्तुवः क्विप् ॥ १७७ ॥
अन्येभ्योऽपि दृश्यते ॥ १७८ ॥

१ क्विब्वचिरनुपपदार्थः ।
२ वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घश्च ।
३ द्युतिगमिजुहोतीनां द्वे च[3] ।
४ ध्यायतेः संप्रसारणं च ।

भुवः संज्ञान्तरयोः ॥ १७९ ॥
विप्रसम्भ्यो ड्वसंज्ञायाम्[4] ॥ १८० ॥
धः कर्मणि ष्ट्रन् ॥ १८१ ॥
दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे ॥ १८२ ॥
हलसूकरयोः पुवः ॥ १८३ ॥
अर्तिलूधूसूखनसहचर इत्रः ॥ १८४ ॥
पुवः संज्ञायाम् ॥ १८५ ॥
कर्तरि चर्षिदेवतयोः ॥ १८६ ॥
ञीतः क्तः ॥ १८७ ॥
मतिबुद्धिपूजार्थेभ्यश्च ॥ १८८ ॥

इति तृतीयाध्यायस्य द्वितीयः पादः ।

उणादयो बहुलम्[1] ॥ १ ॥
भूतेऽपि दृश्यन्ते ॥ २ ॥
भविष्यति गम्यादयः ॥ ३ ॥

---

१ प. पुस्तके इतः परमधिकम् । भियः क्रुकनपि वक्तव्यः । २ प. पुस्तके इतः परमधिकम् । वचिप्रच्छ्योरसंप्रसारणं च । ३ प. पुस्तके इतः परमधिकम् । जुहोतेर्दीर्घश्च । दृणातेर्ह्रस्वश्च द्वे च क्विच्चेति वक्तव्यम् । ४ प. पुस्तके इतः परमधिकम् । डुप्रकरणे मितद्र्वादिभ्य उपसंख्यानं धातुविधितुक्प्रतिषेधार्थम् । बाहुलकं प्रकृतेस्तनुदृष्टेः । प्रायसमुच्चयनादपि तेषाम् । कार्यसशेषविधेश्च तदुक्तम् । नैगमरूढिभवं हि सुसाधु । नाम च धातुजमाह निरुक्ते । व्याकरणे शकटस्य तोकम् । यन्न विशेषपदार्थसमुत्थं प्रत्ययतः प्रकृतेश्च तदूह्यम् ।

१ भविष्यतीत्यनद्यतन उपसंख्यानम् ।

२ इतरेतराश्रयं च ।

३ उक्तं वा

यावत्पुरानिपातयोर्लट् ॥ ४ ॥

१ यावत्पुरादिषु लड्विधिर्लुटः पूर्वविप्रतिषिद्धम् ।

विभाषा कदाकर्ह्योः ॥ ५ ॥

किंवृत्ते लिप्सायाम् ॥ ६ ॥

लिप्स्यमानसिद्धौ च ॥ ७ ॥

लोडर्थलक्षणे च ॥ ८ ॥

लिङ् चोर्ध्वमौहूर्तिके ॥ ९ ॥

तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् ॥१०॥

१ ण्वुलः क्रियार्थोपपदस्य पुनर्विधानं तृजादिप्रतिषेधार्थम् ।

भाववचनाश्च ॥ ११ ॥

१ भाववचनानां यथाविहितानां प्रतिपदविध्यर्थम् ।

अण् कर्मणि च ॥ १२ ॥

१ अणः पुनर्वचनमपवादविषयेऽनिवृत्त्यर्थम्

लृट् शेषे च ॥ १३ ॥

१ लृटि शेषवचनं क्रियायां प्रतिपदविध्यर्थम् ।

२ अविशेषेण विधाने लृटोऽभावः प्रतिषिद्धत्वात् ।

लृटः सद्वा ॥ १४ ॥

१ सद्विधिर्नित्यमप्रथमासमानाधिकरणे ।

अनद्यतने लुट् ॥ १५ ॥

१ परिदेवने श्वस्तनी भविष्यन्त्यर्थे ।

२ कालप्रकर्षात्तूपमानम् ।

पदरुजविशस्पृशो घञ् ॥ १६ ॥

१ स्पृश उपतापे ।

सृ स्थिरे[3] ॥ १७ ॥

भावे ॥ १८ ॥

१ भावे सर्वलिङ्गो निर्देशः ।

अकर्तरि च कारके संज्ञायाम् ॥ १९ ॥

१ कारकग्रहणमनादेशे स्वार्थविज्ञानात् ।

२ संज्ञाग्रहणानर्थक्यं सर्वत्र घञो दर्शनात् ।

३ अतिप्रसङ्ग इति चेदभिधानलक्षणत्वात्प्रत्ययस्य सिद्धम् ।

परिमाणाख्यायां सर्वेभ्यः ॥ २० ॥

१ सर्वग्रहणमनर्थकं परिमाणाख्यायामिति सिद्धत्वात् ।

२ घञनुक्रमणमजब्विषये ।

३ अवचने हि स्त्रीप्रत्ययानामप्यपवादविज्ञानम् ।

४ दारजारौ कर्तरि णिलुक् च ।

५ करणे वा ।

इङश्च ॥ २१ ॥

१ इङश्चेत्यपादाने स्त्रियामुपसंख्यानं तदन्ताच्च वा ङीष् ।

२ शॄ वायुवर्णनिवृतेषु ।

उपसर्गे रुवः ॥ २२ ॥

१ प. पुस्तके इतः परमधिकम् । न वा तद्विधानस्यान्यत्राभावात् । भविष्यदधिकारस्य प्रयोजनं यावत् पचति पुरा पचतीत्यनपशब्दत्वाय । २ प. पुस्तके नास्ति । ३ प. पुस्तके इतः परमधिकम् । व्याधिमत्स्यबलेष्विति वाच्यम् । ४ प. पुस्तके सिद्धमिति नास्ति ।

सामि युद्रुदुवः ॥ २३ ॥
श्रिणीभुवो ऽनुपसर्गे ॥ २४ ॥
वौ क्षुश्रुवः ॥ २५ ॥
अवोदोर्नियः ॥ २६ ॥
प्रे द्रुस्तुस्रुवः ॥ २७ ॥
निरभ्योः पूल्वोः ॥ २८ ॥
उन्न्योर्ग्रः ॥ २९ ॥
कॄ धान्ये ॥ ३० ॥
यज्ञे समि स्तुवः ॥ ३१ ॥
प्रे स्त्रो ऽयज्ञे ॥ ३२ ॥
प्रथने वावशब्दे ॥ ३३ ॥
छन्दोनाम्नि च ॥ ३४ ॥
उदि ग्रहः ॥ ३५ ॥
समि मुष्टौ ॥ ३६ ॥

१ समि मुष्टावित्यनर्थकं वचनं परिमाणाख्यायामिति सिद्धत्वात् ।
२ अपरिमाणार्थं तु ।
३ उद्ग्राभनिग्राभौ च च्छन्दसि स्रुगुद्यमननिपातनयोः ।

परिन्योर्नीणोर्द्यूताभ्रेषयोः ॥ ३७ ॥
परावनुपात्यय इणः ॥ ३८ ॥
व्युपयोः शेतेः पर्याये ॥ ३९ ॥
हस्तादाने चेरस्तेये ॥ ४० ॥
निवासचितिशरीरोपसमाधानेष्वादेश्च कः ॥ ४१ ॥
संघे चानौत्तराधर्ये ॥ ४२ ॥
कर्मव्यतिहारे णच् स्त्रियाम् ॥ ४३ ॥

१ कर्मव्यतिहारे स्त्रीग्रहणं व्यतिपाकार्थम् ।
२ पृथग्ग्रहणं बाधकबाधनार्थम् ।
३ व्यावचोरीव्यावचर्च्यर्थम् ।
४ तत्र व्यतीक्षादिषु दोषः ।
५ सिद्धं तु प्रकृते स्त्रीग्रहणे णज्ग्रहणं णिज्ग्रहणं च ।

अभिविधौ भाव इनुण् ॥ ४४ ॥

१ अभिविधौ भावग्रहणं नपुंसके क्तादिनिवृत्त्यर्थम् ।
२ पृथग्ग्रहणं बाधकबाधनार्थम् ।
३ न तु ल्यटः ।

आक्रोशे ऽवन्योर्ग्रहः ॥ ४५ ॥
प्रे लिप्सायाम् ॥ ४६ ॥
परौ यज्ञे ॥ ४७ ॥
नौ वृ धान्ये ॥ ४८ ॥
उदि श्रयतियौतिपूद्रुवः ॥ ४९ ॥
विभाषाङि रुप्लुवोः ॥ ५० ॥
अवे ग्रहो वर्षप्रतिबन्धे ॥ ५१ ॥
प्रे वणिजाम् ॥ ५२ ॥
रश्मौ च ॥ ५३ ॥
वृणोतेराच्छादने ॥ ५४ ॥
परौ भुवो ऽवज्ञाने ॥ ५५ ॥
एरच् ॥ ५६ ॥

१ अज्विधौ भयस्योपसंख्यानम् ।
२ नपुंसके क्तादिनिवृत्त्यर्थम् ।
३ कल्पादिभ्यश्च प्रतिषेधः ।
४ जवसवौ छन्दसि ।

---

१ प. पुस्तके वचनमिति नास्ति । २ प. पुस्तके अबादीनामित्यधिकम् । ३ प. पुस्तके 'च' नास्ति ।

ऋदोरप् ॥ ५७ ॥

ग्रहवृदृनिश्चिगमश्च ॥ ५८ ॥

१ अब्विधौ निश्चिग्रहणमनर्थकं स्तेयस्य घञ्विधौ प्रतिषेधात् ।

२ अस्तेयार्थमिति चेन्नानिष्टत्वात् ।

३ वशिरण्योश्चोपसंख्यानम् ।

४ घञर्थे कविधानं स्थास्नापाव्यधिहनियुध्यर्थम् ।

उपसर्गेऽदः ॥ ५९ ॥

णौ ण च ॥ ६० ॥

व्यधजपोरनुपसर्गे ॥ ६१ ॥

स्वनहसोर्वा ॥ ६२ ॥

यमः समुपनिविषु च ॥ ६३ ॥

नौ गदनदपठस्वनः ॥ ६४ ॥

क्वणो वीणायां च ॥ ६५ ॥

नित्यं पणः परिमाणे ॥ ६६ ॥

मदोऽनुपसर्गे ॥ ६७ ॥

प्रमदसंमदौ हर्षे ॥ ६८ ॥

समुदोरजः पशुषु ॥ ६९ ॥

अक्षेषु ग्लहः ॥ ७० ॥

प्रजने सर्तेः ॥ ७१ ॥

ह्वः संप्रसारणं च न्यभ्युपविषु ॥ ७२ ॥

आङि युद्धे ॥ ७३ ॥

निपानमाहावः ॥ ७४ ॥

भावेऽनुपसर्गस्य ॥ ७५ ॥

हनश्च वधः ॥ ७६ ॥

मूर्तौ घनः ॥ ७७ ॥

अन्तर्घनो देशे ॥ ७८ ॥

अगारैकदेशे प्रघणः प्रघाणश्च ॥ ७९ ॥

उद्घनोऽत्याधानम् ॥ ८० ॥

अपघनोऽङ्गम् ॥ ८१ ॥

करणेऽयोविद्रुषु ॥ ८२ ॥

स्तम्बे क च ॥ ८३ ॥

परौ घः ॥ ८४ ॥

उपघ्न आश्रये ॥ ८५ ॥

संघोद्घौ गणप्रशंसयोः ॥ ८६ ॥

निघो निमितम् ॥ ८७ ॥

ड्वितः क्त्रिः ॥ ८८ ॥

ट्वितोऽथुच् ॥ ८९ ॥

यजयाचयतविच्छप्रच्छरक्षो नङ् ॥ ९० ॥

१ यजादिभ्यो नस्य ङित्वे संप्रसारणप्रतिषेधः ।

२ अङिति गुणप्रतिषेधः ।

स्वपो नन् ॥ ९१ ॥

उपसर्गे घोः किः ॥ ९२ ॥

कर्मण्यधिकरणे च ॥ ९३ ॥

स्त्रियां क्तिन् ॥ ९४ ॥

१ स्त्रियां क्तिनाबादिभ्यश्च[१] ।

२ निष्ठायां वा सेटोऽकारवचनात् सिद्धम्[२] ।

स्थागापापचो भावे ॥ ९५ ॥

१ स्थादिभ्यः सर्वापवादप्रसङ्गः ।

२ सिद्धं त्वङ्विधाने स्थादिप्रतिषेधात् ।

३ श्रुयजिषिस्तुभ्यः करणे ।

४ ग्लाज्याहाभ्यो निः ।

मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः ॥ ९६ ॥

१ प. पुस्तके चेति पद नास्ति । २ प. पुस्तके सिद्धमिति नास्ति ।

ऊतियूतिजूतिसातिहेतिकीर्तयश्च ॥९७॥

व्रजयजोर्भावे क्यप् ॥ ९८ ॥

१ क्यब्विधिरधिकरणे च ।

संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः ॥ ९९ ॥

कृञः श च ॥ १०० ॥

१ कृञः श चेति वावचनं क्तिनर्थम् ।

इच्छा ॥ १०१ ॥

अ प्रत्ययात् ॥१०२ ॥

गुरोश्च हलः ॥ १०३ ॥

षिद्भिदादिभ्यो ऽङ् ॥ १०४ ॥

१ भिदा विदारणे ।

२ छिदा द्वैधीकरणे ।

३ आरा शस्त्र्याम् ।

४ धारा प्रपाते ।

५ गुहा गिर्योषध्योः ।

चिन्तिपूजिकथिकुम्बिचर्चश्च ॥ १०५ ॥

आतश्चोपसर्गे ॥ १०६ ॥

ण्यासश्रन्थो युच् ॥ १०७ ॥

१ युच्प्रकरणे घट्टिवन्दिविदिभ्य उपसंख्यानम् ।

२ इषेरनिच्छार्थस्य ।

३ परेर्वा ।

रोगाख्यायां ण्वुल् बहुलम् ॥ १०८ ॥

१ धात्वर्थनिर्देशे ण्वुल् ।

२ इक्श्तिपौ धातुनिर्देशे ।

३ वर्णात्कारः ।

४ रादिफः ।

५ मत्वर्थाच्छः ।

६ इणजादिभ्यः ।

७ इञ्वपादिभ्यः ।

८ इकृष्यादिभ्यः ।

९ संपदादिभ्यः क्विप् ।

संज्ञायाम् ॥ १०९ ॥

विभाषाख्यानपरिप्रश्नयोरिञ्च ॥११०॥

पर्यायार्हर्णोत्पत्तिषु ण्वुच् ॥ १११ ॥

आक्रोशे नञ्यनिः ॥ ११२ ॥

कृत्यल्युटो बहुलम्[2] ॥ ११३ ॥

नपुंसके भावे क्तः ॥ ११४ ॥

ल्युट् च ॥ ११५ ॥

कर्मणि च येन संस्पर्शात्कर्तुः शरीरसुखम् ॥ ११६ ॥

करणाधिकरणयोश्च ॥ ११७ ॥

पुंसि संज्ञायां घः प्रायेण ॥ ११८ ॥

गोचरसंचरवहव्रजव्यजापणनिगमाश्च ॥ ११९ ॥

१ गोचरादीनामग्रहणं प्रायवचनाद्यथा कषो निकष इति ।

अवे तृस्त्रोर्घञ् ॥ १२० ॥

हलश्च ॥ १२१ ॥

१ घञ्विधाववहाराधारावायानामुपसंख्यानम् ।

अध्यायन्यायोद्यावसंहाराश्च ॥ १२२ ॥

उदङ्को ऽनुदके ॥ १२३ ॥

---

१ प पुस्तके इतः परमाधिकम् । इच्छापरिचर्यापरिसर्यामृगयाटाट्यानामुपसंख्यानम् । जागर्तेरकारो वा । २ प. पुस्तके इतः परमधिकम् । कृतो बहुलमिति वक्तव्यं पादहारकाद्यर्थम् ।

१ उदकोऽनुदकग्रहणानर्थक्यं च प्रायवचनाद्यथा गोदोहनः प्रसाधन इति ।

जालमानायः ॥ १२४ ॥

खनो घ च[1] ॥ १२५ ॥

ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् ॥ १२६ ॥

१ अजब्भ्यां स्त्रीखलनाः ।

२ स्त्रियाः खलनौ विप्रतिषेधेन ।

कर्तृकर्मणोश्च भूकृञोः[2] ॥ १२७ ॥

१ खल्कर्तृकर्मणोश्च्व्यर्थयोः ।

२ कर्तृकर्मग्रहणं चोपपदसंज्ञार्थम्[3] ।

आतो युच् ॥ १२८ ॥

छन्दसि गत्यर्थेभ्यः ॥ १२९ ॥

अन्येभ्योऽपि दृश्यते ॥ १३० ॥

१ भाषायां शासियुधिदृशिधृषिभ्यो युच्[4] ।

वर्तमानसामीप्ये वर्तमानवद्वा ॥ १३१ ॥

१ वर्तमानसामीप्ये वर्तमानवद्वचनं शत्राद्यर्थम् ।

आशंसायां भूतवच्च ॥ १३२ ॥

१ आशंसायां भूतवदतिदेशे लङ्लिटोः प्रतिषेधः ।

२ न वापवादस्य निमित्ताभावादनद्यतने हि तयोर्विधानम् ।

३ आशंसासंभावनयोरविशेषात्तद्विधानस्याप्राप्तिः ।

४ न वा संभावनावयवत्वादाशंसायाः ।

५ अर्थासंदेहो वालमर्थत्वात्संभावनस्य ।

क्षिप्रवचने लृट् ॥ १३३ ॥

१ क्षिप्रवचने लृट आशंसावचने लिङ्विप्रतिषेधेन ।

२ अनिष्पन्ने निष्पन्नशब्दः शिष्योऽनिष्पन्नत्वात् ।

३ सिद्धं तु भविष्यत्प्रतिषेधात् ।

४ हेतुभूतकालसंप्रेक्षितत्वाद्वा ।

५ अस्त्यर्थानां भवन्त्यर्थे सर्वा विभक्तयः कर्तुर्विद्यमानत्वात् ।

६ सिद्धं तु यथास्वं कालसमुच्चारणात् ।

७ अवात्वात् ।

८ असिद्धविपर्यासश्च ।

आशंसावचने लिङ् ॥ १३४ ॥

नानद्यतनवत्क्रियाप्रबन्धसामीप्ययोः ॥ १३५ ॥

१ नानद्यतनवत्प्रतिषेधे लङ्लुटोः प्रतिषेधः ।

२ अद्यतनवद्वचने हि विधानम् ।

३ तत्र लङ्विधिप्रसङ्गः ।

४ लुङ्लुटोश्चायथाकालम् ।

भविष्यति मर्यादावचनेऽवरस्मिन् ॥ १३६ ॥

१ भविष्यति मर्यादावचनेऽवरस्मिन्नित्याक्रियाप्रबन्धार्थम् ।

२ क्रियाप्रबन्धार्थमिति चेद्वचनानर्थक्यम् ।

३ अहोरात्रप्रतिषेधार्थमिति चेन्नानिष्टत्वात् ।

कालविभागे चानहोरात्राणाम् ॥ १३७ ॥

[1] प. पुस्तके वचनानर्थक्यामिति पाठः । [2] प. पुस्तके इतः परमधिकम् । खनो डडरेकेकवकाः । [3] प. पुस्तके चोपपदार्थमिति । [4] प. पुस्तके इतः परमधिकम् । मृषेश्चेति वक्तव्यम् ।

१ अनहोरात्राणामिति तद्विभागे प्रतिषेधः ।
२ तैश्च विभागे ।

परस्मिन्विभाषा ॥ १३८ ॥

लिङ्निमित्ते लृङ् क्रियातिपत्तौ ॥१३९॥

भूते च ॥ १४० ॥

१ भूते लृङुताप्यादिषु ।

वोताप्योः ॥ १४१ ॥

१ विभाषा गर्हाप्रभृतौ प्रागुताप्योभ्याम् ।

गर्हायां लडपिजात्वोः ॥ १४२ ॥

१ गर्हायां लड्विधानानर्थक्यं क्रियासमाप्तिविवक्षितत्वात् ।

विभाषा कथमि लिङ् च ॥ १४३ ॥

किंवृत्ते लिङ्लृटौ ॥ १४४ ॥

अनवक्लृप्त्यमर्षयोरकिंवृत्ते ऽपि ॥ १४५॥

१ किंवृत्तस्यानधिकारादुत्तरत्राकिंवृत्तग्रहणानर्थक्यम् ।

किंकिलास्त्यर्थेषु लृट् ॥ १४६ ॥

जातुयदोर्लिङ् ॥ १४७ ॥

१ जातुयदोर्लिङ्विधाने यदायद्योरुपसंख्यानम् ।

यच्चयत्रयोः ॥ १४८ ॥

गर्हायां च ॥ १४९ ॥

चित्रीकरणे च ॥ १५० ॥

शेषे लृडयदौ ॥ १५१ ॥

१ चित्रीकरणे यदि प्रतिषेधानर्थक्यमर्थान्यत्वात् ।

उताप्योः समर्थयोर्लिङ् ॥ १५२ ॥

कामप्रवेदने ऽकच्चिति ॥ १५३ ॥

संभावने ऽलमिति चेत्सिद्धाप्रयोगे॥१५४

विभाषा धातौ संभावनवचने ऽयदि ॥ १५५ ॥

हेतुहेतुमतोर्लिङ् ॥ १५६ ॥

१ हेतुहेतुमतोर्लिङ्वा ।
२ भविष्यदधिकारे ।

इच्छार्थेषु लिङ्लोटौ ॥ १५७ ॥

१ कामप्रवेदनं चेत् ।

समानकर्तृकेषु तुमुन् ॥ १५८ ॥

लिङ् च ॥ १५९ ॥

इच्छार्थेभ्यो विभाषा वर्तमाने ॥ १६० ॥

विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् ॥ १६१ ॥

१ निमन्त्रणादीनामर्थे चेदामन्त्रयै निमन्त्रयै भवन्तमिति प्रत्ययानुपपत्तिः प्रकृत्यभिहितत्वात् ।
२ द्विवचनबहुवचनाप्रसिद्धिश्चैकार्थत्वात् ।
३ सिद्धं तु द्वितीयाकाङ्क्षस्य प्रकृते प्रत्ययार्थे प्रत्ययविधानात् ।

लोट् च ॥ १६२ ॥

प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च ॥१६३॥

१ प्रैषादिषु कृत्यानां वचनं नियमार्थमिति चेत्तदनिष्टम् ।
२ विध्यर्थं तु स्त्रियाः प्रागिति वचनात् ।

लिङ् चोर्ध्वमौहूर्तिके ॥ १६४॥

स्मे लोट् ॥ १६५ ॥

अधीष्टे च ॥ १६६ ॥

कालसमयवेलासु तुमुन्[१] ॥ १६७ ॥

१ प. पुस्तके इतः परमधिकम् । प्रथमाम्सेष्विति वक्तव्यम् ।

लिङ् यदि ॥ १६८ ॥
अर्हे कृत्यतृचश्च ॥ १६९ ॥
आवश्यकाधमर्ण्ययोर्णिनिः ॥ १७० ॥
कृत्याश्च ॥ १७१ ॥
शकि लिङ् च ॥ १७२ ॥
आशिषि लिङ्लोटौ ॥ १७३ ॥
क्तिच्क्तौ च संज्ञायाम् ॥ १७४ ॥
माङि लुङ् ॥ १७५ ॥
स्मोत्तरे लङ् च ॥ १७६ ॥

इति तृतीयाध्यायस्य तृतीयः पादः ।

धातुसंबन्धे प्रत्ययाः ॥ १ ॥
१ धातुसंबन्धे प्रत्ययस्य यथाकालविधानात्सिद्धम् ।
२ उपपदस्य कालान्यत्वम् ।
क्रियासमभिहारे लोट्लोटो हिस्वौ वा च तध्वमोः ॥ २ ॥
१ हिस्वयोः परस्मैपदात्मनेपदग्रहणं लादेशप्रतिषेधार्थम् ।
२ समसंख्यार्थं च ।
३ न वा तध्वमोरादेशवचनं ज्ञापकं पदादेशस्य ।
४ तत्र पदादेशे पित्त्वाटोः प्रतिषेधः ।
५ सिद्धं तु लोण्मध्यमपुरुषैकवचनस्य क्रियासमभिहारे द्विर्वचनात् ।
६ योगविभागात्सिद्धम् ।
समुच्चये ऽन्यतरस्याम् ॥ ३ ॥
यथाविध्यनुप्रयोगः पूर्वस्मिन् ॥ ४ ॥
समुच्चये सामान्यवचनस्य ॥ ५ ॥
छन्दसि लुङ्लङ्लिटः ॥ ६ ॥
लिङर्थे लेट् ॥ ७ ॥
उपसंवादाशङ्कयोश्च ॥ ८ ॥
१ उपसंवादाशङ्कयोर्वचनानर्थक्यं लिङर्थत्वात् ।
तुमर्थे सेसेनसेऽसेन्क्सेकसेनध्यैअध्यैन्कध्यैकध्यैन्शध्यैशध्यैन्तवैतवेङ्तवेनः ॥ ९ ॥
प्रयै रोहिष्यै अव्यथिष्यै ॥ १० ॥
दृशे विख्ये च ॥ ११ ॥
शकि णमुल्कमुलौ ॥ १२ ॥
ईश्वरे तोसुन्कसुनौ ॥ १३ ॥
कृत्यार्थे तवैकेन्केन्यत्वनः ॥ १४ ॥
अवचक्षे च ॥ १५ ॥
भावलक्षणे स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन् ॥ १६ ॥
सृपितृदोः कसुन् ॥ १७ ॥
अलंखल्वोः प्रतिषेधयोः प्राच्यां क्त्वा ॥ १८ ॥
उदीचां माङो व्यतीहारे ॥ १९ ॥
परावरयोगे च ॥ २० ॥
समानकर्तृकयोः पूर्वकाले[1] ॥ २१ ॥
१ समानकर्तृकयोरिति बहुष्वप्राप्तिः ।
२ सिद्धं तु क्रियाप्रधानत्वात् ।
३ लोकविज्ञानान्न सिध्यति ।
४ अनन्त्यवचनात्तु सिद्धम् ।

---

१ प. पुस्तके इतः परमधिकम् । द्विवचननिर्देशात् ।

५ व्यादाय स्वपितीत्युपसंख्यानमपूर्वकालत्वात् ।

६ न वा स्वप्नस्यावरकालत्वात् ।

आभीक्ष्ण्ये णमुल् च ॥ २२ ॥

न यद्यनाकाङ्क्षे ॥ २३ ॥

विभाषाग्रेप्रथमपूर्वेषु ॥ २४ ॥

१ अग्रादिष्वप्राप्तविधेः समासप्रतिषेधः ।

कर्मण्याक्रोशे कृञः खमुञ् ॥ २५ ॥

स्वादुमि णमुल् ॥ २६ ॥

१ स्वादुमि मान्तनिपातनमीकाराभावार्थम् ।

२ च्व्यन्तस्य मकारान्तार्थम् ।

३ आ च तुमनः समानाधिकरणे ।

अन्यथैवंकथमित्थंसु सिद्धाप्रयोगश्चेत् ॥ २७ ॥

यथातथयोरसूयाप्रतिवचने ॥ २८ ॥

कर्मणि दृशिविदोः साकल्ये ॥ २९ ॥

यावति विन्दजीवोः ॥ ३० ॥

चर्मोदरयोः पूरेः ॥ ३१ ॥

वर्षप्रमाण ऊलोपश्चास्यान्यतरस्याम् ॥ ३२ ॥

चेले क्नोपेः ॥ ३३ ॥

निमूलसमूलयोः कषः ॥ ३४ ॥

शुष्कचूर्णरूक्षेषु पिषः ॥ ३५ ॥

समूलाकृतजीवेषु हन्कृञ्ग्रहः ॥ ३६ ॥

करणे हनः ॥ ३७ ॥

१ हनः करणेऽनर्थकं वचनं हिंसार्थेभ्यो णमुल्विधानात् ।

२ अर्थवत्त्वहिंसार्थस्य विधानात् ।

३ नित्यसमासार्थं च ।

स्नेहने पिषः ॥ ३८

हस्ते वर्तिग्रहोः ॥ ३९ ॥

स्वे पुषः ॥ ४० ॥

अधिकरणे बन्धः ॥ ४१ ॥

संज्ञायाम् ॥ ४२ ॥

कर्त्रोर्जीवपुरुषयोर्नशिवहोः ॥ ४३ ॥

ऊर्ध्वे शुषिपूरोः ॥ ४४ ॥

उपमाने कर्मणि च ॥ ४५ ॥

कषादिषु यथाविध्यनुप्रयोगः ॥ ४६ ॥

उपदंशस्तृतीयायाम् ॥ ४७ ॥

हिंसार्थानां च समानकर्मकाणाम् ।४८।

सप्तम्यां चोपपीडरुधकर्षः ॥ ४९ ॥

समासत्तौ ॥ ५० ॥

प्रमाणे च ॥ ५१ ॥

अपादाने परीप्सायाम् ॥ ५२ ॥

द्वितीयायां च ॥ ५३ ॥

स्वाङ्गेऽध्रुवे ॥ ५४ ॥

परिक्लिश्यमाने च ॥ ५५ ॥

विशिपतिपदिस्कन्दां व्याप्यमानासेव्यमानयोः ॥ ५६ ॥

अस्यतितृषोः क्रियान्तरे कालेषु ॥ ५७ ॥

नाम्न्यादिशिग्रहोः ॥ ५८ ॥

अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वाणमुलौ ॥ ५९ ॥

तिर्यच्यपवर्गे ॥ ६० ॥

स्वाङ्गे तस्प्रत्यये कृभ्वोः ॥ ६१ ॥

नाधार्थप्रत्यये च्व्यर्थे ॥ ६२ ॥

तूष्णीमि भुवः ॥ ६३ ॥

अन्वच्यानुलोम्ये ॥ ६४ ॥

शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु तुमुन् ॥ ६५ ॥

पर्याप्तिवचनेष्वलमर्थेषु ॥ ६६ ॥

कर्तरि कृत् ॥ ६७ ॥

१ कर्तरि कृद्वचनमनादेशे स्वार्थविज्ञानात्[1]।

२ तत्र ल्युनादिप्रतिषेधो नानावाक्यत्वात्।

३ तद्वच्च कृत्येष्वेवकारकरणम्।

४ तच्च भव्याद्यर्थम्।

५ ऋषिदेवततयोः कृद्भिः समावेशवचनं ज्ञापकमसमावेशस्य।

६ एवकारकरणं चार्थे।

७ तच्च भव्याद्यर्थम्।

८ तत्र प्रत्ययनियमेऽनिष्टप्रसङ्गः।

९ संज्ञानियमे सिद्धम्।

१० विभक्त्यादिषु चाप्राप्तिः प्रकृतेः प्रत्ययपरवचनात्।

भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा ॥ ६८ ॥

लः कर्मणि च भावे चाकर्मकेभ्यः ॥ ६९ ॥

१ लग्रहणं सकर्मकनिवृत्त्यर्थम्।

तयोरेव कृत्यक्तखलर्थाः ॥ ७० ॥

आदिकर्मणि क्तः कर्तरि च ॥ ७१ ॥

गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च ॥ ७२ ॥

दाशगोघ्नौ संप्रदाने ॥ ७३ ॥

भीमादयोऽपादाने ॥ ७४ ॥

ताभ्यामन्यत्रोणादयः ॥ ७५ ॥

क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः ॥ ७६ ॥

लस्य ॥ ७७ ॥

१ लादेशे सर्वप्रसङ्गोऽविशेषात्[3]।

२ अर्थवद्ग्रहणात्सिद्धमिति चेन्न वर्णग्रहणेषु।

३ तस्माद्विशिष्टग्रहणम्।

४ लादेशो वर्णविधेः पूर्वविप्रतिषिद्धम्।

५ [4]उक्तं वा।

तिप् तस् झि सिप् थस् थ मिब्वस् मस् तातां झ थासाथां ध्वमिड्वहिमहिङ् ॥ ७८ ॥

टित आत्मनेपदानां टेरे ॥ ७९ ॥

१ टित एत्व आत्मनेपदेष्वान प्रतिषेधः।

२ [5]उक्तं वा।

थासः से ॥ ८० ॥

लिटस्तझयोरेशिरेच् ॥ ८१ ॥

परस्मैपदानां णलतुसुस्थलथुसणल्वमाः ॥ ८२ ॥

१ णलः शित्करणं सर्वादेशार्थम्।

२ [6]उक्तं वा।

३ अकारस्य शित्करणं सर्वादेशार्थम्।

४ अकारवचनं समसंख्यार्थम्।

५ तस्माच्छित्करणम्।

विदो लटो वा ॥ ८३ ॥

ब्रुवः पञ्चानामादित आहो ब्रुवः ॥ ८४ ॥

---

१ प. पुस्तके इतः परमधिकम्। कृद्भिरित्यस्य स्थाने कर्तरीति पदम्। २ प. पुस्तके इतः परमधिकम् विप्रतिषेधाद्वानः कर्तरि। सर्वप्रसङ्गस्तु। सर्वत्राप्रसङ्गस्तु। सर्वप्रसङ्गस्तु। ३ प. पुस्तके इतः परमधिकम् अर्थवद्ग्रहणात्सिद्धम्। ४–६ प. पुस्तके नास्ति।

लोटो लङ्वत् ॥ ८५ ॥

१ लङ्वदतिदेशे जुस्भावप्रतिषेधः ।

२ उत्ववचनात्सिद्धम् ।

एरुः ॥ ८६ ॥

सेर्ह्यपिच्च ॥ ८७ ॥

वा छन्दसि ॥ ८८ ॥

मेर्निः ॥ ८९ ॥

१ हिन्योरुत्वप्रतिषेधः ।

२ न वोच्चारणसामर्थ्यात् ।

आमेतः ॥ ९० ॥

सवाभ्यां वामौ ॥ ९१ ॥

आडुत्तमस्य पिच्च ॥ ९२ ॥

एत ऐ ॥ ९३ ॥

१ एत ऐत्व आड्गुणप्रतिषेधः ।

२ न वा बहिरङ्गलक्षणत्वात् ।

लेटोऽडाटौ ॥ ९४ ॥

आत ऐ ॥ ९५ ॥

वैतोऽन्यत्र ॥ ९६ ॥

इतश्च लोपः परस्मैपदेषु ॥ ९७ ॥

स उत्तमस्य ॥ ९८ ॥

नित्यं ङितः ॥ ९९ ॥

इतश्च ॥ १०० ॥

तस्थस्थमिपां तांतंतामः ॥ १०१ ॥

लिङः सीयुट् ॥ १०२ ॥

१ यासुडादेः सीयुट्प्रतिषेधः ।

२ न वा वाक्यापकर्षात् ।

३ सुट्तिथोस्त्वपकर्षविज्ञानात् ।

४ अनादेश्च सुड्वचनम् ।

५ न वा तिथोः प्रधानभावात्तद्विशेषणं लिङ्ग्रहणम् ।

यासुट् परस्मैपदेषूदात्तो ङिच्च ॥ १०३ ॥

१ यासुटो ङिद्वचनं पिदर्थम् ।

२ उदात्तवचनं च ।

३ आगमानुदात्तार्थं वा ।

किदाशिषि ॥ १०४ ॥

झस्य रन् ॥ १०५ ॥

इटोऽत् ॥ १०६ ॥

सुट् तिथोः ॥ १०७ ॥

झेर्जुस् ॥ १०८ ॥

सिजभ्यस्तविदिभ्यश्च ॥ १०९ ॥

आतः ॥ ११० ॥

१ जुस्याकारग्रहणं नियमार्थमिति चेत्सिज्लुग्ग्रहणम् ।

२ प्रापकमिति चेत्प्रत्ययलक्षणप्रतिषेधः ।

३ एवकारकरणं च ।

४ लङ्ग्रहणं च ।

लङः शाकटायनस्यैव ॥ १११ ॥

द्विषश्च ॥ ११२ ॥

तिङ्शित्सार्वधातुकम् ॥ ११३ ॥

आर्धधातुकं शेषः ॥ ११४ ॥

१ आर्धधातुकसंज्ञायां धातुग्रहणम् ।

२ स्वादिप्रतिषेधः ।

३ तद्विधानात्सिद्धम् ।

लिट् च ॥ ११५ ॥

लिङाशिषि ॥ ११६ ॥

छन्दस्युभयथा ॥ ११७ ॥

॥ इति तृतीयाध्यायस्य चतुर्थः पादः ॥

चतुर्थोऽध्यायः ।

ङ्याप्प्रातिपदिकात् ॥ १ ॥

१ ङ्याप्प्रातिपदिकग्रहणमङ्गभपदसंज्ञार्थम् ।

२ यच्छयोश्च लुगर्थम् ।

३ वृद्धावृद्धावर्णस्वरद्व्यज्लक्षणे च प्रत्ययविधौ तत्संप्रत्ययार्थम् ।

४ ङ्याब्ग्रहणमनर्थकं प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणात् ।

५ प्रयोजनं सर्वनामस्वरसमासतद्धितविधिलुगलुगर्थम् ।

६ मानिनि च विधिप्रतिषेधार्थम् ।

७ प्रत्ययग्रहणोपचारेषु च ।

८ अतिप्रसङ्ग उपपदविधौ ।

९ यञिञोः फकि ।

१० समासान्तेषु च ।

११ महदात्वे प्रियादिषु ।

१२ ञ्नित्स्वरे ।

१३ राज्ञः स्वरे ब्राह्मणकुमारयोः ।

१४ समाससंघातग्रहणेषु च ।

१५ विभक्तौ चोक्तम् ।

१६ तद्धितविधानार्थं तु ।

१७ विप्रतिषेधाद्धि तद्धितबलीयस्त्वम् ।

१८ तत्र समासान्तेषु दोषः ।

१९ त्यूङोश्च ग्रहणम् ।

२० तदन्तस्य च प्रत्ययार्थेनायोगात्तद्धितानुत्पत्तिः ।

२१ [1]उक्तं वा ।

स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् ॥ २ ॥

स्त्रियाम् ॥ ३ ॥

१ स्त्रियामिति स्त्र्यर्थाभिधाने चेट्टाबादयो द्विवचनबहुवचनानेकप्रत्ययानुपपत्तिः[3] ।

२ स्त्र्यर्थस्य च प्रातिपदिकार्थत्वात्स्त्रियामिति लिङ्गानुपपत्तिः ।

३ स्त्रीसमानाधिकरणादिति चेद्भूतादिष्वतिप्रसङ्गः ।

४ षट्संज्ञकेभ्यश्च प्रतिषेधः ।

५ सिद्धं तु स्त्रियाः प्रातिपदिकविशेषणत्वात्स्वार्थे टाबादयः ।

६ गुणवचनस्य चाश्रयतो लिङ्गवचनभावात् ।

७ भावस्य च भावयुक्तत्वात् ।

८ स्त्रीविषये ङ्यापोरप्रसिद्धिरकारान्तादर्शनात् ।

९ सर्वेषां तु स्वरवर्णानुपूर्वीज्ञानार्थ उपदेशः ।

१० तस्मात्सिद्धम् ।

१-२ प. पुस्तके नास्ति । ३ प. पुस्तके इतः परमधिकम् । लिङ्गात्स्त्रीपुंसयोर्ज्ञाने भ्रुकुंसे टाप्प्रसज्यते । नत्वं खरकुटीः पश्य । खट्वावृक्षौ न सिध्यतः । नपुंसकं भवेत्तस्मिन् । तदभावे नपुंसकम् । असत्तु मृगतृष्णावत् । गंधर्वनगरं यथा । आदित्यगतिवत्सन्न । वस्त्रान्तर्हितवच्च तत् । तयोस्तु तत्कृतं दृष्ट्वा । यथाकाशेन ज्योतिषः । अन्योन्यसंश्रयं त्वेतत् । प्रत्यक्षेण विरुध्यते । तटे च सर्वलिङ्गानि दृष्ट्वा कोऽध्यवसास्यति । संस्त्यानप्रसवौ लिङ्गमास्थेयौ स्वकृतान्ततः । संस्त्याने स्त्यायतेर्ड्रट् स्त्री सूतेः सप् प्रसवे पुमान् । तस्योक्तौ लोकतो नाम गुणो वा लुपि युक्तवत् । ४ प. पुस्तके इतः परमधिकम् । एकत्वात्स्त्रीत्वस्य ।

अजाद्यतष्टाप् ॥ ४ ॥

१ शूद्रा चामहत्पूर्वा ।

२ जातिः ।

ऋन्नेभ्यो ङीप् ॥ ५ ॥

उगितश्च ॥ ६ ॥

१ धातोरुगितः प्रतिषेधः ।

२ अञ्चतेश्चोपसंख्यानम् ।

३ उगित्यञ्चतिग्रहणात्सिद्धमधातोः ।

वनो र च ॥ ७ ॥

१ वनो न हशः[1] ।

२ रविधाने बहुव्रीहेरुपसंख्यानं प्रतिषिद्धत्वात् ।

३ अनो बहुव्रीहिप्रतिषेधे वोपधालोपिनो वावचनम् ।

पादो ऽन्यतरस्याम् ॥ ८ ॥

टाबृचि ॥ ९ ॥

न षट्स्वस्रादिभ्यः[2] ॥ १० ॥

मनः ॥ ११ ॥

अनो बहुव्रीहेः ॥ १२ ॥

डाबुभाभ्यामन्यतरस्याम् ॥ १३ ॥

अनुपसर्जनात् ॥ १४ ॥

१ अनुपसर्जनग्रहणमनर्थकं प्रातिपदिकेन तदन्तविधिप्रतिषेधात् ।

२ ज्ञापकं तु पूर्वत्र तदन्ताप्रतिषेधस्य ।

३ पूर्वसूत्रनिर्देशो वापिशलमधीत इति ।

४ जातिशब्देभ्यस्त्वतिप्रसङ्गः ।

५ सिद्धं तु जातेरनुपसर्जनत्वात् ।

६ अनुपसर्जनाधिकारे जातेर्ङीष्विधाने सुपर्ण्या उपसंख्यानम् ।

७ न वा समासस्यानुपसर्जनत्वाज्जातिवाचकत्वाच्च शब्दस्य सामान्येन ङीष्विधानम् ।

टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः ॥ १५ ॥

१ ढग्रहणे सानुबन्धकस्योपसंख्यानम् ।

२ अननुबन्धकग्रहणे हि न सानुबन्धकस्य ।

३ अञ्ग्रहणमनर्थकं तदन्ताद्धि ङीन्विधानम् ।

४ न वा जात्यधिकारात् ।

५ अनधिकारे हि पुंयोगादाख्यायां ङीन्प्रसङ्गः[3] ।

६ ख्युन उपसंख्यानम् ।

यञश्च[4] ॥ १६ ॥

प्राचां ष्फ तद्धितः ॥ १७ ॥

१ तद्धितवचनं षितः प्रातिपदिकादीकारार्थम् ।

सर्वत्र लोहितादिकतन्तेभ्यः ॥ १८ ॥

१ लोहितादिषु शाकल्यस्योपसंख्यानम्[5] ।

कौरव्यमाण्डूकाभ्यां च ॥ १९ ॥

१ कौरव्यमाण्डूकयोरासुरेरुपसंख्यानम् ।

२ छश्च[6] ।

---

१ प. पुस्तके इतः परमधिकम् । बहुलं छन्दसि । २ प. पुस्तके इतः परमधिकम् । षट्संज्ञानामन्ते लुप्ते टाबुत्पत्तिः कस्मान्न स्यात् । प्रत्याहाराचापा सिद्धम् । दोषस्त्वस्मे । तस्मान्नोभौ । ३ प. पुस्तके इतः परमधिकम् । नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानम् । ४ प. पुस्तके इतः परमधिकम् । अपत्यग्रहणं द्वीपाद्यञः प्रतिषेधार्थम् । ४ प. पुस्तके नास्ति । ५ प. पुस्तके इतः परमधिकम् । कण्वात्तु शकलः पूर्वः । कतादुत्तर इष्यते । पूर्वोत्तरौ तदन्तादी । ष्फाणौ तत्र प्रयोजनम् । ६ प. पुस्तके इतःपरमधिकम् । वयस्यचरम इति वक्तव्यम् ।

वयसि प्रथमे ॥ २० ॥

द्विगोः ॥ २१ ॥

अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धितलुकि ॥ २२ ॥

काण्डान्तात्क्षेत्रे ॥ २३ ॥

पुरुषात्प्रमाणेऽन्यतरस्याम् ॥ २४ ॥

बहुव्रीहेरूधसो ङीष् ॥ २५ ॥

१ ऊधसो नकारो लिङ्गाधिकारे ।

२ न वा समासान्ताधिकारे[1] स्त्रीग्रहणात् ।

३ इतरथा हि कब्विधिप्रसङ्गः ।

संख्याव्ययादेर्ङीप् ॥ २६ ॥

दामहायनान्ताच्च ॥ २७ ॥

१ दामहायनान्तात्संख्यादेः ।

२ तत्पुरुषविज्ञानाद्वा सिद्धम्[2] ।

अन उपधालोपिनोऽन्यतरस्याम् ॥२८॥

नित्यं संज्ञाछन्दसोः ॥ २९ ॥

केवलमामकभागधेयपापापरसमानार्यकृतसुमङ्गलभेषजाच्च ॥ ३० ॥

रात्रेश्चाजसौ[3] ॥ ३१ ॥

अन्तर्वत्पतिवतोर्नुक् ॥ ३२ ॥

१ अन्तर्वत्पतिवदिति गर्भभर्तृसंयोगे[4] ।

पत्युर्नो यज्ञसंयोगे ॥ ३३ ॥

विभाषा सपूर्वस्य ॥ ३४ ॥

१ पत्युः सपूर्वादुपसर्जनसमास उपसंख्यानम् ।

२ सिद्धं तु पत्युः प्रातिपदिकविशेषणत्वात् ।

नित्यं सपत्न्यादिषु ॥ ३५ ॥

पूतक्रतोरै च ॥ ३६ ॥

१ पूतक्रत्वादीनां पुंयोगप्रकरणे वचनम् ।

२ लिङ्गसंनियोगेन सर्वत्रागमादेशानां वचने लिङ्गलुकि तत्कृतप्रसङ्गः ।

३ सिद्धं त्वागमादेशानामङ्गतः स्त्रीप्रकरणे वचनात् ।

४ लिङ्गलुकि वा प्रकृतिप्रत्यापत्तिवचनम् ।

वृषाकप्यग्निकुसितकुसीदानामुदात्तः ॥ ३७ ॥

मनोरौ वा ॥ ३८ ॥

वर्णादनुदात्तात् तोपधात् तो नः ॥ ३९ ॥

१ असितपलितयोः प्रतिषेधः ।

२ छन्दसि क्नमेके ।

३ वर्णान्ङीब्विधाने पिशङ्गादुपसंख्यानम् ।

अन्यतो ङीष् ॥ ४० ॥

षिद्गौरादिभ्यश्च ॥ ४१ ॥

जानपदकुण्डगोणस्थलभाजनागकालनीलकुशकामुककबराद्वृत्त्यमत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु ॥ ४२ ॥

१ नीलादोषधौ ।

२ प्राणिनि च ।

३ वा संज्ञायाम् ।

शोणात्प्राचाम् ॥ ४३ ॥

वोतो गुणवचनात् ॥ ४४ ॥

१ गुणवचनान्ङीबाद्युदात्तार्थम् ।

---

१ प. पुस्तके समासान्ताधिकारे इत्यस्य स्थाने समासान्ते इति पाठः । २ प. पुस्तके इतःपरमधिकम् । हायनो वयसि स्मृतः । ३ प. पुस्तके इतः परमधिकम् । अजसादिष्विति वक्तव्यम् । ४ प. पुस्तके इतः परमधिकम् । अन्तर्वत्पतिवतोस्तु मतुब्वत्वे निपातनात् । गर्भिण्यां जीवपत्यां च । वा च छन्दसि नुग्भवेत् ।

२ स्वरसंयोगोपधप्रतिषेधश्च ।

बह्वादिभ्यश्च ॥ ४५ ॥

नित्यं छन्दसि ॥ ४६ ॥

भुवश्च ॥ ४७ ॥

पुंयोगादाख्यायाम्[1] ॥ ४८ ॥

१ पुंयोगादाख्यायां तद्धितलुग्वचनम् ।

२ सुबन्तसमासवचनाच्चाकारान्तानुपपत्तिः ।

३ सिद्धं तु स्त्रियाः पुंशब्देनाभिधानात् ।

४ गतिकारकोपपदानां कृद्भिः सह समासवचनम् ।

५ प्रयोजनं क्तादल्पाख्यायाम् ।

६ जातेर्ङीष्विधानम् ।

७ समासान्तस्य णत्वे ।

८ कृदन्तात्तद्धिते वृद्धिस्वरौ च ।

९ अवदातायां तु ङीप्प्रसंगः[2] ।

इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक् ॥ ४९ ॥

१ हिमारण्ययोर्महत्त्वे ।

२ यवाद्दोषे ।

३ यवनाल्लिप्याम् ।

४ उपाध्यायमातुलाभ्यां वा ।

५ मुद्गलाच्छन्दसि लिच्च ।

६ आचार्यादणत्वं च ।

७ अर्यक्षत्रियाभ्यां वा ।

क्रीतात्करणपूर्वात् ॥ ५० ॥

क्तादल्पाख्यायाम् ॥ ५१ ॥

बहुव्रीहेश्चान्तोदात्तात् ॥ ५२ ॥

१ अन्तोदात्ते जातप्रतिषेधः ।

२ पाणिगृहीत्यादीनां विशेषे ।

३ बहुलं तणि ।

४ [4]प्रबद्धविलूनाद्यर्थम् ।

५ अन्तोदात्तादबहुनञ्सुकालसुखादिपूर्वात्

६ जातिपूर्वाद्वा ।

अस्वाङ्गपूर्वपदाद्वा ॥ ५३ ॥

स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् ॥ ५४ ॥

१ उपसर्जनग्रहणमनर्थकं बहुव्रीह्यधिकारात् ।

२ बहुजर्थमिति चेत्स्वाङ्गग्रहणात्सिद्धम् ।

३ अनन्तोदात्तार्थमिति चेत्सहादिकृतत्वात्सिद्धम् ।

४ स्वाङ्गसमुदायप्रतिषेधार्थं तु ।

नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्च ॥ ५५ ॥

१ नासिकादीनां विभाषायां पुच्छाच्च[5] ।

२ कबरमणिविषशरेभ्यो नित्यम् ।

३ उपमानात्पक्षाच्च ।

४ नासिकादिभ्यो विभाषायाः सहनञ्विद्यमानपूर्वेभ्यः प्रतिषेधो विप्रतिषेधेन ।

न क्रोडादिबह्वचः ॥ ५६ ॥

सहनञ्विद्यमानपूर्वाच्च ॥ ५७ ॥

नखमुखात्संज्ञायाम् ॥ ५८ ॥

दीर्घजिह्वी च च्छन्दसि ॥ ५९ ॥

दिक्पूर्वपदान्ङीप् ॥ ६० ॥

१ दिक्पूर्वपदान्ङीषोऽनुदात्तत्वम् ।

---

१ प. पुस्तके इतःपरमधिकम् । गोपालिकादीनां प्रतिषेधः । २ प. पुस्तके ङीप्प्रतिषेधः इति पाठः ३ प. पुस्तके इतः परमधिकम् । सूर्याद्देवतायां चाब्वक्तव्यः । ४ प पुस्तके प्रवृद्ध° इति पाठः । ५ प. पुस्तके पुच्छाच्चेत्यधिकम् ।

२ ङीब्विधाने ह्यन्यत्रापि ङीष्विषयान्ङी-
प्प्रसङ्गः ।

वाहः ॥ ६१ ॥

सख्यशिश्वीति भाषायाम् ॥ ६२ ॥

जातेरस्त्रीविषयादयोपधात् ॥ ६३ ॥

१ योपधप्रतिषेधे गवयहयमुकयमनुष्यम-
त्स्यानामप्रतिषेधः ।

**पाककर्णपर्णपुष्पफलमूलबालोत्तरप-
दाच्च ॥ ६४ ॥**

१ सदक्काण्डप्रान्तशतैकेभ्यः पुष्पात् प्रति-
षेधः ।

२ सभंस्त्राजिनशणपिण्डेभ्यः फलात् ।

३ त्रेश्च ।

४ मूलान्नञः ।

इतो मनुष्यजातेः ॥ ६५ ॥

१ इतो मनुष्यजातेरिञ उपसंख्यानम् ।

ऊङुतः ॥ ६६ ॥

१ ऊङ्प्रकरणेऽप्राणिजातेश्चारज्ज्वादीनाम्

बाह्वन्तात्संज्ञायाम् ॥ ६७ ॥

पङ्गोश्च ॥ ६८ ॥

ऊरूत्तरपदादौपम्ये ॥ ६९ ॥

संहितशफलक्षणवामादेश्च[1] ॥ ७० ॥

कद्रुकमण्डल्वोश्छन्दसि[2] ॥ ७१ ॥

संज्ञायाम् ॥ ७२ ॥

शार्ङ्गरवाद्यञो ङीन् ॥ ७३ ॥

यङश्चाप् ॥ ७४ ॥

१ षाच्च यञश्चाप् ।

आवट्याच्च ॥ ७५ ॥

१ अन उपधालोपिन ऊधसो ङीष् पूर्व-
विप्रतिषिद्धम् ।

२ आवट्याद्यञः ष्फश्चापः ।

तद्धिताः ॥ ७६ ॥

यूनस्तिः ॥ ७७ ॥

**अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ्
गोत्रे[3] ॥ ७८ ॥**

१ ष्यङ्यनादेशे यलोपवचनम् ।

२ द्विरण्विधिः ।

३ आदेशे नलोपवचनम् ।

४ न वा ष्यङो लोपनिमित्तत्वात्[4] ।

---

१ प. पुस्तके इतः परमधिकम् । श्वेताच्च । २ प. पुस्तके इतः परमधिकम् । सहितसहाभ्यां चेति वक्तव्यम् । ३ प. पुस्तके इतः परमधिकम् । कद्रुकमण्डलुगुग्गुलुमधुजतुपतयालूनामिति वक्तव्यम् । ४ प. पुस्तके इतः परमधिकम् । प्रकर्षे चोत्तमं कृत्वा दाक्ष्या नोपोत्तमं गुरु । आम्विधिः केन ते न स्यात्प्रकर्षं यद्ययं तमः । उद्गतस्य प्रकर्षोऽयं गतशब्दोऽत्र लुप्यते । नाव्ययार्थप्रकर्षोऽस्ति धात्वर्थोऽत्र प्रकृष्यते । उद्गतोऽपेक्षते किंचित् त्रयाणां द्वौ किलोद्गतौ । चतुष्प्रभृति कर्तव्यो वाराह्यां न सिध्यति । भिद्यतेऽस्य स्वरस्तेन विधिश्चामो न लक्ष्यते । शब्दान्तरमिदं विद्याद्दृष्टमभ्यन्तरं त्रिषु । ५ प. पुस्तके इतः परमधिकम् । अनुबन्धौ त्वया कार्यौ चावर्थं टाब्विधिर्मम । उक्तेऽपि हि भवन्त्येते । तेन ञिन्न भविष्यति । अस्थानिवत्त्वे दोषस्ते वृद्धिरत्र न सिध्यति । त्वयाप्यत्र विशेषार्थं कर्तव्यं स्याद्विशेषणम् । पाश्यायां ते कथं न स्यात् । एको मे स्याद्विशेषणम् । अन्यस्मिन्सूत्रभेदः स्यात् । षिति लिङ्गं प्रसज्यते । ङिति चेत्क्रीयितं दोषः । व्यवधानाच्च दुष्यति । योऽनन्तरो न धातुः सः । यो धातुः सोऽनन्तरः । न चेदुभयतः साम्यमुभयत्र प्रसज्यते । यत्र विशेष्येत यदीह धातुर्यङ् धातुना वा यदि तुल्यमेतत् । उभौ प्रधानं यदि नात्र दोषः । तथा प्रसार्येत तु वाक्पतिस्ते । धातुप्रकरणस्येह न स्थानमिति निश्चयः । आत्त्वार्थं यदि कर्तव्यं तन्नैवैतत्करिष्यते । उपदेशे यदेजन्तं तस्य चेदात्त्वमिष्यते । उद्देशो रूढिशब्दानां तेन गोर्न भविष्यति ।

गोत्रावयवात् ॥ ७९ ॥

१ गोत्रावयवादगोत्रार्थमिति चेत्तदनिष्टम् ।

२ गोत्रादिति चेद्वचनानर्थक्यम् ।

३ अगुरूपोत्तमार्थमिति चेत्सर्वेषामवयवत्वात्सर्वप्रसङ्गः ।

४ सिद्धं तु रौढ्यादिषूपसंख्यानम् ।

क्रौड्यादिभ्यश्च ॥ ८० ॥

दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्ठेविद्धिभ्यो ऽन्यतरस्याम् ॥ ८१ ॥

समर्थानां प्रथमाद्वा ॥ ८२ ॥

१ समर्थवचनमनर्थकं न ह्यसमर्थेनार्थाभिधानम् ।

२ प्रथमवचनमनर्थकं न ह्यप्रथमेनार्थाभिधानम् ।

३ [1]वावचने चोक्तम् ।

प्राग्दीव्यतो ऽण् ॥ ८३ ॥

१ प्राग्वचनं सक्वद्विधानार्थम् ।

२ अधिकारात्सिद्धमिति चेदपवादविषयेऽण्प्रसङ्गः ।

३ तस्मात्प्राग्वचनम् ।

४ न वा क्वचिद्वावचनात् ।

अश्वपत्यादिभ्यश्च ॥ ८४ ॥

दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः ॥ ८५ ॥

१ वाक्पतिपितृमतां छन्दस्युपसंख्यानम् ।

२ पृथिव्या ञाञौ ।

३ देवस्य यञञौ ।

४ बहिषष्टिलोपो यञ्च ।

५ ईकक्च ।

६ ईकञ्छन्दसि ।

७ स्थाम्नोऽकारः ।

८ लोम्नोऽपत्येषु बहुषु ।

९ सर्वत्र गोरजादिप्रसङ्गे यत् ।

१० ण्यादयोऽर्थविशेषलक्षणादणपवादात्पूर्वविप्रतिषिद्धम् ।

उत्सादिभ्यो ऽञ् ॥ ८६ ॥

१ अञ्प्रकरणे ग्रीष्मादच्छन्दसि ।

स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात् ॥ ८७ ॥

१ नञ्स्नञौ भवनादिति[2] चेद्वत्यर्थे प्रतिषेधः ।

२ वतेः प्रागिति चेद्भाव उपसंख्यानम् ।

द्विगोर्लुगनपत्ये ॥ ८८ ॥

१ द्विगोर्लुकि तन्निमित्तग्रहणम् ।

२ अर्थविशेषासंप्रत्ययेऽतन्निमित्तादपि ।

गोत्रे ऽलुगचि ॥ ८९ ॥

१ [3]गोत्रेऽलुगचीति चेदितरेतराश्रयत्वादप्रसिद्धिः ।

२ विप्रतिषेधात्तु लुकश्छविधानम्[4] ।

३ गोत्रस्य बहुषु लोपिनो बहुवचनान्तस्य प्रवृत्तौ द्व्येकयोरलुक् ।

४ एकवचनाद्विवचनान्तस्य प्रवृत्तौ बहुषु लोपो यूनि ।

---

१ प. पुस्तके नास्ति । २ प. पुस्तके इतीति पदं नास्ति । ३ प. पुस्तके इदं नास्ति । ४ प. पुस्तके इतः परमधिकम् । भूम्नीति च लुक्प्राप्तो बाह्ये चार्थे विधीयतेऽजादिः । बहिरङ्गमन्तरङ्गाद्विप्रतिषेधाद्युक्तं स्यात् । भूम्नि प्राप्तस्य लुको यदजादौ तद्धितेऽलुकं शास्ति । एतद्ब्रवीति कुर्वन्समानकालावलुग्लुक्च ॥ यदि वा लुकः प्रसङ्गे भवत्यलुक् भवतथा प्रसिद्धोऽस्य । लुग्वालुकः प्रसङ्गं प्रतीक्षते केऽलुगस्य तथा ।

५ गर्गभार्गविकाग्रहणं वा नियमार्थम् ।

६ उक्तं वा ।

यूनि लुक् ॥ ९० ॥

१ यूनि लुगचीति चेत्प्रत्ययस्यायथेष्टप्रसङ्गः ।

२ सिद्धं त्वविशेषेण लुग्वचनं हलि च प्रतिषेधः ।

३ प्रयोजनं सौवीरगोत्रेभ्यो णठक्छाः ।

४ इञ्ण्यौ सर्वत्र ।

५ प्राग्दीव्यतोऽधिकारे यूनो वृद्धवदतिदेशः[२] ।

फक्फिञोरन्यतरस्याम् ॥ ९१ ॥

तस्यापत्यम्[३] ॥ ९२ ॥

१ तद्धितार्थनिर्देशे लिङ्गवचनमप्रमाणं तस्याविवक्षितत्वात् ।

२ सर्वनामनिर्देशे विशेषासंप्रत्ययः सामान्यनिर्देशात् ।

३ सामान्यचोदनास्तु विशेषेषु ।

४ अपत्याभिधाने स्त्रीपुंलिङ्गस्याप्रसिद्धिर्नपुंसकत्वात् ।

५ सिद्धं तु प्रजनस्य विवक्षितत्वात् ।

६ एकार्थे शब्दान्यत्वाद्दृष्टं लिङ्गान्यत्वम् ।

७ अवयवान्यत्वाच्च ।

एको गोत्रे ॥ ९३ ॥

१ उत्पादयितारं प्रत्यपत्ययोगात्तस्य च विवक्षितत्वादेकवचनं गोत्रे ।

२ तत्र प्रत्ययान्ताद्गोत्रे प्रतिषेधो गोत्रे नियतत्वात् ।

३ परमप्रकृतेश्चोत्पत्तिः ।

४ स्त्रियां चानियमः ।

५ यूनि चान्तर्हितेऽप्राप्तिः ।

६ सर्वेषामपत्ययोगात्प्रत्ययान्ताद्गोत्रे प्रतिषेधार्थमेको गोत्रे ।

७ नियमानुपपत्तिश्च ।

८ न ह्येकस्मिन्नपत्येऽनेकप्रत्ययप्राप्तिः ।

९ अपत्यान्तरे शब्दान्तरात्प्रत्ययान्तरप्राप्तिः[४] ।

१० तस्मात्प्रतिषेधः ।

११ संज्ञाकारिभ्यो वा प्रत्ययोत्पत्तिः ।

१२ गोत्राद्यूनीति च ।

१३ तच्च जात्यादिनिवृत्त्यर्थम् ।

गोत्राद्यून्यस्त्रियाम् ॥ ९४ ॥

अत इञ् ॥ ९५ ॥

१ इञो वृद्धावृद्धाभ्यां फिञ्फिनौ विप्रतिषेधेन ।

२ तद्राजश्च ।

बाह्वादिभ्यश्च ॥ ९६ ॥

१ बाह्वादिप्रभृतिषु येषां दर्शनं गोत्रभावे लौकिके ततोऽन्यत्र तेषां प्रतिषेधः ।

२ संबन्धिशब्दप्रत्ययानां तत्सदृशात्प्रतिषेधः ।

सुधातुरकङ् च ॥ ९७ ॥

---

१ प. पुस्तके नास्ति । २ प. पुस्तके इतः परमधिकम् । राजन्याद्बुञ्मनुष्याच्च ज्ञापकं लौकिकं परम् । ३ प. पुस्तके इतः परमधिकम् । तस्येदमित्यपत्येऽपि । बाधनार्थं तु कृतं भवेत् । उत्सर्गः शेष एवासौ । वृद्धान्यस्य प्रयोजनम् । ४ प. पुस्तके इतः परमधिकम् । अपत्यं समुदायश्चेन्नियमोऽत्र समीक्षितः । तस्मिन् युवद्वयः प्राप्ता नियमोऽस्य भविष्यति ।

१ सुधातृव्यासयोः ।

गोत्रे कुञ्जादिभ्यश्च्फञ् ॥ ९८ ॥

नडादिभ्यः फक् ॥ ९९ ॥

हरितादिभ्यो ऽञः ॥ १०० ॥

यञिञोश्च ॥ १०१॥

शरद्वच्छुनकदर्भाद्भृगुवत्साग्रायणेषु ॥ १०२ ॥

द्रोणपर्वतजीवन्तादन्यतरस्याम्॥१०३॥

अनृष्यानन्तर्ये बिदादिभ्यो ऽञ् ॥१०४॥

१ अनृष्यानन्तर्यवचनमनर्थकं संज्ञागोत्राधिकारात् ।

गर्गादिभ्यो यञ् ॥ १०५ ॥

मधुबभ्रोर्ब्राह्मणकौशिकयोः ॥ १०६ ॥

कपिबोधादाङ्गिरसे ॥ १०७ ॥

वतण्डाच्च ॥ १०८ ॥

लुक् स्त्रियाम् ॥ १०९ ॥

अश्वादिभ्यः फञ् ॥ ११० ॥

भर्गात्त्रैगर्ते ॥ १११ ॥

शिवादिभ्यो ऽण् ॥ ११२ ॥

अवृद्धाभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्यः ॥ ११३ ॥

ऋष्यन्धकवृष्णिकुरुभ्यश्च ॥ ११४ ॥

१ ऋषिस्त्र्यणो ढग्ढकौ विप्रतिषेधेन ।

२ द्व्यचो ढको ढ्ग्ढञौ ।

३ न वर्ष्यणः पुनर्वचनमन्यनिवृत्त्यर्थम् ।

४ तस्मादृषिभ्योऽण्विधानेऽन्यादिप्रतिषेधः।

५ ढकः पुनर्वचनमन्यनिवृत्त्यर्थम् ।

६ तस्मात्तन्नामिकाण्यद्व्यचः ।

७ ऋष्यन्धकवृष्णिकुर्वणः सेनान्ताण्ण्यः[1] ।

मातुरुत् संख्यासंभद्रपूर्वायाः ॥ ११५ ॥

कन्यायाः कनीन च ॥ ११६ ॥

विकर्णशुङ्गच्छगलाद्वत्सभरद्वाजात्रिषु ॥ ११७ ॥

पीलाया वा ॥ ११८ ॥

ढक् च मण्डूकात् ॥ ११९ ॥

स्त्रीभ्यो ढक् ॥ १२० ॥

द्व्यचः ॥ १२१ ॥

इतश्चानिञः ॥ १२२ ॥

शुभ्रादिभ्यश्च ॥ १२३ ॥

विकर्णकुषीतकात्काश्यपे ॥ १२४ ॥

भ्रुवो वुक् च ॥ १२५ ॥

कल्याण्यादीनामिनङ् च ॥ १२६ ॥

कुलटाया वा ॥ १२७ ॥

चटकाया ऐरक् ॥ १२८ ॥

१ चटकायाः पुंलिङ्गनिर्देशः ।

२ स्त्रियामपत्ये लुक् ।

गोधाया ढ्रक् ॥ १२९ ॥

आरगुदीचाम् ॥ १३० ॥

१ आरग्वचनमनर्थकं रका सिद्धत्वात् ।

क्षुद्राभ्यो वा ॥ १३१ ॥

पितृष्वसुश्छण् ॥ १३२ ॥

ढकि लोपः ॥ १३३ ॥

मातृष्वसुश्च ॥ १३४ ॥

चतुष्पाद्भ्यो ढञ् ॥ १३५ ॥

---

१ प. पुस्तके इतः परमधिकम् । सुधातृव्यासवरुडनिषादचण्डालबिम्बानामिति वक्तव्यम् । २ प पुस्तके इतः परमधिकम् । वडवाया वृषे वाच्ये । अणू कुब्जाकोकिलात्स्मृतः । आरक् पुंसि ततोऽन्यत्र गोधाया ढ्रग्विधौ स्मृत

गृष्ट्यादिभ्यश्च ॥ १३६ ॥
राजश्वशुराद्यत् ॥ १३७ ॥
१ राज्ञोऽपत्ये जातिग्रहणम् ।
क्षत्राद्घः ॥ १३८ ॥
कुलात्खः ॥ १३९ ॥
अपूर्वपदादन्यतरस्यां यड्ढकञौ ।१४०।
महाकुलादञ्खञौ ॥ १४१ ॥
दुष्कुलाड्ढक् ॥ १४२ ॥
स्वसुश्छः ॥ १४३ ॥
भ्रातुर्व्यच्च ॥ १४४ ॥
व्यन्सपत्ने ॥ १४५ ॥
१ व्यन्वचनमनर्थकं प्रत्ययार्थाभावात् ।
रेवत्यादिभ्यष्ठक् ॥ १४६ ॥
गोत्रस्त्रियाः कुत्सने ण च ॥ १४७ ॥
१ गोत्रस्त्रियाः प्रत्ययस्य णित्करणानर्थक्यं वृद्धत्वात्प्रातिपदिकस्य ।
२ लुगर्थमिति चेन्न लुक्प्रतिषेधात्[1] ।
३ व्यवहितत्वादप्रतिषेध इति चेन्न पुंवद्भावात् ।
४ फिनर्थं तु ।
५ पुंवद्भावप्रतिषेधार्थं च ।
६ गोत्राद्यून्यस्त्रियामिति वचनादप्रयोजनम्।
७ अवश्यत्वाद्वा स्त्रियाः प्रयोजनम् ।
वृद्धाट्ठक् सौवीरेषु बहुलम् ॥ १४८ ॥
फेश्छ च ॥ १४९ ॥
फाण्टाहृतिमिमताभ्यां णफिञौ । १५०॥

१ फाण्टाहृतेः प्रत्ययस्य णित्करणानर्थक्यं वृद्धत्वात्प्रातिपदिकस्य ।
२ पुंवद्भावप्रतिषेधार्थं तु ।
३ उक्तं वा ।
कुर्वादिभ्यो ण्यः ॥ १५१ ॥
१ वामरथस्य कण्वादिवत्स्वरवर्जम् ।
सेनान्तलक्षणकारिभ्यश्च ॥ १५२ ॥
उदीचामिञ् ॥ १५३ ॥
१ उदीचामिञ्विधौ तक्ष्णोऽण्वचनम् ।
२ शिवादिरिति चेण्ण्यविधिः ।
३ सिद्धं तूदीचां वा ण्यवचनात् ।
तिकादिभ्यः फिञ् ॥ १५४ ॥
कौसल्यकार्मार्याभ्यां च ॥ १५५ ॥
१ फिञ्प्रकरणे दगुकोसलकर्मारच्छागवृषाणां युट्[3] च ।
अणो द्व्यचः ॥ १५६ ॥
उदीचां वृद्धादगोत्रात् ॥ १५७ ॥
वाकिनादीनां कुक् च ॥ १५८ ॥
१ कुटि प्रत्ययादेरादेशानुपपत्तिरनादित्वात् ।
२ पूर्वान्ते नलोपवचनम् ।
३ सिद्धं त्वादिष्टस्य कुग्वचनात् ।
४ कारिभ्य इञोऽगोत्रात्फिञ्विप्रतिषेधेन ।
पुत्रान्तादन्यतरस्याम् ॥ १५९ ॥
प्राचामवृद्धात् फिन् बहुलम् ॥ १६० ॥
मनोर्जातावञ्यतौ षुक् च[4] ॥ १६१ ॥

१ प. पुस्तके इतः परमधिकम् । व्यवहितत्वादप्रतिषेधः । २ इदं प. पुस्तके नास्ति । ३ प. पुस्तके इत: परमाधिकम् । सिद्धं त्वादिष्टस्य युड्वचनात् । ४ प. पुस्तके इतःपरमधिकम् । अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकः स्मृतः । नकारस्य च मूर्धन्यस्तेन सिध्यति माणवः ।

अपत्यं पौत्रप्रभृति गोत्रम् ॥ १६२ ॥

१ पौत्रप्रभृतेर्गोत्रसंज्ञायां यस्यापत्यं तस्य पौत्रप्रभृतिसंज्ञाकरणम् ।

२ जीवद्वंश्यं च कुत्सितम् ।

जीवति तु वंश्ये युवा ॥ १६३ ॥

१ जीवति तु वंश्ये युवेति पौत्रप्रभृत्यपेक्षं च ।

२ तच्च दैवदत्त्यर्थम् ।

३ वृद्धस्य च पूजायाम्[2] ।

४ आपत्यो वा गोत्रम् ।

५ परमप्रकृतेश्चापत्यः ।

६ आपत्याज्जीवद्वंश्यात्स्वार्थे द्वितीयो युवसंज्ञः ।

७ स चास्त्रियाम् ।

८ एको गोत्रग्रहणानर्थक्यं च ।

९ बहुवचनलोपिषु च सिद्धम् ।

भ्रातरि च ज्यायसि ॥ १६४ ॥

वान्यस्मिन्सपिण्डे स्थविरतरे जीवति[3] ॥ १६५ ॥

जनपदशब्दात्क्षत्रियादञ् ॥ १६६ ॥

१ क्षत्रियादेकराजात्संघप्रतिषेधार्थम् ।

२ क्षत्रियग्रहणानर्थक्ये चोक्तम्[4] ।

३ क्षत्रियसमानशब्दाज्जनपदात्तस्य राजन्यपत्यवत्[5] ।

साल्वेयगान्धारिभ्यां च ॥ १६७ ॥

द्व्यञ्मगधकलिङ्गसूरमसादण् ॥ १६८ ॥

१ अणो ञ्यङ्ण्येञो विप्रतिषेधेन ।

२ ञ्यङः कुर्वादिभ्यो ण्यः ।

वृद्धेत्कोसलाजादाञ्ञ्यङ् ॥ १६९ ॥

कुरुनादिभ्यो ण्यः ॥ १७० ॥

साल्वावयवप्रत्यग्रथकलकूटाश्मकादिञ् ॥ १७१ ॥

ते तद्राजाः ॥ १७२ ॥

कम्बोजाल्लुक् ॥ १७३ ॥

१ कम्बोजादिभ्यो लुग्वचनं चोडाद्यर्थम् ।

स्त्रियामवन्तिकुन्तिकुरुभ्यश्च ॥ १७४ ॥

अतश्च ॥ १७५ ॥

१ अत इति तदन्ताग्रहणमवन्त्यादिभ्यो लुग्वचनात् ।

२ यौधेयादिप्रतिषेधो ज्ञापकः पर्श्वादिलुकः ।

न प्राच्यभर्गादियौधेयादिभ्यः ॥ १७६ ॥

इति चतुर्थाध्यायस्य प्रथमः पादः ।

---

१ प. पुस्तके च स्थाने तु इति पाठः । २ वृद्धस्य च पूजायाम् । यूनश्च कुत्सायाम् । इति द्वयं वैदिकपुस्तके काशिकापुस्तके च सूत्रद्वयत्वेन परिगृहीतम् । बो. पुस्तके तथैव गृहीतम् किंतु ( ) इति चिह्नान्तर्गतं प्रदर्शितम् । वस्तुतस्तु द्वयमिदं वार्तिकम् । भाष्ये तथैव परिग्रहणात् । सर्वेषु पुस्तकेषु (प. बा. प्र. कं) वार्तिकत्वेनैव तयो कथनम् । प. पुस्तके वार्तिकद्वयस्य 'जीवति तु वंश्ये युवा' इति स्थलं प्रदर्शितम् । किंतु महाभाष्ये वृद्धस्य पूजायामित्येकमेव पूर्वोक्तस्थले लभ्यते । यूनश्च कुत्सयामिति तु नोपलभ्यते । अस्माभिर्वार्तिकपाठ एव ग्रहणं कृतम् । अत एव सूत्रत्वेनैतयोरग्रहः । ३ प. पुस्तके इतः परमधिकम् । गोत्रयुनोः समावेशे को दोषस्तत्कृतं भवेत् । यस्कादिषु न दोषोऽस्ति न यूनीत्यनुवर्तनात् । दोषोऽत्रिविदरथाला न यूनीत्यनुवर्तनात् । कण्वादिषु न दोषोऽस्ति न ह्यून्यस्ति ततः परम् । एको गोत्रे प्रतिपदम् । गोत्राद्यूनि च तत्स्मरेत । राजन्यादुत्सर्गस्य ज्ञापकं लौकिकं परम् । ४ प. पुस्तके नास्ति । ५ प. पुस्तके इतः परमधिकम् । पूरोरण्वक्तव्यः । पाण्डोर्ड्यण्वक्तव्यः । ६ प. पुस्तके चोडाद्यर्थम् । ७ क. पुस्तके इतः परमधिकम् । पर्श्वादिभ्यो लुग्वक्तव्यः ।

तेन रक्तं रागात् ॥ १ ॥

१ रक्तादीनामर्थाभिधाने प्रत्ययविधानादुपाध्यानर्थक्यम् ।

लाक्षारोचनाट्ठक् ॥ २ ॥

१ ठक्प्रकरणे शकलकर्दमाभ्यामुपसंख्यानम् ।

२ नील्या अन् ।

३ पीतात्कन् ।

४ हरिद्रामहारजनाभ्यामञ् ।

नक्षत्रेण युक्तः कालः ॥ ३ ॥

१ नक्षत्रेण चन्द्रमसो योगात्तद्युक्तात्काले प्रत्ययविधानम् ।

२ तत्रोत्तरपदलोपः ।

३ लिङ्गवचनानुपपत्तिश्च ।

४ कालयोगात्सिद्धम् ।

१ निष्ठायां सेड्ग्रहणमनिटि प्रतिषेधार्थमिति चेत्तत्सिद्धमनिडभावात् ।

२ एकाचो हि प्रतिषेधः ।

३ इड्भावार्थं तु तन्निमित्तत्वाल्लोपस्य ।

४ अवचने हि णिलोप इट्प्रतिषेधप्रसङ्गः ।

५ वृधिरमिशृधीनामुपसंख्यानं सार्वधातुकत्वात् ।

जनिता मन्त्रे ॥ ५३ ॥

शमिता यज्ञे ॥ ५४ ॥

अयामन्ताल्वाय्येत्न्विष्णुषु ॥ ५५ ॥

१ क्त्वाविटि णेर्गुणवचनम् ।

२ इत्नौ प्रत्ययान्तरकरणम् ।

३ अयादेशे चोपसंख्यानम् ।

ल्यपि लघुपूर्वात् ॥ ५६ ॥

१ ल्यपि लघुपूर्वस्येति चेद्व्यञ्जनान्तेषूपसंख्यानम् ।

---

१ प. पुस्तके इतः परमधिकम् । गमादीनामिति वक्तव्यम् । ऊङ् च । २ प. पुस्तके °रनुदात्त° इति पाठः । ३ प. पुस्तके इतः परमधिकम् । अतो लोपो यलोपश्च णिलोपश्च प्रयोजनम् । आल्लोप ईत्त्वमेत्त्वं च चिण्वद्भावश्च सीयुटि । ४ प. पुस्तके इतः परमधिकम् । निष्ठायां सेड्ग्रहणमनिटि प्रतिषेधार्थम् ।

२ अलोपे च गुरुपूर्वात्प्रतिषेधः ।

३ ल्यपि लघुपूर्वादिति वचनात्सिद्धम् ।

४ ह्रस्वादिषु चोक्तम् ।

विभाषापः[1] ॥ ५७ ॥

१ आपः सानुबन्धकनिर्देशादिङि सिद्धम् ।

युप्लुवोर्दीर्घश्छन्दसि ॥ ५८ ॥

क्षियः ॥ ५९ ॥

निष्ठायामण्यदर्थे ॥ ६० ॥

वाक्रोशदैन्ययोः ॥ ६१ ॥

स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च[2] ॥ ६२ ॥

१ चिण्वद्भाव उपदेशवचनमृकारगुणबलीयस्त्वात् ।

२ वधिभावात्सीयुटि चिण्वद्भावो विप्रतिषेधेन ।

३ हनिणिङादेशप्रतिषेधश्च ।

४ अङ्गस्येति तु प्रकरणादाङ्गशास्त्रातिदेशात्सिद्धम् ।

दीङो युडचि क्ङिति ॥ ६३ ॥

आतो लोप इटि च ॥ ६४ ॥

१ इड्ग्रहणमक्ङिदर्थम् ।

२ सार्वधातुके चादीत्यार्धधातुकाधिकारादुपसंख्यानम् ।

ईद्यति ॥ ६५ ॥

घुमास्थागापाजहातिसां हलि ॥ ६६ ॥

१ ईत्त्वे वकारप्रतिषेधो घृतं घृतपावान इति दर्शनात् ।

२ धीवरी पीवरीति चोक्तम् ।

एर्लिङि ॥ ६७ ॥

वान्यस्य संयोगादेः ॥ ६८ ॥

न ल्यपि ॥ ६९ ॥

मयतेरिदन्यतरस्याम् ॥ ७० ॥

लुङ्लङ्लृङ्क्ष्वडुदात्तः ॥ ७१ ॥

आडजादीनाम् ॥ ७२ ॥

छन्दस्यपि दृश्यते ॥ ७३ ॥

न माङ्योगे[3] ॥ ७४ ॥

बहुलं छन्दस्यमाङ्योगेऽपि ॥ ७५ ॥

इरयो रे ॥ ७६ ॥

अचि श्नुधातुभ्रुवां य्वोरियङुवङौ ॥ ७७ ॥

१ इयङादिप्रकरणे तन्वादीनां छन्दसि बहुलम् ।

अभ्यासस्यासवर्णे ॥ ७८ ॥

स्त्रियाः ॥ ७९ ॥

वाम्शसोः ॥ ८० ॥

इणो यण् ॥ ८१ ॥

एरनेकाचोऽसंयोगपूर्वस्य ॥ ८२ ॥

१ यणादेशः स्वरपदपूर्वोपधस्य च ।

१ प. पुस्तके नास्ति । २ प. पुस्तके इतः परमधिकम् । इडादेशस्य प्रतिषेधो वक्तव्यः । ३ प. पुस्तके इतः परमधिकम् । वृद्धिश्चिण्वद्युक्च हन्तेश्च घत्वं दीर्घश्चोक्तो यो मितां वा चिणीति । इडासिद्धस्तेन मे लुप्यते णिर्नित्यश्चायं वलिनमित्तो विघाती । ४ प. पुस्तके नास्ति । ५ प. पुस्तके इतः परमधिकम् । अजादीनामटा सिद्धम् । वृद्ध्यर्थामिति चेदटः । अस्वपो हसतीत्यत्र । धातौ वृद्धिमटः स्मरेत् । पररूपं गुणे नाटः । ओमाङोश्चसि तत्समम् । छन्दोर्थं बहुलं दीर्घम् । इणस्त्योरन्तरङ्गतः ।

२ असंयोगपूर्वे ह्यनिष्टप्रसङ्गः ।

ओः सुपि ॥ ८३ ॥

वर्षाभ्वश्च ॥ ८४ ॥

१ वर्षाभूपुनर्भ्वश्च ।

न भूसुधियोः ॥ ८५ ॥

छन्दस्युभयथा ॥ ८६ ॥

हुश्नुवोः सार्वधातुके ॥ ८७ ॥

१ हुश्नुग्रहणानर्थक्यमन्यस्याभावात् ।

२ यङ्लुगर्थमिति चेदार्धधातुकत्वात्सिद्धम् ।

भुवो वुग्लुङ्लिटोः ॥ ८८ ॥

ऊदुपधाया गोहः ॥ ८९ ॥

१ गोहिग्रहणं विषयार्थम् ।

२ अयादेशप्रतिषेधार्थं च ।

३ ह्रस्वादेशे ह्ययादेशप्रसङ्ग ऊत्त्वस्यासिद्धत्वात् ।

दोषो णौ ॥ ९० ॥

१ दोषिग्रहणं च ।

वा चित्तविरागे ॥ ९१ ॥

मितां ह्रस्वः ॥ ९२ ॥

चिण्णमुलोर्दीर्घो ऽन्यतरस्याम् ॥ ९३ ॥

१ चिण्णमुलोर्णिव्यपेतानां यङ्लोपे चान्तरङ्गलक्षणत्वात्सिद्धम् ।

खचि ह्रस्वः ॥ ९४ ॥

ह्लादो निष्ठायाम् ॥ ९५ ॥

छादेर्घे ऽद्व्युपसर्गस्य ॥ ९६ ॥

इस्मन्त्रन्क्विषु च ॥ ९७ ॥

गमहनजनखनघसां लोपः क्ङित्यनङि ॥ ९८ ॥

तनिपत्योश्छन्दसि ॥ ९९ ॥

घसिभसोर्हलि ॥ १०० ॥

१ हल्ग्रहणमनर्थकमन्यत्रापि दर्शनात् ।

हुझल्भ्यो हेर्धिः ॥ १०१ ॥

१ हेर्धित्वे हलधिकारादिटोऽप्रतिषेधः ।

श्रुशृणुपॄकृवृभ्यश्छन्दसि ॥ १०२ ॥

अङितश्च ॥ १०३ ॥

चिणो लुक् ॥ १०४ ॥

१ चिणो लुकि तग्रहणानर्थक्यं संघातस्याप्रत्ययत्वात् ।

२ तलोपस्य चासिद्धत्वात् ।

३ कार्यकृतत्वाद्वा ।

अतो हेः ॥ १०५ ॥

उतश्च प्रत्ययादसंयोगपूर्वात् ॥ १०६ ॥

१ उतश्च प्रत्ययाच्छन्दोवावचनम् ।

२ उत्तरार्थं च ।

लोपश्चास्यान्यतरस्यां म्वोः ॥ १०७ ॥

नित्यं करोतेः ॥ १०८ ॥

ये च ॥ १०९ ॥

---

१ प. पुस्तके नास्ति । २ प. पुस्तके इतः परमधिकम् । वर्षादृन्कारपुनःपूर्वस्य भुव इति वक्तव्यम् । ३ प. पुस्तके इतः परमधिकम् । यङ्लुगर्थम् । ४ प. पुस्तके इतः परमधिकम् । चिण्णमुलोर्णिव्यपेतानां यङ्लोपे च । ५ प. पुस्तके इतः परमधिकम् । अद्विप्रभृत्युपसर्गस्येति वक्तव्यम् । न वा एष लोके संप्रत्ययः । ६ व. का. म. क. बा. पुस्तकेषु चकारोऽधिकः । ७ प. पुस्तके इतः परमधिकम् । चिणो लुकि तग्रहणम् । ८ प. पुस्तके इतः परमधिकम् । स्यान्तस्य प्रतिषेधो वक्तव्यः ।

अत उत् सार्वधातुके[1] ॥ ११० ॥

१ कृञ उत्त्व उकारान्तनिर्देशात्स्यान्तस्याप्रतिषेधः ।

श्नसोरल्लोपः ॥ १११ ॥

श्नाभ्यस्तयोरातः ॥ ११२ ॥

ई हल्यघोः ॥ ११३ ॥

इद्दरिद्रस्य ॥ ११४ ॥

१ दरिद्रातेरार्धधातुके लोपः

२ सिद्धश्च प्रत्ययविधौ ।

३ वाद्यतन्याम् ।

भियोऽन्यतरस्याम् ॥ ११५ ॥

जहातेश्च ॥ ११६ ॥

आ च हौ ॥ ११७ ॥

लोपो यि ॥ ११८ ॥

घ्वसोरेद्धावभ्यासलोपश्च ॥ ११९ ॥

अत एकहल्मध्येऽनादेशादेर्लिटि ॥ १२० ॥

१ णकारषकारादेशादेरेत्त्ववचनं लिटि[2] ।

२ फलिभजिग्रहणं तु ज्ञापकमभ्यासादेशसिद्धत्वस्य ।

३ प्रथमतृतीयादीनामादेशादित्वादेत्त्वाभावः ।

४ न वा शसिदद्योः प्रतिषेधो ज्ञापको रूपाभेद एत्वविज्ञानस्य ।

५ दम्भ एत्त्वं नलोपस्यासिद्धत्वात्[3] ।

थलि च सेटि ॥ १२१ ॥

१ थल्ग्रहणमक्किदर्थम् ।

तॄफलभजत्रपश्च ॥ १२२ ॥

राधो हिंसायाम् ॥ १२३ ॥

१ राधादिषु स्थानिनिर्देशः ।

वा जॄभ्रमुत्रसाम् ॥ १२४ ॥

फणां च सप्तानाम् ॥ १२५ ॥

न शसददवादिगुणानाम् ॥ १२६ ॥

अर्वणस्त्रसावनञः ॥ १२७ ॥

मघवा बहुलम्[4] ॥ १२८ ॥

भस्य ॥ १२९ ॥

पादः पत् ॥ १३० ॥

१ पाद उपधाह्रस्वत्वम् ।

२ आदेशे हि सर्वादेशप्रसङ्गः ।

३ न वा निर्दिश्यमानस्यादेशत्वात् ।

४ प्रयोजनं सुप्तिङादेशे ।

५ ल्यब्भावे च ।

६ त्रिचतुर्युष्मदस्मत्यदादिविकारेषु च ।

७ उदः पूर्वत्वे ।

वसोः संप्रसारणम् ॥ १३१ ॥

वाह ऊठ् ॥ १३२ ॥

१ वाह ऊड्वचनानर्थक्यं संप्रसारणेन कृतत्वात् ।

---

१ प. पुस्तके इतः परमधिकम् । अनुप्रयोगे तु भुवास्त्यबाधनं स्मरन्ति कर्तुर्वचनान्मनीषिणः लोपे द्विर्वचनासिद्धिः । स्थानिवदिति चेत्कृते भवेद्द्वित्वे । नैवं सिध्यति कस्मात्प्रत्यङ्गत्वाद्धतोऽद्वि पररूपम् । तस्मिंश्च कृते लोपः । दीर्घत्वं बाधकं भवेत्तत्र । २ प. पुस्तके षकारणकारा° इति पाठः । ३ प. पुस्तके इतः परमधिकम् । नशिमन्योरलिट्येत्त्वम् । छन्दस्यमिपचोरपि । अनेशं मेनकेत्येतद्येमानं त्रिष्ठि पेचिरन् । यजायेजे वपावेपे दम्भ एत्त्वमलक्षणम् । श्रपोऽस्त्वे तकारेण ज्ञाप्यते त्वेत्वशासनम् । ४ प. पुस्तके इतः परमधिकम् । अर्वणस्तृ मघानेश्च न शिष्यं छान्दसं हि तत् । मतुब्वन्योर्विधानाच्च छन्दस्युभयदर्शनात् ।

२ गुणः प्रत्ययलक्षणत्वात् ।

३ एज्ग्रहणाद्वृद्धिः ।

श्वयुवमघोनामतद्धिते ॥ १३३ ॥

१ श्वादीनां प्रसारणे नकारान्तग्रहणमनकारान्तप्रतिषेधार्थम् ।

२ उक्तं वा ।

अल्लोपो ऽनः ॥ १३४ ॥

षपूर्वहन्धृतराज्ञामणि ॥ १३५ ॥

१ षपूर्वादीनां पुनर्वचनमल्लोपार्थम् ।

२ अवधारणे ह्यन्यत्र प्रकृतिभाव उपधालोपप्रसङ्गः ।

विभाषा ङिश्योः ॥ १३६ ॥

न संयोगाद्वमन्तात् ॥ १३७ ॥

अचः ॥ १३८ ॥

उद ईत् ॥ १३९ ॥

आतो धातोः ॥ १४० ॥

१ आतोऽनापः ।

मन्त्रेष्वाङ्यादेरात्मनः ॥ १४१ ॥

१ मन्त्रेष्वात्मनः प्रत्ययमात्रप्रसङ्गः[1] ।

२ आदिग्रहणानर्थक्यं चाकारप्रकरणात् ।

ति विंशतेर्डिति ॥ १४२ ॥

टेः[2] ॥ १४३ ॥

१ डित्यभस्याप्यनुबन्धकरणसामर्थ्यात् ।

नस्तद्धिते ॥ १४४ ॥

१ नकारान्तस्य टिलोपे सब्रह्मचारिपीठसर्पिकलापिकुथुमितैतिलिजाजलिलाङ्गलिशिलालिशिखण्डिसूकरसद्मसुपर्वणामुपसंख्यानम् ।

२ चर्मणः कोशे ।

३ अश्मनो विकारे ।

४ शुनः संकोचे ।

५ अव्ययानां च सायंप्रतिकाद्यर्थम् ।

अह्नष्टखोरेव ॥ १४५ ॥

ओर्गुणः ॥ १४६ ॥

ढे लोपो ऽकद्र्वाः ॥ १४७ ॥

यस्येति च ॥ १४८ ॥

१ यस्येत्यादौ श्यां प्रतिषेधः ।

२ इयङुवङ्भ्यां लोपो विप्रतिषेधेन ।

३ गुणवृद्धी च ।

४ न वेयङुवङादेशस्यान्यविषये वचनात् ।

५ तस्मात्तत्र गुणवृद्धिविषये प्रतिषेधः ।

सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः ॥ १४९ ॥

१ सूर्यादीनामणन्तेऽप्रसिद्धिरङ्गान्यत्वात् ।

२ सिद्धं तु स्थानिवत्प्रतिषेधात् ।

३ उपधाग्रहणानर्थक्यं च ।

४ विषयपरिगणनं च ।

५ सूर्यमत्स्ययोर्ङ्याम् ।

६ सूर्यागस्त्ययोश्छे च ।

७ तिष्यपुष्ययोर्नक्षत्राणि ।

८ अन्तिकस्य तसि कादिलोप आद्युदात्तत्वं च ।

९ तमे तादेश्च[3] ।

१–२ प.पुस्तके नास्ति । ३ प. पुस्तके इतः परमधिकम् । छान्दसत्वात्सिद्धम् । ४ प. पुस्तक इतः परमधिकम् । अभस्योपसंख्यानम् । ५ प. पुस्तक इतः परमधिकम् । तसीत्येष न वक्तव्यो दृष्टो दाशतयेऽपि हि । घौ लोपोऽन्तिषादत्यत्र तथाष्टौ येऽन्त्यथर्वसु ।

हलस्तद्धितस्य ॥ १५० ॥

आपत्यस्य च तद्धिते ऽनाति ॥ १५१ ॥

क्यच्व्योश्च ॥ १५२ ॥

बिल्वकादिभ्यश्छस्य लुक् ॥ १५३ ॥

तुरिष्ठेमेयस्सु ॥ १५४ ॥

१ तुः सर्वलोपविज्ञानमन्त्यस्य वचनानर्थक्यात् ।

टेः ॥ १५५ ॥

१ णाविष्ठवत्प्रातिपदिकस्य ।

२ पुंवद्भावरभावटिलोपयणादिपरार्थम्[1] ।

स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादि परं पूर्वस्य च गुणः ॥ १५६ ॥

प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्बंहिगर्वषित्रब्द्राघिवृन्दाः ॥ १५७ ॥

बहोर्लोपो भू च बहोः ॥ १५८ ॥

इष्ठस्य यिट् च ॥ १५९ ॥

ज्यादादीयसः ॥ १६० ॥

र ऋतो हलादेर्लघोः ॥ १६१ ॥

विभाषर्जोश्छन्दसि ॥ १६२ ॥

प्रकृत्यैकाच् ॥ १६३ ॥

१ प्रकृत्यैकाजिष्ठेमेयःसु चेदेकाच उच्चारणसामर्थ्यादवचनात्प्रकृति भावः ।

२ विन्मतोस्तु लुगर्थम् ।

३ प्रकृत्याके राजन्यमनुष्ययुवनः ।

इनण्यनपत्ये ॥ १६४ ॥

गाथिविदथिकेशिगणिपणिनश्च ॥१६५॥

संयोगादिश्च ॥ १६६ ॥

अन् ॥ १६७ ॥

ये चाभावकर्मणोः ॥ १६८ ॥

आत्माध्वानौ खे ॥ १६९ ॥

न मपूर्वो ऽपत्ये ऽवर्मणः ॥ १७० ॥

१ मपूर्वात्प्रतिषेधे वा हितनाम्नः ।

ब्राह्मो ऽजातौ ॥ १७१ ॥

१ ब्राह्मस्याजातौ लोपार्थं वचनम् ।

२ तत्राप्राप्तविधाने प्राप्तप्रतिषेधः ।

३ न वा पर्युदाससामर्थ्यात् ।

कार्मस्ताच्छील्ये ॥ १७२ ॥

औक्षमनपत्ये ॥ १७३ ॥

दाण्डिनायनहास्तिनायनाथर्वणिकजैह्माशिनेयवासिनायनिभ्रौणहत्यधैवत्यसारवैक्ष्वाकमैत्रेयहिरण्मयानि ॥ १७४ ॥

१ भ्रौणहत्ये तत्वनिपातनानर्थक्यं सामान्येन कृतत्वात् ।

२ ज्ञापकं तु तद्धिते तत्वप्रतिषेधस्य ।

३ ऐक्ष्वाकस्य स्वरभेदान्निपातनं पृथक्त्वेन ।

४ एकश्रुत्या निर्देशात्सिद्धम् ।

५ मैत्रेये ढञि यादिलोपनिपातनम् ।

६ हिरण्मये यलोपवचनम् ।

७ हिरण्ययस्य च्छन्दसि मलोपवचनात्सिद्धम् ।

१ प. पुस्तके इतः परमधिकम् । विजयिष्ठकरिष्ठयोर्गुणदर्शनात् । २ प. पुस्तके इतः परमधिकम् । णाविष्ठवत्प्रातिपदिकस्य पुंवद्भावरभावटिलोपयणादिपरप्रादिविन्मतोर्लुक्त्विष्यर्थम्' इति भारद्वाजीयाः । ३ प. पुस्तके इतः परमधिकम् । पृथुमृदुकृशभृशदृढपरिवृढानामिति वक्तव्यम् ।

ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानि च्छन्दसि ॥ १७५ ॥

॥ इति षष्ठाध्यायस्य चतुर्थः पादः ॥

सप्तमोऽध्यायः ।

युवोरनाकौ ॥ १ ॥

१ युवोरनाकाविति चेद्धातुप्रतिषेधः ।

२ भुज्य्वादीनां च ।

३ अनुनासिकपरत्वात्सिद्धम् ।

४ तत्र ङीब्नुमोः प्रतिषेधः ।

५ धात्वन्तस्य च ।

६ षिट्टित्करणं तु ज्ञापकमुगित्कार्याभावस्य ।

७ न वा षित्करणं ङीष्विधानार्थम् ।

८ टित्करणमनुपसर्जनार्थम् ।

९ विप्रतिषेधात्तु टापो बलीयस्त्वम् ।

१० धात्वन्तस्य चार्थवद्ग्रहणात्[1] ।

११ नुम्विधौ झल्ग्रहणम्[2] ।

१२ लिङ्गविशिष्टप्रतिषेधार्थम् ।

१३ न वा विभक्तौ लिङ्गविशिष्टाग्रहणात् ।

१४ प्रयोजनं शुनः स्वरे ।

१५ यूनः संप्रसारणे ।

१६ उगिदचां नुम्विधौ ।

१७ अनडुहश्चाम्विधौ ।

१८ पथिमथोरात्त्वे ।

१९ पुंसोऽसुङ्विधौ ।

२० सख्युर्णित्त्वानङौ ।

२१ भवद्भगवदघवतामोद्भावे ।

२२ सिद्धं तु युवोरनुनासिकत्वात् ।

आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् ॥ २ ॥

१ आयनादिषूपदेशिवद्वचनं स्वरसिद्ध्यर्थम् ।

२ न वा क्वचिच्चित्करणादुपदेशिवद्वचनानर्थक्यम् ।

३ तत्रोणादिप्रतिषेधः ।

४ धातोर्वेयङ्वचनात् ।

५ प्रातिपदिकविज्ञानाच्च पाणिनेः सिद्धम् ।

झो ऽन्तः ॥ ३ ॥

२ झादेशे धात्वन्तप्रतिषेधः[3] ।

२ प्रत्ययाधिकारात्सिद्धमिति चेदनादेशादेशवचनम् ।

३ असमासनिर्देशात्सिद्धम् ।

४ तत्र शयान्ता इत्यनकारान्तत्वादङ्गस्याद्भावप्रतिषेधः ।

५ सिद्धमनानन्तर्यादनकारान्तेनाद्भावनिवृत्तिः ।

६ तत्र रुटि संनियोगवचनात्सिद्धम् ।

अदभ्यस्तात् ॥ ४ ॥

आत्मनेपदेष्वनतः ॥ ५ ॥

शीङो रुट् ॥ ६ ॥

---

१ प. पुस्तके चार्थवत्त्वादिति पाठः । २ प. पुस्तके °ग्रहणमिति । ३ प. पुस्तके इतः परमधिकम् । प्रत्ययाधिकारात्सिद्धम् ।

१ रुटि दृशिगुणप्रतिषेधः ।

२ पूर्वान्ते शीङो गुणविधिः ।

३ झादेशादाड्लेटि ।

४ न वा नित्यत्वादाटः ।

५ अन्तरङ्गलक्षणत्वाच्च ।

वेत्तेर्विभाषा ॥ ७ ॥

बहुलं छन्दसि ॥ ८ ॥

अतो भिस ऐस् ॥ ९ ॥

बहुलं छन्दसि ॥ १० ॥

नेदमदसोरकोः ॥ ११ ॥

टाङसिङसामिनात्स्याः ॥ १२ ॥

ङेर्यः ॥ १३ ॥

सर्वनाम्नः स्मै ॥ १४ ॥

१ अश एकादिष्टात्स्मायादीनामुपसंख्यानम् ।

२ न वा बहिरङ्गलक्षणत्वात् ।

ङसिङ्योः स्मात्स्मिनौ ॥ १५ ॥

पूर्वादिभ्यो नवभ्यो वा ॥ १६ ॥

जसः शी ॥ १७ ॥

औङ आपः ॥ १८ ॥

नपुंसकाच्च ॥ १९ ॥

जश्शसोः शिः ॥ २० ॥

अष्टाभ्य औश्[1] ॥ २१ ॥

षड्भ्यो लुक्[2] ॥ २२ ॥

स्वमोर्नपुंसकात् ॥ २३ ॥

१ स्वमोर्लुक् त्यदादिभ्यश्चे[3] ।

२ शिशीलुम्नुम्विधिषुः नपुंसकग्रहणं शब्दग्रहणं चेदन्यपदार्थे प्रतिषेधः ।

३ सिद्धं प्रकृतार्थे विशेषणत्वात् ।

४ अस्थ्यादिषु शब्दग्रहणम् ।

अतोऽम् ॥ २४ ॥

अद् डतरादिभ्यः पञ्चभ्यः ॥ २५ ॥

१ अद्भावे पूर्वसवर्णप्रतिषेधः ।

२ सिद्धमनुनासिकोपधत्वात् ।

३ टुकरणाद्वा ।

४ डित्करणाद्वा ।

नेतराच्छन्दसि ॥ २६ ॥

१ इतराच्छन्दसि प्रतिषेध एकतरात्सर्वत्र ।

२ नपुंसकादेशेभ्यो युष्मदस्मदोर्विभक्त्यादेशा विप्रतिषेधेन ।

युष्मदस्मद्भ्यां ङसोऽश् ॥ २७ ॥

१ ङस आदेशे शित्करणानर्थक्यमकारस्याकारवचनानर्थक्यात् ।

२ अर्थवत्त्वादेशे लोपार्थम् ।

३ तस्माच्छित्करणम् ।

ङेप्रथमयोरम् ॥ २८ ॥

शसो न[4] ॥ २९ ॥

भ्यसोऽभ्यम् ॥ ३० ॥

पञ्चम्या अत् ॥ ३१ ॥

एकवचनस्य च ॥ ३२ ॥

---

१ प. पुस्तके इतः परमधिकम् । एत्त्वं भिसि परत्वाच्चेदत ऐस्क भविष्यति । कृत एत्त्वे भौतपूर्व्यात् । ऐस्तु नित्यस्तथा सति । २ प. पुस्तके इतः परमधिकम् । औशघौ । अस्तु लुक्तत्र । षड्भ्योऽप्येवं प्रसज्यते । अपवादः । यस्य विषये । यो वा तस्मादनन्तरः । आत्वं यत्र तु तत्रौश्त्वम् । तथा ह्यस्य ग्रहः कृतः । ३ प. पुस्तके इतः परमधिकम् । कृते स्यत्वे न लुग्भवेत् । ४ बोथलिंग पुस्तके नः इति पाठः ।

साम आकम् ॥ ३३ ॥

१ साम्ग्रहणं यथागृहीतस्यादेशवचनात् ।

२ न वा द्विपर्यन्तानामकारवचनादामिसकाराभावः ।

३ सुट्प्रतिषेधस्त्वादेशे लोपविज्ञानात् ।

४ न वा टिलोपवचनादादेशे टाप्प्रतिषेधार्थम् ।

५ न वा लिङ्गाभावाट्टिलोपवचनानर्थक्यम् ।

६ तस्मात्सुट्प्रतिषेधः ।

आत औ णलः ॥ ३४ ॥

तुह्योस्तातङाशिष्यन्यतरस्याम् ॥ ३५ ॥

विदेः शतुर्वसुः ॥ ३६ ॥

१ विदेर्वसोः कित्त्वम् ।

समासेऽनञ्पूर्वे क्त्वो ल्यप् ॥ ३७ ॥

१ ल्यबादेश उपदेशिवद्वचनम् ।

२ अनादिष्टार्थम् ।

३ बहिरङ्गलक्षणत्वात् ।

४ स्नात्वाकालकादिषु च प्रतिषेधः ।

५ तदन्तनिर्देशात्सिद्धम् ।

६ समासनिपातनाद्वा ।

७ अनञो वा परस्य ।

क्त्वापि च्छन्दसि ॥ ३८ ॥

सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः ॥ ३९ ॥

१ इयाडियाजीकाराणामुपसंख्यानम्[1] ।

अमो मश्[2] ॥ ४० ॥

लोपस्त आत्मनेपदेषु ॥ ४१ ॥

ध्वमो ध्वात् ॥ ४२ ॥

यजध्वैनमिति च ॥ ४३ ॥

तस्य तात् ॥ ४४ ॥

तप्तनप्तनथनाश्च ॥ ४५ ॥

इदन्तो मसि ॥ ४६

क्त्वो यक् ॥ ४७ ॥

इष्ट्वीनमिति च ॥ ४८ ॥

स्नात्व्यादयश्च ॥ ४९ ॥

अङ्गसेरसुक् ॥ ५० ॥

अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि ॥ ५१ ॥

१ अश्ववृषयोर्मैथुनेच्छायाम् ।

२ क्षीरलवणयोर्लालसायाम्[4] ।

आमि सर्वनाम्नः सुट् ॥ ५२ ॥

त्रेस्त्रयः ॥ ५३ ॥

ह्रस्वनद्यापो नुट् ५४ ॥

षट्चतुर्भ्यश्च ॥ ५५ ॥

श्रीग्रामण्योश्छन्दसि ॥ ५६ ॥

गोः पादान्ते ॥ ५७ ॥

इदितो नुम् धातोः ॥ ५८ ॥

---

१ प. पुस्तके इतः परमधिकम् । सुपां च सुपो भवन्तीति वाच्यम् । तिङां च तिङो भवन्तीति वाच्यम् । २ प. पुस्तके इतः परमधिकम् । आङ्याजयारां चोपसंख्यानम् । ३ प. पुस्तके इतः परमधिकम् । अमो मश्च मकारस्य । वचनादन्यचाधनम् । द्विमकार इडपृक्ते यकारादौ न दुष्यति । ४ प. पुस्तके इतः परमधिकम् । सर्वप्रातिपदिकेभ्यो लालसायामिति वक्तव्यं दध्यस्यति मध्वस्यतीत्येवमर्थम् । सुग्वक्तव्यो दधिस्यति मधुस्यतीत्येवमर्थम् ।

१ नुम्विधावुपदेशिवद्वचनं प्रत्ययविध्यर्थम् ।

२ इतरथा ह्यनकारे प्रत्ययः ।

३ तत्रायथेष्टप्रसङ्गः ।

४ धातुग्रहणसामर्थ्याद्वा तदुपदेशे नुम्विधानम् ।

शे मुचादीनाम् ॥ ५९ ॥

१ शे तृम्पादीनाम् ।

२ लुप्तनकारत्वात् ।

मस्जिनशोर्झलि ॥ ६० ॥

रधिजभोरचि ॥ ६१ ॥

नेट्यलिटि रधेः ॥ ६२ ॥

रभेरशब्लिटोः ॥ ६३ ॥

लभेश्च ॥ ६४ ॥

आङो यि ॥ ६५ ॥

उपात्प्रशंसायाम् ॥ ६६ ॥

उपसर्गात्खल्घञोः ॥ ६७॥

न सुदुर्भ्यां केवलाभ्याम् ॥ ६८ ॥

१ सुदुरोः केवलग्रहणमन्योपसर्गप्रतिषेधार्थम् ।

विभाषा चिण्णमुलोः ॥ ६९ ॥

१ चिण्णमुलोरनुपसर्गस्य ।

उगिदचां सर्वनामस्थानेऽधातोः ॥७०॥

१ उगित्यञ्चतिग्रहणात्सिद्धमधातोः ।

युजेरसमासे ॥ ७१ ॥

नपुंसकस्य झलचः ॥ ७२ ॥

१ झलचो नुम्विधावुगित्प्रतिषेधः ।

२ विप्रतिषेधात्सिद्धम् ।

३ पुनःप्रसङ्ग इति चेदमादिभिस्तुल्यम् ।

४ तत्र बहूर्जि प्रतिषेधः ।

५ अन्त्यात्पूर्वं नुममेके ।

इकोऽचि विभक्तौ[१] ॥ ७३ ॥

१ इकोऽचि विभक्तावज्ग्रहणं नुम्नुटोर्विप्रतिषेधार्थम् ।

२ इतरथा हि नुमो नित्यनिमित्तत्वान्नुडभावः ।

३ उत्तरार्थं च ।

तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य ॥ ७४ ॥

१ पुंवदिति नुम्प्रतिषेधश्चेद्गुणनाभावनुडौत्वप्रतिषेधः ।

२ ह्रस्वाभावार्थं च ।

३ अर्थातिदेशात्सिद्धम् ।

४ तद्धितलुक्प्रतिषेधश्च ।

५ न वा समानायामाकृतौ भाषितपुंस्कविज्ञानात् ।

अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः ।७५।

छन्दस्यपि दृश्यते ॥ ७६ ॥

ई च द्विवचने ॥ ७७ ॥

नाभ्यस्ताच्छतुः ॥ ७८ ॥

वा नपुंसकस्य ॥ ७९ ॥

आच्छीनद्योर्नुम् ॥ ८० ॥

शप्श्यनोर्नित्यम् ॥ ८१ ॥

सावनडुहः ॥ ८२ ॥

१ प. पुस्तके इतः परमधिकम् । इकोऽचि व्यञ्जने मा भूत् । अस्तुलोपः । स्वरः कथनम् । स्वरो वै श्रूयमाणेऽपि । लुप्ते किं न भविष्यति ।

१ अनडुहः सावाम्प्रतिषेधो नुमोऽनवकाशत्वात् ।
२ न वावर्णोपधस्य नुम्वचनात् ।
३ पुनःप्रसङ्गविज्ञानाद्वा सिद्धम् ।
४ यथात्त्वादिषु द्विर्वचनम् ।

दृक्स्ववःस्वतवसां छन्दसि ॥ ८३ ॥

दिव औत् ॥ ८४ ॥

१ दिव औत्त्वे धातुप्रतिषेधः ।
२ अधात्वधिकारात्सिद्धमिति चेन्नपुंसके दोषः ।
३ उक्तं[2] वा ।

पथिमथ्यृभुक्षामात् ॥ ८५ ॥

इतोऽत् सर्वनामस्थाने ॥ ८६ ॥

१ इतोऽद्वचनम[3]नर्थकमाकारप्रकरणात् ।
२ षपूर्वार्थं तु ।

थो न्थः ॥ ८७ ॥

भस्य टेर्लोपः ८८ ॥

पुंसोऽसुङ् ॥ ८९ ॥

१ असुङ्युपदेशिवद्वचनं स्वरासिद्ध्यर्थं बहिरङ्गलक्षणत्वात् ।

गोतो णित् ॥ ९० ॥

१ गोतः सर्वनामस्थाने णित्कार्यातिदेशः ।
२ सर्वनामस्थाने णित्त्ववचने ह्यसंप्रत्ययः षष्ठ्यनिर्देशात् ।
३ तपरकरणमनर्थकं स्थानिवत्प्रतिषेधात् ।
४ इतरथा हि संबुद्धिजसोः प्रतिषेधः ।

णलुत्तमो वा ॥ ९१ ॥

सख्युरसंबुद्धौ ॥ ९२ ॥

अनङ् सौ ॥ ९३ ॥

ऋदुशनस्पुरुदंसोऽनेहसां च ॥ ९४ ॥

तृज्वत् क्रोष्टुः ॥ ९५ ॥

स्त्रियां च[4] ॥ ९६ ॥

१ तृज्वदिति शास्त्रातिदेशश्चेद्यथा चिणि तद्वत् ।
२ तत्र रपरवचनम् ।
३ रूपातिदेश इति चेत्सर्वादेशप्रसङ्गः ।
४ सिद्धं तु रूपातिदेशात् ।
५ सिद्धं तु प्रत्ययग्रहणे यस्मात्स तदादितदन्तविज्ञानात् ।
६ आन्तरतम्याच्च सिद्धम् ।
७ तृज्वद्वचनमनर्थकं तृज्विषये तृचो मृगवाचित्वात् ।
८ तुनो निवृत्त्यर्थमिति चेत्सिद्धं यथान्यत्रापि ।
९ वावचनानर्थक्यं च स्वभावसिद्धत्वात् ।
१० गुणवृद्ध्यौत्त्वतृज्वद्भावेभ्यो नुम्पूर्वविप्रतिषिद्धम् ।
११ नुमचिरतृज्वद्भावेभ्यो नुट् ।
१२ न वा नुड्विषये रप्रतिषेधात् ।
१३ इतरथा हि सर्वापवादः ।
१४ तस्मान्नुड्विषये रप्रतिषेधः ।

विभाषा तृतीयादिष्वचि ॥ ९७ ॥

---

१ प. पुस्तके इतः परमधिकम् । अधात्वधिकारात्सिद्धम् । २ प. पुस्तके नास्ति । ३ प. पुस्तके 'मनर्थक' इति नास्ति । ४ प. पुस्तके इतः परमधिकम् । तृज्वत्स्त्रियां विभक्तौ चेत्क्रोष्ट्रीभक्तिर्न सिध्यति । ईकारे तन्निमित्तः सः गौरादिषु न पठ्यते । तेनैव भावनं चेत्स्यादनिष्टोऽपि प्रसज्यते ।

चतुरनडुहोरामुदात्तः ॥ ९८ ॥

१ आमनडुहः स्त्रियां वा ।

अम् संबुद्धौ ॥ ९९ ॥

ऋत इद्धातोः ॥ १०० ॥

उपधायाश्च ॥ १०१ ॥

उदोष्ठ्यपूर्वस्य ॥ १०२ ॥

बहुलं छन्दसि ॥ १०३ ॥

॥ इति सप्तमाध्यायस्य प्रथमः पादः ॥

सिचि वृद्धिः परस्मैपदेषु ॥ १ ॥

१ सिचि वृद्धावोकारप्रतिषेधः[१] ।

२ ओकाराद्वृद्धिर्विप्रतिषेधेनेति चेदोत्त्वाभावः ।

३ पुनः प्रसङ्गविज्ञानाद्वा सिद्धं यथा प्रसारणादिषु द्विर्वचनम् ।

४ सौढामित्रौ बहिरङ्गलक्षणत्वात्सिद्धम् ।

अतो ल्रान्तस्य ॥ २ ॥

वदव्रजहलन्तस्याचः ॥ ३ ॥

१ हल्ग्रहणमिटि प्रतिषेधार्थम् ।

२ नवानन्तरप्रतिषेधात् ।

३ तच्चानन्त्यार्थम् ।

४ अन्त्यस्य वचनानर्थक्यात् ।

५ अतो विभाषार्थमिति चेत्सिद्धं वृद्धेर्लोपबलीयस्त्वात्[३] ।

नेटि ॥ ४ ॥

ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम् ॥५॥

ऊर्णोतेर्विभाषा ॥ ६ ॥

अतो हलादेर्लघोः ॥ ७ ॥

नेड्वशि कृति ॥ ८ ॥

१ नेड्वश्यनादौ कृति ।

तितुत्रतथसिसुसरकसेषु च ॥९ ॥

१ तितुत्रेष्वग्रहादीनाम् ।

एकाच उपदेशेऽनुदात्तात् ॥ १० ॥

१ एकाज्ग्रहणं जागर्त्यर्थम् ।

२ वध इट्प्रतिषेधः संनिपात एकाच्त्वात्प्रकृतेश्चानुदात्तत्वात् ।

३ एकाच उपदेशेऽनुदात्तादित्युपदेशवचनमनुदात्तविशेषणं चेत्कृञादिभ्यो लिटि नियमानुपपत्तिरप्राप्तत्वात्प्रतिषेधस्य ।

४ तत्र पचादिभ्य इड्वचनम् ।

५ सनश्चेट्प्रतिषेधः ।

६ उभयविशेषणत्वात्सिद्धम् ।

७ यङ्लोपे च तदन्तद्विर्वचनात् ।

श्र्युकः किति ॥ ११ ॥

सनि ग्रहगुहोश्च ॥ १२ ॥

कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि ॥ १३ ॥

१ कृञोऽसुटः ।

श्वीदितो निष्ठायाम् ॥ १४ ॥

१ श्विग्रहणमिदन्तत्वादुपदेशस्य ।

---

१ प पुस्तके इतः परमधिकम् । इत्त्वोत्त्वाभ्यां गुणवृद्धी विप्रतिषेधेन । २ प. पुस्तके इतः परमधिकम् । ओकाराद्वृद्धिर्विप्रतिषेधेन । ३ प. पुस्तके इतः परमधिकम् । एकाचस्तो वलीनि वा ।

यस्य विभाषा ॥ १५ ॥

१ यस्य विभाषाविदेः ।

आदितश्च ॥ १६ ॥

विभाषा भावादिकर्मणोः ॥ १७ ॥

क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमःसक्ताविस्पष्टस्वरानायासभृशेषु ॥ १८ ॥

१ क्षुब्धं मन्थाभिधाने ।

२ स्वान्तं मनोऽभिधाने ।

३ ध्वान्तं तमोऽभिधाने ।

धृषिशसी वैयात्ये ॥ १९ ॥

दृढः स्थूलबलयोः २० ॥

१ दृढनिपातनं नकारहकारलोपार्थं परस्य च ढत्वार्थम् ।

२ अनिड्वचने हि रभावाप्रसिद्धिरलघुत्वात्।

३ नलोपवचनं च ।

प्रभौ परिवृढः ॥ २१ ॥

१ परिवृढनिपातनं च ।

कृच्छ्रगहनयोः कषः ॥ २२ ॥

घुषिरविशब्दने ॥ २३ ॥

अर्देः संनिविभ्यः ॥ २४ ॥

अभेश्चाविदूर्ये ॥ २५ ॥

णेरध्ययने वृत्तम् ॥ २६ ॥

१ वृत्तनिपातने णिग्रहणमण्यन्तस्यावधारणप्रतिषेधार्थम् ।

२ निपातनं णिलोपेड्गुणप्रतिषेधार्थम् ।

वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः ॥ २७ ॥

१ दान्तशान्तयोरुपधादीर्घत्वं च ।

२ स्पष्टच्छन्नयोरुपधाह्रस्वत्वं च ।

रुष्यमत्वरसंघुषास्वनाम् ॥ २८ ॥

१ घुषिस्वनोर्वावचनमिट्प्रतिषेधाद्विप्रतिषेधेन ।

हृषेर्लोमसु ॥ २९ ॥

अपचितश्च ॥ ३० ॥

हु ह्वरेश्छन्दसि ॥ ३१ ॥

अपरिह्वृताश्च ॥ ३२ ॥

सोमे ह्वरितः ॥ ३३ ॥

ग्रसितस्कभितस्तभितोत्तभितचत्तविकस्ता विशस्तृशंस्तृशास्तृतरुतृतरूतृवरुतृवरूतृवरूत्रीरुज्ज्वलिति क्षरिति क्षमिति वमित्यमितीति च॥ ३४ ॥

आर्धधातुकस्येड्वलादेः ॥ ३५ ॥

स्नुक्रमोरनात्मनेपदनिमित्ते ॥ ३६ ॥

१ स्नुक्रमोरनात्मनेपदनिमित्ते चेत्कृत्युपसंख्यानम् ।

२ आत्मनेपदपरप्रतिषेधे तत्परपरसीयुडेकादेशेषु प्रतिषेधः ।

३ सिद्धं तु स्नोरात्मनेपदेन समानपदस्थस्येट्प्रतिषेधात् ।

४ क्रमश्च ।

५ कर्तरि चात्मनेपदविषयात्कृति ।

ग्रहोऽलिटि दीर्घः ॥ ३७ ॥

१ ग्रहेर्दीर्घत्व इड्ग्रहणम् ।

२ अग्रहणे ह्यसंप्रत्ययः षष्ठ्यभावात् ।

१ प. पुस्तके इतः परमाधिकम् । हृषेर्लोमकेशकर्तृकस्येति वक्तव्यम् । विस्मितप्रतीघातयोरिति वक्तव्यम् । किनि नित्यमिति वक्तव्यम् ।

३ चिण्वदिटः प्रतिषेधः ।

४ यङ्लोपे च ।

५ इड्दीर्घ इति चेद्विप्रतिषिद्धम् ।

६ प्रतिषिद्धस्य च पुनर्विधाने दीर्घत्वाभावः।

७ यङ्लोपे [1]चोक्तम् ।

वृतो वा ॥ ३८ ॥

न लिङि ॥ ३९ ॥

सिचि च परस्मैपदेषु ॥ ४० ॥

इट् सनि वा ॥ ४१ ॥

लिङ्सिचोरात्मनेपदेषु ॥ ४२ ॥

ऋतश्च संयोगादेः ॥ ४३ ॥

स्वरतिसूतिसूयतिधूञूदितो वा ॥ ४४ ॥

१ पुनर्वावचनं लिङ्सिचोर्निवृत्यर्थम् ।

२ स्वरतिरुदात्तः ।

३ वावचनं निवृत्त्यर्थम् ।

४ अनुदात्ते हि किति वाप्रसङ्गः प्रतिषिध्य पुनर्विधानात् ।

रधादिभ्यश्च ॥ ४५ ॥

निरः कुषः ॥ ४६ ॥

इण्निष्ठायाम् ॥ ४७ ॥

१ इड्ग्रहणं नित्यार्थम् ।

तीषसहलुभरुषरिषः॥ ४८ ॥

१ इषेस्तकारे श्यन्प्रत्ययात्प्रतिषेधः ।

सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम् ॥ ४९ ॥

क्लिशः क्त्वानिष्ठयोः ॥ ५० ॥

पूङश्च ॥ ५१ ॥

वसतिक्षुधोरिट् ॥ ५२ ॥

१ पुनरिड्ग्रहणं नित्यार्थम् ।

अञ्चेः पूजायाम् ॥ ५३ ॥

लुभो विमोहने ॥ ५४ ॥

जॄव्रश्च्योः क्त्वि ॥ ५५ ॥

उदितो वा ॥ ५६ ॥

सेऽसिचि कृतचृतच्छृदतृदनृतः ॥ ५७ ॥

गमेरिट् परस्मैपदेषु ॥ ५८ ॥

१ गमेरिट्परस्मैपदेषु चेत्कृत्युपसंख्यानम् ।

२ आत्मनेपदपरप्रतिषेध [2]उक्तम् ।

३ सिद्धं तु गमेरात्मनेपदेन समानपदस्थस्येट्प्रतिषेधात् ।

न वृद्भ्यश्चतुर्भ्यः ॥ ५९ ॥

१ वृतादिप्रतिषेधे च[3] ।

२ आत्मनेपदपर इड्वचने तत्परपरसीयुडेकादेशेष्विड्वचनम् ।

३ सिद्धं तु वृतादीनामात्मनेपदेन समानपदस्थस्येड्वचनात् ।

४ चतुस्तासिक्लृपिग्रहणानर्थक्यं च ।

५ निवृत्तत्वात्सकारस्य ।

तासि च क्लृपः ॥ ६० ॥

अचस्तास्वत् थल्यनिटो नित्यम् ॥ ६१॥

उपदेशेऽत्वतः ॥ ६२ ॥

१ तासावत्वत्प्रतिषेधे घसेः प्रतिषेधप्रसङ्गोऽकारवत्त्वात् ।

२ सिद्धं तु हलादिग्रहणात् ।

३ तस्य चाभावात्तासौ ।

१–२ प. पुस्तके नास्ति । ३ प. पुस्तके कृत्युपसंख्यानम् इत्यधिकम् ।

ऋतो भारद्वाजस्य ॥ ६३ ॥

१ ऋतो भारद्वाजस्येति नियमानुपपत्तिरप्राप्तत्वात्प्रतिषेधस्य ।

२ तत्र पचादिभ्य इड्वचनम् ।

३ योगविभागात्सिद्धम् ।

बभूथा ततन्थ जगृभ्म ववर्थेति निगमे ॥ ६४ ॥

विभाषा सृजिदृशोः ॥ ६५ ॥

इडत्त्यर्तिव्ययतीनाम् ॥ ६६ ॥

वस्वेकाजाद्घसाम् ॥ ६७ ॥

१ वस्वेकाजाद्घसांवचनं नियमार्थम् ।

२ घसिग्रहणमनच्कत्वात् ।

विभाषा गमहनविदविशाम् ॥ ६८ ॥

सनिं ससनिवांसम् ॥ ६९ ॥

ऋद्धनोः स्ये ॥ ७० ॥

१ स्वरतेर्वेट्त्वाद्धतः स्ये विप्रतिषेधेन ।

अञ्जेः सिचि ॥ ७१ ॥

स्तुसुधूञ्भ्यः परस्मैपदेषु ॥ ७२ ॥

यमरमनमातां सक् च ॥ ७३ ॥

स्मिपूङ्रञ्ज्वशां सनि ॥ ७४ ॥

किरश्च पञ्चभ्यः ॥ ७५ ॥

रुदादिभ्यः सार्वधातुके ॥ ७६ ॥

ईशः से ॥ ७७ ॥

ईडजनोर्ध्वे च ॥ ७८ ॥

लिङः सलोपोऽनन्त्यस्य ॥ ७९ ॥

अतो येयः ॥ ८० ॥

आतो ङितः ॥ ८१ ॥

आने मुक् ॥ ८२ ॥

१ मुकि स्वरे दोषः ।

२ अभक्ते च ।

३ परादौ दीर्घप्रसङ्गः ।

ईदासः ॥ ८३ ॥

अष्टन आ विभक्तौ ॥ ८४ ॥

१ अष्टन्जनादिपथिमथ्यात्त्वेष्वान्तरतम्यादनुनासिकप्रसङ्गः ।

२ सिद्धमनण्त्वात् ।

३ उच्चारणसामर्थ्याद्वा ।

रायो हलि ॥ ८५ ॥

युष्मदस्मदोरनादेशे ॥ ८६ ॥

द्वितीयायां च ॥ ८७ ॥

प्रथमायाश्च द्विवचने भाषायाम् ॥ ८८ ॥

योऽचि ॥ ८९ ॥

शेषे लोपः ॥ ९० ॥

मपर्यन्तस्य ॥ ९१

युवावौ द्विवचने ॥ ९२ ॥

यूयवयौ जसि ॥ ९३ ॥

त्वाहौ सौ ॥ ९४ ॥

तुभ्यमह्यौ ङयि ९५ ॥

तवममौ ङसि ॥ ९६ ॥

त्वमावेकवचने ॥ ९७ ॥

प्रत्ययोत्तरपदयोश्च ॥ ९८ ॥

१ त्रिचतुर्युष्मदस्मग्रहणेष्वर्थग्रहणं शब्दविशेषणम् ।

त्रिचतुरोः स्त्रियां तिसृचतसृ ॥ ९९ ॥

१ तिसृभावे संज्ञायां कन्युपसंख्यानम् ।

२ चतसर्याद्युदात्तनिपातनं च ।

---

१ प. पु इतः परमधिकम् । दृशेश्चेति वक्तव्यम् । २ प. पुस्तके °विशेषणत्वात् ।

३ उपदेशिवद्वचनं च ।

४ स्वरसिद्ध्यर्थम् ।

५ [1]उक्तं वा ।

अचि र ऋतः ॥ १०० ॥

१ अचि रादेशे जस्युपसंख्यानं गुणपरत्वात् ।

२ [2]न वानवकाशत्वाद्रस्य ।

जराया जरसन्यतरस्याम् ॥ १०१ ॥

त्यदादीनामः १०२ ॥

१ [3]त्यदादीनां द्विपर्यन्तानामकारवचनम् ।

किमः कः १०३ ॥

कु तिहोः ॥ १०४ ॥

क्वाति ॥ १०५ ॥

तदोः सः सावनन्त्ययोः ॥ १०६ ॥

अदस औ सुलोपश्च[4] ॥ १०७ ॥

१ सावौत्त्वप्रतिषेधः साकच्काद्वा सादुत्वं च ।

२ उत्तरपदभूतानामादेश उपदेशिवद्वचनम् ।

३ अनादिष्टार्थम् ।

४ बहिरङ्गलक्षणत्वात् ।

इदमो मः ॥ १०८ ॥

दश्च ॥ १०९ ॥

यः सौ ॥ ११० ॥

इदो ऽय् पुंसि ॥ १११ ॥

अनाप्यकः ॥ ११२ ॥

हलि लोपः ॥ ११३ ॥

मृजेर्वृद्धिः ॥ ११४ ॥

१ मृजेर्वृद्धिविधौ किप्रतिषेधः ।

२ धातोः स्वरूपग्रहणे वा तत्प्रत्ययविज्ञानात्सिद्धम् ।

३ प्रयोजनं सृजिदृशिमस्जिनशिहन्तिगिरत्यर्थम् ।

अचो ञ्णिति ॥ ११५ ॥

१ वृद्धावज्ग्रहणं गोऽर्थम् ।

२ योगविभागः सखिव्यञ्जनाद्यर्थः

अत उपधायाः ॥ ११६ ॥

तद्धितेष्वचामादेः ॥ ११७ ॥

१ तद्धितेष्वचामादिवृद्धावन्त्योपधालक्षणप्रतिषेधः ।

२ लोकविज्ञानात् सिद्धम् ।

३ पुष्करसद्ग्रहणाद्वा ।

किति च[5] ॥ ११८ ॥

॥ इति सप्तमाध्यायस्य द्वितीयः पादः ॥

१–२ प. पुस्तके नास्ति । ३ प. पुस्तके इतः परमधिकम् । त्यदादीनामकारेण सिद्धत्वाद्युष्मदस्मदोः शेषे लोपस्य लोपेन ज्ञायते प्राक्ततोऽदिति । अपि वोपसमस्तार्थमस्वाभावात्कृतं भवेत् । टिलोपश्चाव्ययार्थः कर्तव्य इति तत्स्मृतम् । अथवा शेषसप्तम्या शेषेलोपो विधीयते । लुप्तशिष्टे हि तस्याहुः कार्यसिद्धिं मनीषिणः अदसः सोर्भवेदौत्त्वं किं सुलोपो विधीयते । ह्रस्वाल्लुप्येत संबुद्धिः । न हलः । प्रकृतं हि तत् । आप एत्वं भवेत्तस्मिन् । न झलात्यनुवर्तनात् । प्रत्ययस्थाच्च कादित्विम् । शीभावश्च प्रसज्यत । ४ वै. बा. नि. सिचि प्रभाविद् सन्यचस्तास्वदातो जराया अष्टादश ।

देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात् ॥ १ ॥

१ देविकादिषु तदादिग्रहणम् ।

२ अन्यत्र तद्ग्रहणात्तदन्तग्रहणाद्वा ।

३ आद्यज्विशेषणत्वाद्वा सिद्धम् ।

४ आन्तरतम्यनिवर्तकत्वाद्वा ।

५ न्यग्रोधे च केवलग्रहणात् ।

६ वहीनरस्येद्वचनम् ।

केकयमित्रयुप्रलयानां यादेरियः ॥ २ ॥

न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच्[1] ॥ ३ ॥

१ ऐचोर्विषयार्थं प्रतिषेधसंनियुक्तवचनम्[2] ।

२ शौकलायावादेशेषु[3] चोक्तम् ।

द्वारादीनां च ॥ ४ ॥

न्यग्रोधस्य च केवलस्य ॥ ५ ॥

न कर्मव्यतिहारे ॥ ६ ॥

स्वागतादीनां च ॥ ७ ॥

श्वादेरिञि ॥ ८ ॥

१ प्रतिषेधे श्वादिग्रहणं ज्ञापकमन्यत्र श्वन्ग्रहणे तदादिग्रहणस्य [4]शौवहानाद्यर्थम् ।

२ इकारादिग्रहणं च श्वागणिकाद्यर्थम् ।

३ तदन्तस्य चान्यत्र प्रतिषेधः ।

पदान्तस्यान्यतरस्याम् ॥ ९ ॥

उत्तरपदस्य ॥ १० ॥

१ तद्धितेष्वचामादिवृद्धेरुत्तरपदवृद्धिविप्रतिषेधेन द्व्याशीतिकाद्यर्थम् ।

अवयवादृतोः ॥ ११ ॥

सुसर्वार्धाज्जनपदस्य ॥ १२ ॥

दिशोऽमद्राणाम् ॥ १३ ॥

प्राचां ग्रामनगराणाम् ॥ १४ ॥

संख्यायाः संवत्सरसंख्यस्य च ॥ १५ ॥

१ संवत्सरग्रहणमनर्थकं परिमाणान्तस्येति[5] कृतत्वात् ।

२ ज्ञापकं तु कालपरिमाणानां वृद्धिप्रतिषेधस्य ।

वर्षस्याभविष्यति ॥ १६ ॥

परिमाणान्तस्यासंज्ञाशाणयोः ॥ १७ ॥

जे प्रोष्ठपदानाम् ॥ १८ ॥

हृद्भगसिन्ध्वन्ते पूर्वपदस्य च ॥ १९ ॥

अनुशतिकादीनां च ॥ २० ॥

देवताद्वन्द्वे च ॥ २१ ॥

नेन्द्रस्य परस्य ॥ २२ ॥

दीर्घाच्च वरुणस्य ॥ २३ ॥

प्राचां नगरान्ते ॥ २४ ॥

जङ्गलधेनुवलजान्तस्य विभाषितमुत्तरम् ॥ २५ ॥

अर्धात्परिमाणस्य पूर्वस्य तु वा ॥ २६ ॥

नातः परस्य ॥ २७ ॥

प्रवाहणस्य ढे ॥ २८ ॥

१ प. पुस्तके इतः परमधिकम् । य्वाभ्यां परस्यावृद्धित्वम् । अपवादौ वृद्धेर्हि तौ । नित्यावैचौ तयोर्वृद्धिः किमर्थं नेति शिष्यते । २ प. पुस्तके इतः परमधिकम् । यत्र य्वाभ्यां परावृद्धिस्तत्राप्यन्येर्यथा न तौ । आचामादेर्य्वाभ्यां हि तौ । कथं द्व्याशीतिके न तौ । यत्र वृद्धिरचामादेस्तत्रैचावत्र य्वोर्हि सा । अथ कस्मात् पदान्ताभ्याम् । यथेणो न भवेद्यणः । ३ प. पुस्तके नास्ति । ४ प. पुस्तके °द्यर्थमिति पाठः । ५ प. पुस्तके परिमाणग्रहणस्य एतदधिकम् ।

तत्प्रत्ययस्य च ॥ २९ ॥

नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम् ॥ ३० ॥

यथातथयथापुरयोः पर्यायेण ॥ ३१ ॥

हनस्तोऽचिण्णलोः ॥ ३२ ॥

१ हन्तेस्तकारे तद्धिते प्रतिषेधः ।

२ उक्तं वा ।

आतो युक् चिण्कृतोः ॥ ३३ ॥

नोदात्तोपदेशस्य मान्तस्यानाचमेः ॥ ३४ ॥

जनिवध्योश्च ॥ ३५ ॥

अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुग्णौ ॥ ३६ ॥

शाछासाह्वाव्यावेपां युक् ॥ ३७ ॥

१ णिच्प्रकरणे धूञ्प्रीञोर्नुग्वचनम् ।

२ पातेर्लुग्वचनम् ।

धो विधूनने जुक् ॥ ३८ ॥

लीलोर्नुग्लुकावन्यतरस्यां स्नेहविपातने ॥ ३९ ॥

भियो हेतुभये षुक् ॥ ४० ॥

स्फायो वः ४१ ॥

शदेरगतौ तः ॥ ४२ ॥

रुहः पोऽन्यतरस्याम् ॥ ४३ ॥

प्रत्ययस्थात् कात् पूर्वस्यात इदाप्यसुपः ॥ ४४ ॥

१ इत्त्वे कग्रहणं संघातग्रहणं चेदेतिकास्वप्राप्तिः ।

२ वर्णग्रहणं चेद्याहितत्वादप्रसिद्धिः ।

३ वचनप्रामाण्यादिति चेद्रथकट्यादिष्वतिप्रसङ्गः ।

४ ममकनरकयोरुपसंख्यानमप्रत्ययस्थत्वात् ।

५ त्यक्त्यपोश्च प्रतिषिद्धत्वात् ।

न यासयोः ॥ ४५ ॥

१ प्रतिषेधे त्यकन उपसंख्यानम् ।

२ पावकादीनां छन्दस्युपसंख्यानम् ।

३ आशिषि च ।

४ उत्तरपदलोपे च ।

५ क्षिपकादीनां च ।

६ तारका ज्योतिषि ।

७ वर्णका तान्तवे ।

८ वर्तका शकुनौ प्राचाम् ।

९ अष्टका पितृदैवत्ये ।

१० वा सूतकापुत्रकावृन्दारकाणाम् ।

उदीचामातः स्थाने यकपूर्वायाः ॥ ४६ ॥

१ यकपूर्वे[1] धात्वन्तप्रतिषेधः ।

भस्त्रैषाजाज्ञाद्वास्वा नञ्पूर्वाणामपि ॥ ४७ ॥

१ भस्त्राग्रहणमुपसर्जनार्थम् ।

२ नञ्पूर्वग्रहणानर्थक्यं चोत्तरपदमात्रस्येद्वचनात् ।

अभाषितपुंस्काच्च ॥ ४८ ॥

आदाचार्याणाम् ॥ ४९ ॥

ठस्येकः ॥ ५० ॥

१ ठादेशे वर्णग्रहणं चेद्धात्वन्तस्य प्रतिषेधः ।

२ संघातग्रहणं चेदुणादिमाथितिकादीनां प्रतिषेधः ।

१ प. पुस्तके नास्ति । २ प. पुस्तके इतः परमधिकम् । अवमिकामिचमीनामिति वक्तव्यम् । ३ प. पुस्तके °पर्वत्वे इति पाठः ।

३ तस्माद्विशिष्टग्रहणम् ।

इसुसुक्तान्तात् कः ॥ ५१ ॥

चजोः कु घिण्यतोः ॥ ५२ ॥

न्यङ्क्वादीनां च ॥ ५३ ॥

हो हन्तेर्ञ्णिन्नेषु ॥ ५४ ॥

१ हन्तेस्तत्परस्येति चेन्नकारेऽप्रसिद्धिः ।

२ हकारस्येति चेञ्ञ्णित्यप्राप्तिः ।

३ स्थानिवद्भावाच्चाचो नकारेऽप्रसिद्धिः ।

४ वचनप्रामाण्यादिति चेदलोपे प्रतिषेधः ।

५ सिद्धं तूपधालोप इति वचनात् ।

अभ्यासाच्च ॥ ५५ ॥

१ अभ्यासात्कुत्वमसुपः ।

हेरचङि ॥ ५६ ॥

१ हेश्चङि प्रतिषेधानर्थक्यमङ्गान्यत्वात् ।

२ ज्ञापकं त्वन्यत्र ण्याधिकस्य कुत्वविज्ञानार्थम् ।

सन्लिटोर्जेः ॥ ५७ ॥

१ जिग्रहणे ज्यः प्रतिषेधः ।

विभाषा चेः ॥ ५८ ॥

न क्वादेः ॥ ५९ ॥

१ कादिजिव्रजियाचिरुचीनामप्रतिषेधो निष्ठायामनिटः कुत्ववचनात् ।

२ शुच्युब्ज्योर्घञि कुत्वम् ।

३ अर्चेः कविधानात्सिद्धम् ।

अजिव्रज्योश्च ॥ ६० ॥

भुजन्युब्जौ पाण्युपतापयोः ॥ ६१ ॥

१ भुजः पाणौ ।

२ न्युब्जेः कर्तृत्वादप्रतिषेधः ।

प्रयाजानुयाजौ यज्ञाङ्गे ॥ ६२ ॥

वञ्चेर्गतौ ॥ ६३ ॥

ओक उचः के ॥ ६४ ॥

ण्य आवश्यके ॥ ६५ ॥

यजयाचरुचप्रवचर्चश्च ॥ ६६ ॥

१ प्रवचिग्रहणमनर्थकं वचोऽशब्दसंज्ञाभावात् ।

२ उपसर्गपूर्वनियमार्थमिति चेदविवाक्यस्य विशेषवचनात्सिद्धम् ।

३ ण्यप्रतिषेधे त्यजेरुपसंख्यानम् ।

वचो ऽशब्दसंज्ञायाम् ॥ ६७ ॥

प्रयोज्यनियोज्यौ शक्यार्थे ॥ ६८ ॥

भोज्यं भक्ष्ये ॥ ६९ ॥

१ भोज्यमभ्यवहार्ये ।

घोर्लोपो लेटि वा ॥ ७० ॥

ओतः श्यनि ॥ ७१ ॥

१ ओतः शिति ।

२ उत्तरत्र शिद्ग्रहणाभावाय ।

क्सस्याचि ॥ ७२ ॥

लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये ॥ ७३ ॥

शमामष्टानां दीर्घः श्यनि ॥ ७४ ॥

ष्ठिवुक्लमुचमां शिति ॥ ७५ ॥

१ दीर्घत्वमाङि चमः ।

क्रमः परस्मैपदेषु ॥ ७६ ॥

इषुगमियमां छः ॥ ७७ ॥

१ इषेश्छत्वमहलि ।

पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः ॥ ७८ ॥

१ पिबेर्गुणप्रतिषेधः ।
२ अदन्त इति चेदुक्तम् ।
ज्ञाजनोर्जा ॥ ७९ ॥
प्वादीनां ह्रस्वः ॥ ८० ॥
मीनातेर्निगमे ॥ ८१ ॥
मिदेर्गुणः ॥ ८२ ॥
जुसि च ॥ ८३ ॥
१ जुसि गुणे यासुट्प्रतिषेधः ।
सार्वधातुकार्धधातुकयोः ॥ ८४ ॥
जाग्रो ऽविचिण्णल्ङित्सु ॥ ८५ ॥
१ चिण्णलोः प्रतिषेधसामर्थ्यादन्यत्र गुणभूतस्य वृद्धिप्रतिषेधः ।
२ प्रसज्यप्रतिषेधे जुसिगुणप्रतिषेधप्रसङ्गः ।
३ उत्तमे च णलि ।
४ न वानन्तरस्य प्रतिषेधात् ।
५ जुसि पूर्वेण गुणविधानम् ।
६ णलि च ।
७ अतोऽन्यत्र विधाने वावगुणत्वम् ।
८ न वा पर्युदाससामर्थ्यात् ।
९ वस्वर्थमिति चेन्न सार्वधातुकत्वात्सिद्धम् ।
पुगन्तलघूपधस्य च ॥ ८६ ॥
नाभ्यस्तस्याचि पिति सार्वधातुके । ८७ ।
१ अभ्यस्तानामुपधाह्रस्वत्वमचि पस्पशाते चाकशीमि वावशतीरिति दर्शनात् ।
२ बहुलं छन्दस्यानुषग्जुजोषदिति दर्शनात् ।
भूसुवोस्तिङि ॥ ८८ ॥
१ भूसुवोः प्रतिषेध एकाज्ग्रहणं बोभवीत्यर्थम् ।
उतो वृद्धिर्लुकि हलि ॥ ८९ ॥
ऊर्णोतेर्विभाषा ॥ ९० ॥
गुणो ऽपृक्ते ॥ ९१ ॥
तृणह इम् ॥ ९२ ॥
१ तृणह्ग्रिहणं श्नमिमोऽर्थवस्थार्थम् ।
२ तृहिग्रहणे ह्रीम्विषये श्नमभावोऽनवकाशत्वात् ।
ब्रुव ईट् ॥ ९३ ॥
यङो वा ॥ ९४ ॥
तुरुस्तुशम्यमः सार्वधातुके ॥ ९५ ॥
१ पुनः सार्वधातुकग्रहणमपिदर्थम् ।
अस्तिसिचो ऽपृक्ते ॥ ९६ ॥
बहुलं छन्दसि ॥ ९७ ॥
रुदश्च पञ्चभ्यः ॥ ९८ ॥
अड्गार्ग्यगालवयोः ॥ ९९ ॥
अदः सर्वेषाम् ॥ १०० ॥
अतो दीर्घो यञि ॥ १०१ ॥
सुपि च ॥ १०२ ॥
बहुवचने झल्येत् ॥ १०३ ॥
१ अतो दीर्घाद्बहुवचन एत्त्वं विप्रतिषेधेन ।

---

१ प. पुस्तके नास्ति । २ प. पुस्तके इतः परमाधिकम् । संयोगे गुरुसंज्ञायां गुणो भेत्तुर्न सिध्यति । विध्यपेक्षं लघोश्चासौ । कथं कुण्डिर्न दुष्यति । धातोर्नुमः । कथं रञ्जेः । स्यन्दिश्रन्थ्योर्निपातनात् । अनङ्लुपशिदीर्घत्व विध्यपेक्षे न सिध्यतः । अभ्यस्तस्य यदाहाचि । लङर्थं तत्कृतं भवेत् ।

ओसि च ॥ १०४ ॥

आङि चापः ॥ १०५ ॥

संबुद्धौ च ॥ १०६ ॥

अम्बार्थनद्योर्ह्रस्वः १०७ ॥

ह्रस्वस्य गुणः ॥ १०८ ॥

जसि च ॥ १०९ ॥

१ जसादिषु छन्दसि वावचनं प्राङ् णौ चङ्युपधायाः ।

२ अम्बे दर्वि शतक्रत्वः पश्वे नृभ्यः किकिदीव्या ।

ऋतो ङिसर्वनामस्थानयोः ॥ ११० ॥

घेर्ङिति ॥ १११ ॥

१ घेर्ङिति गुणविधाने ङीसार्वधातुके प्रतिषेधः ।

२ सुबधिकारात्सिद्धम् ।

आण्नद्याः ॥ ११२ ॥

याडापः ॥ ११३ ॥

१ याड्विधानेऽतिखट्वायेत्यप्रतिषेधो ह्रस्वादेशत्वात् ।

सर्वनाम्नः स्याड्ढ्रस्वश्च ॥ ११४ ॥

विभाषा द्वितीयातृतीयाभ्याम् ॥ ११५ ॥

ङेराम् नद्याम्नीभ्यः ॥ ११६ ॥

१ इदुद्भ्यामाम्विधानमौत्त्वस्य परत्वात् ।

२ योगविभागात्सिद्धम् ।

इदुद्भ्याम् ॥ ११७ ॥

औत् ॥ ११८ ॥

अच्च घेः ॥ ११९ ॥

१ औत्त्वे योगविभागः ।

२ सखिपतिभ्यामौत्वार्थः ।

३ एकयोगे ह्यप्राप्तिरत्वसंनियोगात् ।

४ न वाकारस्यान्वाचयवचनाद्यथा क्यङि सलोपः ।

५ अत्त्वे टाप्प्रतिषेधः ।

६ न वा संनिपातलक्षणस्यानिमित्तत्वात् ।

७ ङित्करणाद्वा ।

आङो नास्त्रियाम् ॥ १२० ॥

॥ इति सप्तमाध्यायस्य तृतीयः पादः ॥

णौ चङ्युपधाया ह्रस्वः ॥ १ ॥

१ णौ चङ्युपधाग्रहणमन्त्यप्रतिषेधार्थम् ।

२ उपधाह्रस्वत्वे णेर्णिच्युपसंख्यानम् ।

नाग्लोपिशास्वृदिताम् ॥ २ ॥

१ अग्लोपिप्रतिषेधानर्थक्यं च स्थानिवद्भावात् ।

भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्याम्[१] ॥ ३ ॥

लोपः पिबतेरीच्चाभ्यासस्य ॥ ४ ॥

तिष्ठतेरित् ॥ ५ ॥

जिघ्रतेर्वा ॥ ६ ॥

उर्ऋत् ॥ ७ ॥

नित्यं छन्दसि ॥ ८ ॥

दयतेर्दिगि लिटि ॥ ९ ॥

---

१ प. पुस्तके इतः परमधिकम् । इलक्वतीनां प्रतिषेधो वक्तव्यः । तल्ह्रस्वत्वं वा ङिसंबुद्ध्योः अम्बार्थं ह्यक्षरं यदि । मातॄणां मातच् पुत्रार्थमर्हते । २ प. पुस्तके इतः परमधिकम् । काण्यादीनां चेति वक्तव्यम् ।

१ दिग्यादेशस्य परत्वात्साभ्यासस्यादेशवचनम् ।

ऋतश्च संयोगादेर्गुणः ॥ १० ॥

१ संयोगादेर्गुणविधाने संयोगोपधग्रहणं कृञर्थम् ।

२ ऋतो लिटि गुणाञ्ञ्णिति वृद्धिर्विप्रतिषेधेन ।

३ पुनःप्रसङ्गविज्ञानाद्वा सिद्धम् ।

ऋच्छत्यॄताम् ॥ ११ ॥

शॄदॄप्रां ह्रस्वो वा ॥ १२ ॥

१ ऋतो ह्रस्वत्वमित्त्वप्रतिषेधार्थम् ।

केऽणः ॥ १३ ॥

१ केऽणो ह्रस्वत्वे तद्धितग्रहणं कृन्निवृत्त्यर्थम् ।

न कपि ॥ १४ ॥

आपो ऽन्यतरस्याम् ॥ १५ ॥

ऋदृशो ऽङि गुणः ॥ १६ ॥

अस्यतेस्थुक् ॥ १७ ॥

श्वयतेरः ॥ १८ ॥

पतः पुम् ॥ १९ ॥

वच उम् ॥ २० ॥

शीङः सार्वधातुके गुणः ॥ २१ ॥

अयङ् यि क्ङिति ॥ २२ ॥

उपसर्गाद्ध्रस्व ऊहतेः ॥ २३ ॥

एतेर्लिङि ॥ २४ ॥

१ एतेर्लिङ्युपसर्गात् ।

अकृत्सार्वधातुकयोर्दीर्घः ॥ २५ ॥

च्वौ च ॥ २६ ॥

रीङृतः ॥ २७ ॥

रिङ् शयग्लिङ्क्षु ॥ २८ ॥

गुणो ऽर्तिसंयोगाद्योः ॥ २९ ॥

यङि च ॥ ३० ॥

१ यङ्प्रकरणे हन्तेर्हिंसायामीट् ।

ई घ्राध्मोः ॥ ३१ ॥

अस्य च्वौ ॥ ३२ ॥

क्यचि च ॥ ३३ ॥

अशनायोदन्यधनाया बुभुक्षापिपासागर्धेषु ॥ ३४ ॥

न च्छन्दस्यपुत्रस्य[1] ॥ ३५ ॥

१ छन्दसि प्रतिषेधे दीर्घप्रतिषेधः ।

२ न वाश्वाघस्याद्वचनमवधारणार्थम् ।

दुरस्युर्द्रविणस्युर्वृषण्यति रिषण्यति ।३६।

अश्वाघस्यात् ॥ ३७ ॥

देवसुम्नयोर्यजुषि काठके ॥ ३८ ॥

कव्यध्वरपृतनस्यर्चि लोपः ॥ ३९ ॥

द्यति यतिमास्थामित्ति किति ॥ ४०

शाछोरन्यतरस्याम् ॥ ४१ ॥

१ श्यतेरित्त्वं व्रते नित्यम् ।

दधातेर्हिः ॥ ४२ ॥

जहातेश्च क्त्वि ॥ ४३ ॥

विभाषा छन्दसि ॥ ४४ ॥

सुधित वसुधित नेमधित धिष्व धिषीय च ॥ ४५ ॥

दो दद्घोः[2] ॥ ४६ ॥

---

१ प. पुस्तके इतः परमधिकम् । अपुत्रादीनामिति वक्तव्यम् । २ प. पुस्तके इतः परमधिकम् न्ताते दोषो दीर्घत्वं स्यात् । तान्ते दोषो निष्ठानत्वम् । धान्ते दोषो धत्वप्राप्तिः । धान्तेऽदोषस्तस्मात्धान्तः

अच उपसर्गात्तः ॥ ४७ ॥

१ अच उपसर्गात्तत्व आकारग्रहणम् ।

२ आदेर्हि परस्य ।

३ अवर्णप्रकरणात्सिद्धम् ।

४ घेतेरित्वाद्वचस्तः ।

अपो भि ॥ ४८ ॥

१ अपो भि मासश्छन्दसि[1] ।

सः स्यार्धधातुके ॥ ४९ ॥

तासस्त्योर्लोपः ॥ ५० ॥

रि च ॥ ५१ ॥

ह एति ॥ ५२ ॥

यीवर्णयोर्दीधीवेव्योः ॥ ५३ ॥

सनि मीमाघुरभलभशकपतपदामच इस् ॥ ५४ ॥

१ ह्रस्वं सनि राधो हिंसायाम् ।

आप्ज्ञप्यृधामीत् ॥ ५५ ॥

१ ज्ञपेरीत्त्वमनन्त्यस्य ।

दम्भ इच्च ॥ ५६ ॥

मुचोऽकर्मकस्य गुणो वा ॥ ५७ ॥

अत्र लोपोऽभ्यासस्य ॥ ५८ ॥

१ अभ्यासस्यानचि ।

ह्रस्वः ॥ ५९ ॥

हलादिः शेषः ॥ ६० ॥

१ हलादिशेषे षष्ठीसमास इति चेदजादिषु शेषप्रसङ्गः ।

२ कर्मधारय इति चेदादिशेषनिमित्तत्वाल्लोपस्य तदभावे लोपवचनम् ।

३ तस्मादनादिलोपः ।

४ [2]उक्तं वा ।

शर्पूर्वाः खयः ॥ ६१ ॥

१ शर्पूर्वशेषे खर्पूर्वग्रहणम् ।

२ आदिशेषप्रसङ्गस्तु ।

३ शर्पूर्ववचनं किमर्थमिति चेत्खयां लोपप्रतिषेधार्थम् ।

४ व्यपकर्षविज्ञानात्सिद्धम् ।

कुहोश्चुः ॥ ६२ ॥

न कवतेर्यङि ॥ ६३ ॥

कृषेश्छन्दसि ॥ ६४ ॥

दाधर्ति दर्धर्ति दर्धर्षि बोभूतु तेतिक्तेऽलर्ष्यापनीफणत्संसनिष्यदत्करिक्रत्कनिक्रदद्भरिभ्रद्दविध्वतो दविद्युतत्तरित्रतः सरीसृपतं वरीवृजन्मर्मृज्या गनीगन्तीति च ॥ ६५ ॥

उरत् ॥ ६६ ॥

द्युतिस्वाप्योः संप्रसारणम् ॥ ६७ ॥

१ स्वापिग्रहणं व्यपेतार्थम् ।

२ तत्र क्यजन्तेऽतिप्रसङ्गः ।

३ सिद्धं तु णिज्ग्रहणात् ।

व्यथो लिटि ॥ ६८ ॥

दीर्घ इणः किति ॥ ६९ ॥

अत आदेः ॥ ७० ॥

तस्मान्नुड् द्विहलः ॥ ७१ ॥

अश्नोतेश्च ॥ ७२ ॥

भवतेरः ॥ ७३ ॥

ससूवेति निगमे ॥ ७४ ॥

निजां त्रयाणां गुणः श्लौ ॥ ७५ ॥

---

१ प. पुस्तके इतः परमधिकम् । स्ववस्स्वतवसोर्मास उषसश्च त इष्यते । २ प. पुस्तके नास्ति ।

१ त्रिग्रहणानर्थक्यं तु गणान्तत्वात् ।
२ उत्तरार्थं तु ।
भृञामित् ॥ ७६ ॥
अर्तिपिपर्त्योश्च ॥ ७७॥
बहुलं छन्दसि ॥ ७८ ॥
सन्यतः ॥ ७९ ॥
ओः पुयण्ज्यपरे ॥ ८० ॥
स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा ॥ ८१ ॥
गुणो यङ्लुकोः ॥ ८२ ॥
१ ऐचोर्यङि दीर्घप्रसङ्गो ह्रस्वादि परं दीर्घत्वम् ।
२ न वाभ्यासविकारेष्वपवादस्योत्सर्गाबाधकत्वात् ।
३ प्रयोजनं सन्वद्भावस्य दीर्घत्वम् ।
४ मान्प्रभृतीनां दीर्घत्वमित्त्वस्य ।
५ गणेरीत्वं हलादिशेषस्य ।
दीर्घो ऽकितः ॥ ८३ ॥
१ अकिद्वचनमन्यत्र किदन्तस्यालोऽन्त्यनिवृत्त्यर्थम् ।
२ प्रयोजनं ह्रस्वत्वात्वेत्त्वगुणेषु ।
३ विप्रतिषेधात्सिद्धम् ।
४ तदन्ताग्रहणाद्वा ।
नीग्वञ्चुस्रंसुध्वंसुभ्रंशुकसपतपदस्कन्दाम् ॥ ८४ ॥
नुगतो ऽनुनासिकान्तस्य ॥ ८५ ॥
१ नुकि यंयम्यते रंरम्यत इति रूपासिद्धिः ।
२ अनुस्वारागमवचनात्सिद्धम् ।
३ पदान्तवच्च ।
जपजभदहदशभञ्जपशां च ॥ ८६ ॥
चरफलोश्च ॥ ८७ ॥
उत्परस्यातः ॥ ८८ ॥
ति च ॥ ८९ ॥
रीगृदुपधस्य च ॥ ९० ॥
१ रीगृत्वतः संयोगार्थम् ।
रुग्रिकौ च लुकि ॥ ९१ ॥
१ मर्मृज्यते मर्मृज्यमानास इति चोपसंख्यानम् ।
ऋतश्च ॥ ९२ ॥
सन्वल्लघुनि चङ्परे ऽनग्लोपे ॥ ९३ ॥
१ सन्वद्भावदीर्घत्वे णेर्णिच्युपसंख्यानम् ।
२ मीमादीनां तु लोपप्रसङ्गः ।
३ सिद्धं तु रूपातिदेशात् ।
४ अङ्गान्यत्वाद्वा सिद्धम् ।
दीर्घो लघोः ॥ ९४ ॥
अत् स्मृदृत्वरप्रथम्रदस्तृस्पशाम् ॥ ९५ ॥
विभाषा वेष्टिचेष्टयोः ॥ ९६ ॥
ई च गणः ॥ ९७ ॥

॥ इति सप्तमाध्यायस्य चतुर्थः पादः ॥

अष्टमोऽध्यायः ।

सर्वस्य द्वे ॥ १ ॥
१ सर्ववचनमलोऽन्त्यनिवृत्त्यर्थम् ।
२ षष्ठीनिर्देशार्थं च ।

---

१ प. पुस्तके °सर्वग्रहण° ।

३ अनिर्देशे हि षष्ठ्यर्थाप्रसिद्धिः ।
४ न वा पदाधिकारात् ।
५ तच्च समासतद्धितवाक्यनिवृत्त्यर्थम् ।
६ सगतिग्रहणं च ।

तस्य परमाम्रेडितम् ॥ २ ॥

अनुदात्तं च ॥ ३ ॥

नित्यवीप्सयोः ॥ ४ ॥

१ अनवयवाभिधानं वीप्सार्थ इति चेज्जात्याख्यायां द्विर्वचनप्रसङ्गः ।
२ न वैकार्थत्वाज्जातेः ।
३ अनेकार्थाश्रयत्वाच्च वीप्सायाः ।
४ निवर्तकत्वाद्वा ।
५ सर्वपदसगतिग्रहणानर्थक्यं चार्थाभिधाने द्विर्वचनविधानात् ।
६ वीप्सायां सर्वाभिधाने वचनाप्रासिद्धिः ।
७ एकाभिधानेऽसर्वद्रव्यगतिः ।
८ न वा पदार्थत्वात् ।

परेर्वर्जने ॥ ५ ॥

१ परेरसमासे ।
२ परेर्वर्जने वावचनम् ।

प्रसमुपोदः पादपूरणे ॥ ६ ॥

उपर्यध्यधसः सामीप्ये ॥ ७ ॥

वाक्यादेरामन्त्रितस्यासूयासंमतिकोपकुत्सनभर्त्सनेषु ॥ ८ ॥

१ असूयाकुत्सनयोःकोपभर्त्सनयोश्चैकार्थत्वात्पृथक्त्वनिर्देशानर्थक्यम् ।

एकं बहुव्रीहिवत् ॥ ९ ॥

१ एकस्य द्विर्वचनसंबन्धेनेति चेदर्थनिर्देशः ।
२ न वा वीप्साधिकारात् ।
३ बहुव्रीहिवत्त्वे प्रयोजनं सुब्लोपपुंवद्भावौ ।
४ सर्वनामस्वरसमासान्तेषु दोषः ।

आबाधे च ॥ १० ॥

कर्मधारयवदुत्तरेषु ॥ ११ ॥

१ कर्मधारयवत्त्वे प्रयोजनं सुब्लोपपुंवद्भावान्तोदात्तत्वानि ।

प्रकारे गुणवचनस्य ॥ १२ ॥

१ प्रकारे सर्वेषां गुणवचनत्वात्सर्वप्रसङ्गः ।
२ सिद्धं तु प्रकृत्यर्थविशेषणत्वात् ।
[३ आनुपूर्व्ये ।]
४ स्वार्थेऽवधार्यमाणेऽनेकस्मिन् ।
[५ चापले ।]
६ क्रियासमभिहारे ।
[७ आभीक्ष्ण्ये ।]
८ डाचि च ।
९ पूर्वप्रथमयोरर्थातिशयविवक्षायाम् ।
१० डतरडतमयोः समसंप्रधारणायां स्त्रीनिगदे भावे ।
११ कर्मव्यतिहारे सर्वनाम्नः समासवच्च बहुलं यदा न समासवत् प्रथमैकवचनं तदा पूर्वपदस्य ।
१२ स्त्रीनपुंसकयोरुत्तरपदस्य वाम्भावः ।

अकृच्छ्रे प्रियसुखयोरन्यतरस्याम् ॥ १३ ॥

यथास्वे यथायथम् ॥ १४ ॥

द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु ॥ १५ ॥

१ अत्यन्तसहचरिते लोकविज्ञाते द्वन्द्वमित्युपसंख्यानम् ।

२ द्वन्द्वमिति पूर्वपदस्य चाम्भाव उत्तरपदस्य चात्वं नपुंसकत्वं च ।

३ उक्तं वा ।

पदस्य ॥ १६ ॥

पदात् ॥ १७ ॥

१ पदाधिकारः प्रागपदान्ताधिकारात् ।

२ पदात्प्राक्सुपि कुत्सनात् ।

३ यणेकादेशस्वरस्तूर्ध्वं पदाधिकारात् ।

४ इह वचने ह्यपदान्तस्याप्राप्तिः ।

५ न वा पदाधिकारस्य विशेषणत्वात् ।

६ अन्तग्रहणाद्वा नलोपे ।

अनुदात्तं सर्वमपादादौ[1] ॥ १८ ॥

१ सर्ववचनमनादेरनुदात्तार्थमिति चेल्लुटि प्रतिषेधात्सिद्धम् ।

२ अलोऽन्त्यविधिप्रसङ्गस्तु ।

३ लुटि प्रतिषेधात्सिद्धम् ।

४ उक्तं वा ।

५ समानवाक्ये निघातयुष्मदस्मदादेशाः ।

६ पश्यार्थैश्च प्रतिषेधः ।

आमन्त्रितस्य च ॥ १९ ॥

युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वांनावौ ॥ २० ॥

बहुवचनस्य वस्नसौ ॥ २१ ॥

तेमयावेकवचनस्य ॥ २२ ॥

त्वामौ द्वितीयायाः ॥ २३ ॥

न चवाहाहैवयुक्ते ॥ २४ ॥

पश्यार्थैश्चानालोचने ॥ २५ ॥

सपूर्वायाः प्रथमाया विभाषा ॥ २६ ॥

१ युष्मदस्मदोरन्यतरस्यामनन्वादेशे[4] ।

तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्ययोः ॥ २७ ॥

१ तिङो गोत्रादिषु कुत्सनाभीक्ष्ण्यग्रहणं पाठविशेषणम् ।

२ अनुदात्तविशेषणे ह्यन्यत्र गोत्रादिग्रहणे कुत्सनाभीक्ष्ण्यग्रहणम् ।

३ अनुदात्तग्रहणं वा ।

तिङतिङः ॥ २८ ॥

१ अतिङ्वचनमनर्थकं समानवाक्याधिकारात् ।

न लुट् ॥ २९ ॥

निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण्कच्चिद्यत्रयुक्तम् ॥ ३० ॥

१ चण्णिद्विशिष्टश्चेदर्थे ।

नह प्रत्यारम्भे ॥ ३१ ॥

सत्यं प्रश्ने ॥ ३२ ॥

अङ्गाप्रातिलोम्ये ॥ ३३ ॥

हि च ॥ ३४ ॥

छन्दस्यनेकमपि साकाङ्क्षम् ॥ ३५ ॥

यावद्यथाभ्याम् ॥ ३६ ॥

पूजायां नानन्तरम् ॥ ३७ ॥

उपसर्गव्यपेतं च ॥ ३८ ॥

तुपश्यपश्यताहैः पूजायाम् ॥ ३९ ॥

अहो च ॥ ४० ॥

शेषे विभाषा ॥ ४१ ॥

---

१ प. पुस्तके नास्ति । २ प. पुस्तके इतः परमधिकम् । सर्ववचनमनादेरनुदात्तार्थम् । ३ प. पुस्तके नास्ति । ४ प पुस्तके इतः परमधिकम् । सर्वे एव वाम्नावादयोऽनन्वादेशे विभाषा वक्तव्याः ।

पुरा च परीप्सायाम् ॥ ४२ ॥

नन्वित्यनुज्ञैषणायाम् ॥ ४३ ॥

किं क्रियाप्रश्नेऽनुपसर्गमप्रतिषिद्धम् ॥ ४४ ॥

लोपे विभाषा ॥ ४५ ॥

एहि मन्ये प्रहासे लृट् ॥ ४६ ॥

जात्वपूर्वम् ॥ ४७ ॥

किंवृत्तं च चिदुत्तरम् ॥ ४८ ॥

आहो उताहो चानन्तरम् ॥ ४९

शेषे विभाषा ॥ ५० ॥

गत्यर्थलोटा लृण्न चेत्कारकं सर्वान्यत् ॥ ५१ ॥

१ लृटः प्रकृतिभावे कर्तुरन्यत्व उपसंख्यानं कारकान्यत्वात् ।

२ कर्तृसामान्यात्सिद्धमिति चेत्तद्भेदेऽन्यसामान्ये प्रकृतिभावप्रसङ्गः ।

३ न चेत्कर्ता सर्वान्य इति चेदन्याभिधाने प्रतिषेधमेके ।

४ सिद्धं तु तिङोरेकद्रव्याभिधानात् ।

लोट् च ॥ ५२ ॥

विभाषितं सोपसर्गमनुत्तमम् ॥ ५३ ॥

हन्त च ॥ ५४ ॥

आम एकान्तरमामन्त्रितमनन्तिके ॥ ५५ ॥

१ आम एकान्तर ऐकश्रुत्यप्रतिषेधः ।

२ निघातप्रसङ्गस्तु[1] ।

३ सिद्धं तु प्रतिषेधाधिकारे प्रतिषेधवचनात् ।

यद्धितुपरं छन्दसि ॥ ५६ ॥

१ यद्धितुपरस्य च्छन्दस्यनिघातोऽन्यपरप्रतिषेधार्थः ।

चनचिदिवगोत्रादितद्धिताम्रेडितेष्वगतेः ॥ ५७ ॥

१ आम्रेडितेष्वगतेः सगतिरपि तिङित्यत्र गतिग्रहण उपसर्गग्रहणम्[2] ।

चादिषु च ॥ ५८ ॥

चवायोगे प्रथमा ॥ ५९ ॥

हेति क्षियायाम् ॥ ६० ॥

अहेति विनियोगे च ॥ ६१ ॥

चाहलोप एवेत्यवधारणम् ॥ ६२ ॥

चादिलोपे विभाषा ॥ ६३ ॥

वै वावेति च च्छन्दसि ॥ ६४ ॥

एकान्याभ्यां समर्थाभ्याम् ॥ ६५ ॥

यद्वृत्तान्नित्यम् ॥ ६६ ॥

१ वा याथाकाम्ये ।

पूजनात्पूजितमनुदात्तम्[3] ॥ ६७ ॥

१ पूजितस्यानुदात्तत्वे काष्ठादिग्रहणम् ।

२ मलोपवचनं च ।

सगतिरपि तिङ् ॥ ६८ ॥

१ सगतिग्रहणमपदत्वात् ।

१ प. पुस्तके °प्रसङ्ग इति नास्ति । २ प. पुस्तके इतः परमधिकम् । सर्वत्रैवाष्टमिके गतिग्रहण उपसर्गग्रहणम् । ३ वे. का. प्र. क. या. नि. पुस्तकेषु काष्ठादिभ्य इत्यधिकम् तत्केश्चित्प्रक्षिप्तमिति कैयटः । भाष्यविरोधात् ।

२ उत्तरार्थं च ।

३ तिङ्घातात्पूजनात्पूजितमनुदात्तं विप्रतिषेधेन ।

कुत्सने च सुप्यगोत्रादौ[1] ॥ ६९ ॥

गतिर्गतौ ॥ ७० ॥

१ गतेरनुदात्तत्वे गतिग्रहणानर्थक्यं तिङवधारणात् ।

२ छन्दोऽर्थमिति चेन्नागतित्वात् ।

तिङि चोदात्तवति ॥ ७१ ॥

१ तिङ्ग्रहणमुदात्तवतः परिमाणार्थम्[2] ।

२ यद्योगाद्गतिरिति चेत्प्रत्ययोदात्तत्वेऽप्रसिद्धिः ।

आमन्त्रितं पूर्वमविद्यमानवत् ॥ ७२ ॥

१ पूर्वं प्रति विद्यमानवत्त्वादुत्तरत्रानन्तर्याप्रसिद्धिः ।

२ सिद्धं तु पदपूर्वस्येति वचनात् ।

३ अविद्यमानवत्त्वे प्रयोजनमामन्त्रितयुष्मदस्मत्तिङ्घाताः ।

४ पूजायामनन्तरप्रतिषेधः ।

५ जात्वपूर्वम् ।

६ आहो उताहो चानन्तरविधौ ।

७ आम एकान्तरविधौ

नामन्त्रिते समानाधिकरणे[3] ॥ ७३ ॥

[4]सामान्यवचनं विभाषितं विशेषवचने ॥ ७४ ॥

॥ इत्यष्टमाध्यायस्य प्रथमः पादः ॥

पूर्वत्रासिद्धम् ॥ १ ॥

१ पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्य ।

२ अपवादो वचनप्रामाण्यात् ।

३ पूर्वत्रासिद्धमधिकारः ।

४ परस्य परस्य पूर्वत्र पूर्वत्रासिद्धविज्ञानार्थम् ।

५ अनधिकारे हि समुदायस्य समुदायेऽसिद्धविज्ञानम् ।

६ तत्रायथेष्टप्रसङ्गः ।

७ तस्मादधिकारः ।

८ [5]असिद्धवचन उक्तम् ।

नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति ।२।

१ संज्ञाग्रहणानर्थक्यं च तन्निमित्तत्वाल्लोपस्य ।

२ स्वरेऽवधारणाच्च ।

३ तुग्विधौ चोक्तम् ।

न मु ने ॥ ३ ॥

१ न मु टादेशे ।

---

१ प. पुस्तक इतः परमाधिकम् । सुपि कुत्सने क्रियायाः । मकारलोपोऽतिङि । पूतिश्चानुबन्धः । विभाषितं चापि बह्वर्थम् । २ प. पुस्तके इतः परमाधिकम् । यद्योगाद्गतिः । ३ वे. का. प्र. नि. बा. सामान्यवचनमित्यधिकम् । ४ वे. का प्र. नि. बा. पुस्तकेषु सामान्यवचनमिति नास्ति । एष्वेव पुस्तकेषु अन्ते बहुवचनमित्यधिकम् । ५–६ प. पुस्तके नास्ति ।

उदात्तस्वरितयोर्यणः स्वरितो ऽनुदात्तस्य ॥ ४ ॥

१ यण्स्वरो यणादेशे स्वरितयणः स्वरितार्थम् ।

२ आश्रयात्सिद्धत्वमिति चेदुदात्तात्स्वरिते दोषः ।

एकादेश उदात्तेनोदात्तः ॥ ५ ॥

स्वरितो वानुदात्ते पदादौ ॥ ६ ॥

१ एकादेशस्वरोऽन्तरङ्गः ।

२ अयवायावेकादेशशतृस्वरैकाननुदात्तसर्वानुदात्तार्थम् ।

३ संयोगान्तलोपो रोरुत्वे हरिवो मेदिनं त्वा ।

४ प्लुतिश्च ।

५ सिज्लोप एकादेशे ।

६ संयोगादिलोपः संयोगान्तलोपे ।

७ निष्ठादेशः षत्वस्वरप्रत्ययेड्विधिषु ।

८ वस्वादिषु दत्वं सौ दीर्घत्वे ।

९ अदस ईत्वोत्वे स्वरे बहिष्पदलक्षणे ।

१० प्रगृह्यसंज्ञायां च ।

११ प्लुतिस्तुग्विधौ छे ।

१२ श्चुत्वं धुट्त्वे ।

१३ अभ्यासजश्त्वचर्त्वमेत्त्वतुकोः ।

१४ द्विर्वचने परसवर्णत्वम् ।

१५ पदाधिकारश्चेलत्वघत्वनत्वरुत्वषत्वणत्वानुनासिकछत्वानि ।

नलोपः प्रातिपदिकान्तस्य ॥ ७ ॥

१ नलोपेऽन्तग्रहणं पदाधिकारस्य विशेषणत्वात् ।

२ अह्नो नलोपप्रतिषेधः ।

३ अहन्ग्रहणादिति चेत्संबुद्ध्यर्थं वचनम् ।

न ङिसंबुद्ध्योः ॥ ८ ॥

१ न ङिसंबुध्योरनुत्तरपदे ।

२ वा नपुंसकानाम् ।

३ भत्वात्तु ङौ प्रतिषेधानर्थक्यम् ।

मादुपधायाश्च मतोर्वो ऽयवादिभ्यः ॥९॥

१ अनन्त्ययोरपि निष्ठामतुपोरादेशः ।

२ नार्मते प्रतिषेधः ।

३ उक्तं वा ।

झयः ॥ १० ॥

संज्ञायाम् ॥ ११ ॥

आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती ॥ १२ ॥

उदन्वानुदधौ ॥ १३ ॥

राजन्वान्साराज्ये ॥ १४ ॥

छन्दसीरः ॥ १५ ॥

अनो नुट् ॥ १६ ॥

१ अनो नुकि विनामरुविधिप्रतिषेधः ।

२ परादौ वत्वप्रतिषेधोऽवग्रहश्च ।

३ भत्वात्सिद्धम् ।

४ अनस्तु प्रकृतिभावे मतुब्ग्रहणं छन्दसि ।

५ घग्रहणं च ।

नाद्घस्य ॥ १७ ॥

१ ईद्रथिनः ।

---

१ प. पुस्तके नास्ति । २ 'न संप्रसारण' इति सूत्रभाष्ये 'कक्ष्यायाः संज्ञायां मतौ संप्रसारणं वक्तव्यम्' इत्यारब्धम् । अतोऽत्र सूत्रे कक्षीवच्छब्दपाठः अनार्ष इत्याहुः

२ भूरिदावत्तुट्।

कृपो रो लः ॥ १८ ॥

उपसर्गस्यायतौ ॥ १९ ॥

१ रेफस्यायताविति चेत्परेरुपसंख्यानम्।

२ उपसर्गस्येति चेदेकादेशेऽप्रसिद्धिः।

ग्रो यङि ॥ २० ॥

अचि विभाषा ॥ २१ ॥

१ गिरतेर्लत्वे[1] णावुक्तम्।

परेश्च घाङ्कयोः[2] ॥ २२ ॥

१ सङि लत्वसलोपसंयोगादिलोपकुत्वदीर्घत्वानि।

२ प्रयोजनं गिरौ गिरः पयो धावति द्विष्टरां दृषत्स्थानं काष्ठशक्स्थाता कुञ्चा धुर्य इति।

संयोगान्तस्य लोपः ॥ २३ ॥

१ संयोगान्तस्य लोपे यणः प्रतिषेधः।

२ न वा झलो लोपात्।

३ बहिरङ्गलक्षणत्वाद्वा।

४ संयोगान्तलोपे सग्रहणम्।

५ रुविधानस्यानवकाशत्वात्।

६ योगविभागात्सिद्धम्।

रात्सस्य ॥ २४ ॥

धि च[3] ॥ २५ ॥

झलो झलि ॥ २६ ॥

ह्रस्वादङ्गात् ॥ २७ ॥

इट ईटि ॥ २८ ॥

स्कोः संयोगाद्योरन्ते च ॥ २९ ॥

चोः कुः ॥ ३० ॥

हो ढः ॥ ३१ ॥

दादेर्धातोर्घः ॥ ३२ ॥

१ हृग्रहोर्भश्छन्दसि हस्य।

वा द्रुहमुहष्णुहष्णिहाम्[5] ॥ ३३ ॥

नहो धः ॥ ३४ ॥

आहस्थः ॥ ३५ ॥

व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः ॥ ३६ ॥

एकाचो बशो भष् झषन्तस्य स्ध्वोः ॥ ३७ ॥

दधस्तथोश्च ॥ ३८ ॥

१ दधस्तथोरनुकर्षणानर्थक्यं स्थानिवत्प्रतिषेधात्।

२ इतरथा ह्यलोपे प्रतिषेधः।

झलां जशोऽन्ते ॥ ३९ ॥

झषस्तथोर्धोऽधः ॥ ४० ॥

षढोः कः सि ॥ ४१ ॥

रदाभ्यां निष्ठातो नः पूर्वस्य च दः ॥ ४२ ॥

१ निष्ठादेशे पूर्वग्रहणं परस्यादेशप्रतिषेधार्थम्।

२ पञ्चमीनिर्दिष्टाद्धि परस्य।

३ वृद्धिनिमित्तात्प्रतिषेधः।

---

१ प. पुस्तके इतः परमाधिकम्। कृपणादीनां प्रतिषेधो वक्तव्यः। वालमूललघ्वलमङ्गुलीनां वा लो रमापद्यत इति वक्तव्यम्। संज्ञाछन्दसोर्वा कपिलादीनामिति वक्तव्यम्। २ प पुस्तके णावुपसंख्यानमिति। ३ प. पुस्तके इतः परमधिकम्। योगे च। ४ प. पुस्तके इतः परमधिकम्। धि सकारे सिचो लोपः। चकाद्धीति प्रयोजनम्। आशाध्वं तु कथं ते स्यात्। जश्त्वं सस्य भविष्यति। सर्वत्रैवं प्रसिद्धं स्यात्। श्रुतिश्चापि न भिद्यते। लुङश्चापि न मूर्धन्ये ग्रहणम्। सेटि दुष्यति। घसिभसयोर्न सिध्येत्तु। तस्मात्सिज्ग्रहणं न तत्। छान्दसो वर्णलोपो वा यथेष्कर्तारमध्वरे। ५ सुहास्निहाम् इति बो. पुस्तके।

४ प्रयोजनं कार्तिक्षैतिफौल्लयः ।

५ न वा बहिरङ्गलक्षणत्वात् ।

संयोगादेरातो धातोर्यण्वतः ॥ ४३ ॥

ल्वादिभ्यः ॥ ४४ ॥

१ ऋकारल्वादिभ्यः क्तिन्निष्ठावत् ।

२ दुग्वोर्दीर्घश्च ।

३ पूञो विनाशे ।

४ सिनोतेर्ग्रासकर्मकर्तृकस्य ।

ओदितश्च ॥ ४५ ॥

क्षियो दीर्घात् ॥ ४६ ॥

श्यो ऽस्पर्शे ॥ ४७ ॥

अञ्चो ऽनपादाने ॥ ४८ ॥

१ अञ्चेर्नत्वे व्यक्तप्रतिषेधः ।

२ अञ्जिविज्ञानात्सिद्धम् ।

३ अञ्चत्यर्थ इति चेदञ्जेस्तदर्थत्वात्सिद्धम् ।

दिवो ऽविजिगीषायाम् ॥ ४९ ॥

निर्वाणो ऽवाते ॥ ५० ॥

१ अवाताभिधाने ।

शुषः कः ॥ ५१ ॥

पचो वः ॥ ५२ ॥

क्षायो मः ॥ ५३ ॥

प्रस्त्यो ऽन्यतरस्याम् ॥ ५४ ॥

अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाः ॥५५॥

१ फलेर्लत्व उत्पूर्वस्योपसंख्यानम्[२] ।

नुदविदोन्दत्राघ्राह्रीभ्यो ऽन्यतरस्याम् ॥ ५६ ॥

न ध्याख्यापॄमूर्छिमदाम् ॥ ५७ ॥

वित्तो भोगप्रत्यययोः[३] ॥ ५८ ॥

भित्तं शकलम् ॥ ५९ ॥

ऋणमाधमर्ण्ये ॥ ६० ॥

नसत्तनिषत्तानुत्तप्रतूर्तसूर्तगूर्तानि छन्दसि ॥ ६१ ॥

क्विन्प्रत्ययस्य कुः ॥ ६२ ॥

नशेर्वा ॥ ६३ ॥

मो नो धातोः ॥ ६४ ॥

म्वोश्च ॥ ६५ ॥

ससजुषो रुः ॥ ६६ ॥

अवयाः श्वेतवाः पुरोडाश्च ॥ ६७ ॥

अहन् ॥ ६८ ॥

१ रुविधावह्नो रूपरात्रिरथंतरेषूपसंख्यानम् ।

रो ऽसुपि ॥ ६९ ॥

१ असुपि रादेश उपसर्जनसमासे प्रतिषेधोऽलुकि ।

२ सिद्धं तु सुपि प्रतिषेधात् ।

३ [४]लुकि चोक्तम् ।

अम्नरूधरवरित्युभयथा छन्दसि ॥ ७० ॥

१ छन्दसि भाषायां च प्रचेतसो राजन्युपसंख्यानम् ।

भुवश्च महाव्याहृतेः ॥ ७१ ॥

वसुस्रंसुध्वंस्वनडुहां दः ॥ ७२ ॥

१ अनडुहो दत्वे नकारप्रतिषेधः ।

---

१ प. पुस्तके इतः परमाधिकम् । कृशेः क एषः विहित इगुपधात् । स्वरे हि दोषो भवति परिकृशे पदस्य लोपो विहित इति मतम् । जगत्यन्त्ना भवति हि रुचिरा । २ प. पुस्तके इतः परमधिकम् । उत्फुल्लसंफुल्लयोरिति वक्तव्यम् । ३ प. पुस्तके इतः परमधिकम् । यस्य विदेः श्नशकौ तपरत्वे तनवचने तद्बाधप्रतिषेधौ । श्यान्विकरणान्न विधिश्छिदितुल्यः । लुग्विकरणो वालि पर्यवपन्नः । ४ प. पुस्तके नास्ति ।

२ सिद्धं तु प्रतिपदविधानान्नुमः ।

तिप्यनस्तेः ॥ ७३ ॥

सिपि धातो रुर्वा ॥ ७४ ॥

दश्च ॥ ७५ ॥

र्वोरुपधाया दीर्घ इकः ॥ ७६ ॥

हलि च ॥ ७७ ॥

उपधायां च ॥ ७८ ॥

१ उपधादीर्घत्वेऽभ्यासजिघ्रिचतुर्णां प्रतिषेधः ।

२ उणादिप्रतिषेधश्च ।

न भकुर्छुराम् ॥ ७९ ॥

अदसो ऽसेर्दादु दो मः ॥ ८० ॥

१ अदसोऽनोस्त्रेः ।

२ तत्र पदाधिकारादपदान्तस्याप्राप्तिः ।

३ सिद्धं तु सकारप्रतिषेधात् ।

४ दाद्ग्रहणमन्त्यप्रतिषेधार्थम् ।

एत ईद्बहुवचने ॥ ८१ ॥

१ ईत्त्वं बहुवचनान्तस्य ।

वाक्यस्य टेः प्लुत उदात्तः ॥ ८२ ॥

१ वाक्याधिकारः पदनिवृत्त्यर्थः ।

२ टिग्रहणमलोऽन्त्यनियमे व्यञ्जनान्तार्थम् ।

३ सर्वादेशप्रसङ्गस्तु ।

४ उक्तं वा ।

प्रत्यभिवादे ऽशूद्रे ॥ ८३ ॥

१ अशूद्रस्त्र्यसूयकेषु ।

२ भोराजन्यविशां वा[१] ।

दूराद्धूते च ॥ ८४ ॥

हैहेप्रयोगे हैहयोः ८५ ॥

१ हैहेप्रयोगे हैहेग्रहणं हैहयोः प्लुत्यर्थम् ।

२ प्रयोगग्रहणमर्थवद्ग्रहणेऽनर्थकार्थम् ।

३ पुनर्हैहेग्रहणमन्त्यार्थम् ।

गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम् ॥ ८६ ॥

१ गुरोः प्लुतविधाने लघोरन्त्यस्य प्लुतप्रसङ्गोऽन्येन विहितत्वात् ।

२ न वानन्त्यस्यापीति वचनमुभयनिर्देशार्थम् ।

३ प्राग्वचनं विभाषार्थम् ।

४ प्राग्वचनानर्थक्यं चैकैकस्येति वचनात् ।

ओमभ्यादाने ॥ ८७ ॥

ये यज्ञकर्मणि ॥ ८८ ॥

१ ये यज्ञकर्मणीत्यतिप्रसङ्गः ।

२ सिद्धं तु ये यजामह इति ब्रूह्यादिषूपसंख्यानात् ।

प्रणवष्टेः ॥ ८९ ॥

१ टिग्रहणं सर्वादेशार्थम् ।

याज्यान्तः ॥ ९० ॥

ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः ॥ ९१ ॥

अग्नीत्प्रेषणे परस्य च ॥ ९२ ॥

१ अग्नीत्प्रेषण इत्यतिप्रसङ्गः ।

२ सिद्धं त्वोश्रावये परस्य चेति वचनात्[३] ।

विभाषा पृष्टप्रतिवचने हेः ॥ ९३ ॥

१ प. पुस्तके नास्ति । २ प. पुस्तके इतः परमधिकम् । सर्वस्यव नाम्नः प्रत्यभिवादे भोः शब्द आदेशो वक्तव्यः । ३ प. पुस्तके इतः परमधिकम् । ओश्रावयाश्रावयोरिति वक्तव्यम् । बहुलमन्यत्रेति वक्तव्यम् ।

निगृह्यानुयोगे च ॥ ९४ ॥

आम्रेडितं भर्त्सने ॥ ९५ ॥

१ भर्त्सने पर्यायेण ।

अङ्गयुक्तं तिङाकाङ्क्षम् ॥ ९६ ॥

विचार्यमाणानाम् ॥ ९७ ॥

पूर्वं तु भाषायाम् ॥ ९८ ॥

प्रतिश्रवणे च ॥ ९९ ॥

अनुदात्तं प्रश्नान्ताभिपूजितयोः ॥ १०० ॥

चिदिति चोपमार्थे प्रयुज्यमाने ॥ १०१ ॥

उपरि स्विदासीदिति च ॥ १०२ ॥

स्वरितमाम्रेडितेऽसूयासंमतिकोपकुत्सनेषु ॥ १०३ ॥

१ असूयादिषु वावचनम् ।

क्षियाशीःप्रैषेषु तिङाकाङ्क्षम् ॥ १०४ ॥

अनन्त्यस्यापि प्रश्नाख्यानयोः ॥ १०५ ॥

प्लुतावैच इदुतौ ॥ १०६ ॥

१ ऐचोरुभयविवृद्धिप्रसङ्गादिदुतोः प्लुतवचनम् ।

२ तत्रायथेष्टप्रसङ्गः ।

३ सिद्धं त्विदुतोर्दीर्घवचनात् ।

एचो ऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्यादुत्तरस्येदुतौ ॥ १०७ ॥

१ [1] एचः प्लुतविकारे पदान्तग्रहणम् ।

२ विषयपरिगणनं च ।

३ आमन्त्रिते छन्दस्युपसंख्यानम् ।

तयोर्य्वावचि संहितायाम् ॥ १०८ ॥

॥ इत्यष्टमाध्यायस्य द्वितीयः पादः ॥

मतुवसो रु संबुद्धौ छन्दसि ॥ १ ॥

१ मतुवसो रादेशे वन उपसंख्यानम् ।

२ विभाषा भवद्भगवदघवतामोच्चावस्य ।

अत्रानुनासिकः पूर्वस्य तु वा ॥ २ ॥

आतो ऽटि नित्यम् ॥ ३ ॥

अनुनासिकात्परो ऽनुस्वारः ॥ ४ ॥

समः सुटि ॥ ५ ॥

पुमः खय्यम्परे ॥ ६ ॥

नश्छव्यप्रशान् ॥ ७ ॥

उभयथर्क्षु ॥ ८ ॥

दीर्घादटि समानपादे ॥ ९ ॥

नॄन्पे ॥ १० ॥

स्वतवान्पायौ ॥ ११ ॥

कानाम्रेडिते ॥ १२ ॥

१ संपुंकानां सत्वम् ।

२ रुविधौ ह्यनिष्टप्रसङ्गः ।

ढो ढे लोपः ॥ १३ ॥

१ ढलोपेऽपदान्तग्रहणम् ।

२ जश्भावादिति चेदुत्तरत्र ढस्याभावादपवादप्रसङ्गः ।

३ तस्मात्सिद्धवचनम् ।

४ संग्रहणं वा ।

रो रि ॥ १४ ॥

खरवसानयोर्विसर्जनीयः ॥ १५ ॥

---

१ प. पुस्तके एच इति नास्ति । २ प. पुस्तके इतः परमधिकम् । प्रश्नान्ताभिपूजितविचार्यमाणप्रत्यभिवादयाज्यान्तेष्विति वक्तव्यम् ।

१ विसर्जनीयोऽनुत्तरपदे ।

२ न वा बहिरङ्गलक्षणत्वात् ।

रोः सुपि ॥ १६ ॥

भोभगोअघोअपूर्वस्य योऽशि ॥ १७ ॥

१ अश्ग्रहणमनर्थकमन्यत्राभावात् ।

व्योर्लघुप्रयत्नतरः शाकटायनस्य ॥ १८ ॥

लोपः शाकल्यस्य ॥ १९ ॥

ओतो गार्ग्यस्य ॥ २० ॥

१ ओकाराल्लोपवचनं नित्यार्थम् ।

उञि च पदे ॥ २१ ॥

हलि सर्वेषाम् ॥ २२ ॥

मोऽनुस्वारः ॥ २३ ॥

नश्चापदान्तस्य झलि ॥ २४ ॥

मो राजि समः क्वौ ॥ २५ ॥

हे मपरे वा ॥ २६ ॥

१ यवलपरे यवला वा ।

नपरे नः २७ ॥

ङ्णोः कुक्टुक् शरि ॥ २८ ॥

डः सि धुट् ॥ २९ ॥

नश्च ॥ ३० ॥

शि तुक् ॥ ३१ ॥

ङमो ह्रस्वादचि ङमुण्नित्यम् ॥ ३२ ॥

१ घुगादिषु ह्रस्वणत्वप्रतिषेधः ।

२ परादौ छत्वषत्वविधिप्रतिषेधः ।

३ ङमुटि पदादिग्रहणम् ।

मय उञो वो वा ॥ ३३ ॥

विसर्जनीयस्य सः ॥ ३४ ॥

शर्परे विसर्जनीयः ॥ ३५ ॥

वा शरि ॥ ३६ ॥

१ वाशर्प्रकरणे खर्परे लोपः ।

कुप्वोः ≍क≍पौ च ॥ ३७ ॥

१ सस्या कुप्वोर्विसर्जनीयजिह्वामूलीयोपध्मानीयाः ।

१ विसर्जनीयादेशे हि शर्परयोरेवादेशप्रसङ्गः ।

सो ऽपदादौ ॥ ३८ ॥

१ सोऽपदादावनव्ययस्य ।

२ रोः काम्ये नियमार्थम् ।

इणः षः ॥ ३९ ॥

नमस्पुरसोर्गत्योः ॥ ४० ॥

इदुदुपधस्य चाप्रत्ययस्य ॥ ४१ ॥

१ इदुदुपधस्य चाप्रत्ययस्येति चेत्पुम्मुहुसोः प्रतिषेधः ।

२ हुतानां तादौ च ।

३ न वा बहिरङ्गलक्षणत्वात् ।

४ भ्रातुष्पुत्रग्रहणं ज्ञापकमेकादेशनिमित्तात्षत्वप्रतिषेधस्य ।

तिरसो ऽन्यतरस्याम् ॥ ४२ ॥

द्विस्त्रिश्चतुरिति कृत्वोऽर्थे ॥ ४३ ॥

इसुसोः सामर्थ्ये ॥ ४४ ॥

नित्यं समासे ऽनुत्तरपदस्थस्य[३] ॥ ४५ ॥

---

१ प. पुस्तके नास्ति । २ प. पुस्तके इतः परमधिकम् । वृद्धिभूतानां षत्वं वक्तव्यम् । ३ प. पुस्तके इतः परमधिकम् । नानापदार्थयोर्वर्तमानयोः ख्यायते यदा योगः । तस्मिन्षत्वं कार्यं तद्युक्तं तत्र मे नेह । ऐकार्थ्ये सामर्थ्ये वाक्ये षत्वं न मे प्रसज्येत । तस्मादिह व्यपेक्षां सामर्थ्यं साधु मन्यते । अथ चेत्कृदन्तमेतत्ततोऽधिके नैव मे भवेत्प्राप्तिः । वाक्ये च मे विभाषा प्रतिषेधो न प्रकल्प्येत । अथ चेत्संविज्ञानं नित्ये षत्वे ततो विभाषेयम् । सिद्धं च मे समासे प्रतिषेधार्थस्तु यत्नोऽयम् ।

अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य ॥ ४६ ॥

अधःशिरसी पदे ॥ ४७ ॥

कस्कादिषु च ॥ ४८ ॥

छन्दसि वाप्राम्रेडितयोः ॥ ४९ ॥

कःकरत्करतिकृधिकृतेष्वनदितेः ॥५०॥

पञ्चम्याः परावध्यर्थे ॥ ५१ ॥

पातौ च बहुलम् ॥ ५२ ॥

षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु ॥ ५३ ॥

इडाया वा ॥ ५४ ॥

अपदान्तस्य मूर्धन्यः ॥ ५५ ॥

सहेः साडः सः ॥ ५६ ॥

१ साडः षत्वे समानशब्दप्रतिषेधः।

२ अर्थवद्ग्रहणात्सिद्धमिति चेत्तद्धितलोपेऽर्थवत्त्वात्प्रतिषेधः।

इण्कोः ॥ ५७ ॥

नुम्विसर्जनीयशर्व्यवायेऽपि ॥ ५८ ॥

१ नुम्विसर्जनीयशर्व्यवाये निंसेः प्रतिषेधः।

२ योगविभागात्सिद्धम्।

आदेशप्रत्यययोः ॥ ५९ ॥

१ आदेशप्रत्यययोः षत्वे सरकः प्रतिषेधः।

२ बहुलवचनात्सिद्धम्।

३ आदेशप्रत्यययोरित्यवयवषष्ठी चेद्द्विर्वचने प्रतिषेधः।

४ समानाधिकरणानां चाप्राप्तिः।

५ नानाविभक्तीनां च[३] समासानुपपत्तिः।

६ योगविभागात्सिद्धम्।

७ [४]उक्तं वा।

शासिवसिघसीनां च ॥ ६० ॥

स्तौतिण्योरेव षण्यभ्यासात् ॥ ६१ ॥

सः स्विदिस्वदिसहीनां च ॥ ६२ ॥

प्राक्सितादड्व्यवायेऽपि ॥ ६३ ॥

स्थादिष्वभ्यासेन चाभ्यासस्य ॥ ६४ ॥

१ स्थादिष्वभ्यासवचनं नियमार्थम्।

२ तद्व्यवाये चाषोपदेशार्थम्।

३ अवर्णार्थं षणि प्रतिषेधार्थं च।

उपसर्गात् सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम् ॥ ६५ ॥

१ उपसर्गात्षत्वे निस उपसंख्यानमनिणन्तत्वात्।

२ न वा वर्णाश्रयत्वात्षत्वस्य तद्विशेषक उपसर्गो धातुश्च।

३ सुनोत्यादीनां षत्वे ण्यन्तस्योपसंख्यानमधिकत्वात्।

४ न वावयवस्यानन्यत्वात्।

५ नामधातोस्तु प्रतिषेधः।

६ न वानुपसर्गत्वात्।

सदिरप्रतेः ॥ ६६ ॥

---

१ प. पुस्तके इतः परमधिकम्। अर्थवद्ग्रहणात्सिद्धम्। २ प. पुस्तके सरगादीनामिति। ३-४ प. पुस्तके नास्ति। ५ प. पुस्तके अनिणन्तत्वादिति नास्ति।

[1]स्तम्भेः ॥ ६७ ॥
अवाच्चालम्बनाविदूर्ययोः ॥ ६८ ॥
वेश्च स्वनो भोजने ॥ ६९ ॥
परिनिविभ्यः सेवसितसयसिवुसहसुट्-स्तुस्वञ्जाम् ॥ ७० ॥
सिवादीनां वाड्व्यवायेऽपि ॥ ७१ ॥
अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु ॥ ७२ ॥
वेः स्कन्देरनिष्ठायाम् ॥ ७३ ॥
परेश्च ॥ ७४ ॥
परिस्कन्दः प्राच्यभरतेषु ॥ ७५ ॥
स्फुरतिस्फुलत्योर्निर्निविभ्यः ॥ ७६ ॥
वेः स्कभ्नातेर्नित्यम् ॥ ७७ ॥
इणःषीध्वंलुङ्लिटां धोऽङ्गात् ॥ ७८ ॥
विभाषेटः ॥ ७९ ॥

१ इण्ग्रहणं ढत्वे कवर्गनिवृत्त्यर्थम् ।
२ तत्र प्रत्ययपरत्व इटो लिटि ढत्वं परादित्वात् ।
३ धकारपरत्वे षीध्वम्यनन्तरत्वादिटो विभाषाभावः ।
४ इण्ग्रहणस्य चाविशेषणत्वात्ष्यादिमात्रे ढत्वप्रसङ्गः ।

समासेऽङ्गुलेः सङ्गः ॥ ८० ॥
भीरोः स्थानम् ॥ ८१ ॥
अग्नेः स्तुत्स्तोमसोमाः ॥ ८२ ॥

१ अग्नेर्दीर्घात्सोमस्य ।
२ इतरथा ह्यनिष्टप्रसङ्गः ।

ज्योतिरायुषः स्तोमः ॥ ८३ ॥
मातृपितृभ्यां स्वसा ॥ ८४ ॥
मातुःपितुर्भ्यामन्यतरस्याम्[1] ॥ ८५ ॥

१ मातुःपितुरिति सान्तग्रहणानर्थक्यमेकदेशविकृतस्यानन्यत्वात् ।

अभिनिसः स्तनः शब्दसंज्ञायाम् ॥८६॥
उपसर्गप्रादुर्भ्यामस्तिर्यच्परः ॥ ८७ ॥
सुविनिर्दुर्भ्यः सुपिसूतिसमाः ८८ ॥
निनदीभ्यां स्नातेः कौशले ॥ ८९ ॥
सूत्रं प्रतिष्णातम् ॥ ९० ॥
कपिष्ठलो गोत्रे ॥ ९१ ॥

१ कपिष्ठलो गोत्रप्रकृतौ ।

प्रष्ठोऽग्रगामिनि ॥ ९२ ॥
वृक्षासनयोर्विष्टरः ॥ ९३ ॥
छन्दोनाम्नि च ॥ ९४ ॥
गवियुधिभ्यां स्थिरः ॥ ९५ ॥
विकुशमिपरिभ्यः स्थलम् ॥ ९६ ॥
अम्बाम्बगोभूमिसव्यापद्वित्रिकुशेकुशङ्कुङ्गुमञ्जिपुञ्जिपरमेबर्हिर्दिव्यग्निभ्यः स्थः ॥ ९७ ॥
सुषामादिषु च ॥ ९८ ॥
ह्रस्वात्तादौ तद्धिते ॥ ९९ ॥

१ वे. का. वा प. पुस्तकेषु स्तन्मेरिति । २ प. पुस्तके इतः परमाधिकम् । सान्ताभ्यां चेति वक्तव्यम् । ३ प. पुस्तके इतः परमाधिकम् । सुपेः षत्वं स्वपेर्मा भूत् । विसुष्वापेति केन न । हलादिशेषान्न सुपिः । इष्टं पूर्वं प्रसारणम् । स्थादीनां नियमो नात्र प्राक्सितादुत्तरः सुपिः । अनर्थके त्रिषुषुपुः । सुपिभूतो द्विरुच्यते । ४ प. पुस्तके इतः परमधिकम् । स्थस्थास्थिन्स्थूणामिति वक्तव्यम् । ५ इतः परम् एति संज्ञायामगात् नक्षत्राद्वा इति सूत्रद्वयं बहुषु पुस्तकेषु समुपलभ्यते । तथापि अनयोर्गणसूत्रत्वमेव न्याय्यम् । एतदुदाहरणानां गणे समुपलम्भात् ।

निसस्तपतावनासेवने ॥ १०० ॥

युष्मत्तत्ततक्षुःष्वन्तःपादम् ॥ १०१ ॥

१ ह्रस्वात्तादौ तिङि प्रतिषेधः ।

यजुष्येकेषाम् ॥ १०२ ॥

स्तुतस्तोमयोश्छन्दसि ॥ १०३ ॥

१ स्तुतस्तोमयोश्छन्दस्यनर्थकं वचनं पूर्वपदादिति सिद्धत्वात् ।

पूर्वपदात् ॥ १०४ ॥

सुञः ॥ १०५ ॥

सनोतेरनः ॥ १०६ ॥

१ सनोतेरन इति च ।

२ सनोतेरन इति नियमार्थमिति चेत्सवनादिकृतत्वात्सिद्धम् ।

३ सनर्थं तु ।

सहेः पृतनर्तभ्यां च ॥ १०७ ॥

न रपरसृपिसृजिस्पृशिस्पृहिसवनादीनाम् ॥ १०८ ॥

सात्पदाद्योः ॥ १०९ ॥

सिचो यङि ॥ ११० ॥

सेधतेर्गतौ ॥ १११ ॥

प्रतिस्तब्धनिस्तब्धौ च ॥ ११२ ॥

सोढः ॥ ११३ ॥

स्तम्भुसिवुसहां चङि ॥ ११४ ॥

१ स्तम्भुसिवुसहां चङ्युपसर्गात् ।

सुनोतेः स्यसनोः ॥ ११५ ॥

सदेः परस्य लिटि ॥ ११६ ॥

१ सदो लिटि प्रतिषेधे स्वञ्जेरुपसंख्यानम् ।

निव्यभिभ्यो ऽड्व्यवाये वा छन्दसि ॥ ११७ ॥

॥ इत्यष्टमाध्यायस्य तृतीयः पादः ॥

रषाभ्यां नो णः समानपदे ॥ १ ॥

१ रषाभ्यां णत्व ऋकारग्रहणम् ।

२ एकदेशे लुडादिषु चोक्तम् ।

अट्कुप्वाङ्नुम्व्यवाये ऽपि ॥ २ ॥

१ अड्व्यवाये णत्वेऽन्यव्यवाये प्रतिषेधः ।

२ न वान्येन व्यपेतत्वात् ।

३ तत्समुदाये णत्वाप्रसिद्धिर्यथान्यत्र ।

४ कुव्यवाये हादेशेषु प्रतिषेधः ।

५ प्रयोजनं वृत्रघ्नः स्रुघ्नः प्राघानीति ।

६ नुम्व्यवाये णत्वेऽनुस्वाराभावे प्रतिषेधः ।

७ अनागमे च णत्वम् ।

८ अनुस्वारव्यवायवचनात्तु सिद्धम् ।

पूर्वपदात्संज्ञायामगः ॥ ३ ॥

१ पूर्वपदात्संज्ञायामुत्तरपदग्रहणम् ।

२ तद्धितपूर्वपदस्थाप्रतिषेधार्थम् ।

३ संज्ञायां नियमवचने गप्रतिषेधान्नियमप्रतिषेधः ।

४ तत्र नित्यं णत्वप्रसङ्गः ।

५ योगविभागात्सिद्धम् ।

६ अप्रतिषेधो वा यथा सर्वनामसंज्ञायाम् ।

वनं पुरगामिश्रकासिध्रकाशारिकाकोटराग्रेभ्यः ॥ ४ ॥

---

१ ब. क. पुस्तकयोः सहेः स्थाने सदिष्वञ्जोरिति पाठः । २ घ. पुस्तके नास्ति ।

प्रनिरन्तःशरेक्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्यो ऽसंज्ञायामपि ॥ ५ ॥

विभाषौषधिवनस्पतिभ्याम्[1] ॥ ६ ॥

अह्नो ऽदन्तात्[2] ॥ ७ ॥

वाहनमाहितात्[3] ॥ ८ ॥

पानं देशे ॥ ९ ॥

वा भावकरणयोः ॥ १० ॥

१ वाप्रकरणे गिरिनद्यादीनामुपसंख्यानम्।

प्रातिपदिकान्तनुम्विभक्तिषु च ॥११॥

१ प्रातिपदिकान्तस्य णत्वे समासान्तग्रहणमसमासान्तप्रतिषेधार्थम्।

२ [4]लिङ्गविशिष्टग्रहणे चोक्तम्।

३ तत्र युवादिप्रतिषेधः।

एकाजुत्तरपदे णः ॥ १२ ॥

कुमति च ॥ १३ ॥

उपसर्गादसमासे ऽपि णोपदेशस्य ॥१४॥

१ णोपदेशं प्रत्युपसर्गाभावादनिर्देशः।

२ वचनप्रामाण्यादिति चेत्पदलोपे प्रतिषेधः।

३ सिद्धं तु यं प्रत्युपसर्गस्तत्स्थस्येति वचनात्।

हिनु मीना ॥ १५ ॥

१ हिनुमिनाग्रहणे विकृतस्योपसंख्यानम्।

२ सिद्धमचः स्थानिवत्त्वात्।

आनि लोट् ॥ १६ ॥

१ आनि लोड्ग्रहणानर्थक्यमर्थवद्ग्रहणात्।

२ अनुपसर्गाद्वा।

नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च ॥ १७ ॥

१ नेर्गदादिष्वड्व्यवाय उपसंख्यानम्।

शेषे विभाषाकखादावषान्त उपदेशे ॥ १८ ॥

अनितेः ॥ १९ ॥

अन्तः ॥ २० ॥

१ [5]अनितेरन्तग्रहणं संबुद्ध्यर्थम्[6]।

उभौ साभ्यासस्य ॥ २१ ॥

हन्तेरत्पूर्वस्य ॥ २२ ॥

१ हन्तेरत्पूर्वस्य वचन उक्तम्।

वमोर्वा ॥ २३ ॥

अन्तरदेशे ॥ २४ ॥

अयनं च ॥ २५ ॥

छन्दस्यृदवग्रहात् ॥ २६ ॥

नश्च धातुस्थोरुषुभ्यः ॥ २७ ॥

[7]उपसर्गादनोत्परः ॥ २८ ॥

कृत्यचः ॥ २९ ॥

१ कृत्स्थस्य णत्वे निर्विण्णस्योपसंख्यानम्।

णेर्विभाषा ॥ ३० ॥

१ णेर्विभाषायां साधनव्यवाय उपसंख्यानम्।

---

१ प. पुस्तके इतः परमधिकम्। द्व्यक्षरत्र्यक्षरेभ्य इति वक्तव्यम्। रिकादिभ्यः प्रतिषेधो वक्तव्यः। २ अदन्तादन्तस्येति वक्तव्यम्। ३ आहितोपस्थितयोरिति वक्तव्यम्। वाहनं वाह्यादिति वक्तव्यम्। ४ प. पुस्तके नास्ति। ५ प. पुस्तके इतः परमाधिकम्। यो वा तस्मादनन्तरः। ६ प. पुस्तके इतः परमधिकम्। साभ्यासस्य द्वयोरिष्टम्। ७ वै. का. नि. प्र पुस्तकेषु एतत्सूत्रम् उपसर्गाद्बहुलमिति। ८ प. पुस्तके इतः परमाधिकम्। भाविन्यप्योति नेष्यते।

२ तद्विधानात्सिद्धम् ।

३ अड्धिकाराद्वा ।

हलश्चेजुपधात् ॥ ३१ ॥

इजादेः सनुमः ॥ ३२ ॥

१ सनुमो णत्वेऽवधारणाप्रसिद्धिर्विधेयभावात् ।

२ सिद्धं तु प्रतिषेधाधिकारे सनुम्ग्रहणात् ।

३ कृत्स्थस्य च णत्वे इजादेः सनुमो ग्रहणम् ।

वा निंसनिक्षनिन्दाम् ॥ ३३ ॥

न भाभूपूकमिगमिप्यायिवेपाम् ॥ ३४ ॥

१ भाविषु पुग्ग्रहणम् ।

२ ण्यन्तस्य चोपसंख्यानम् ।

षात्पदान्तात् ॥ ३५ ॥

१ षात्पदादिपरवचनम् ।

नशेः षान्तस्य ॥ ३६ ॥

१ नशेरशः ।

पदान्तस्य ॥ ३७ ॥

पदव्यवाये ऽपि ॥ ३८ ॥

१ पदव्यवायेऽतद्धिते ।

क्षुभ्नादिषु च ॥ ३९ ॥

स्तोः श्चुना श्चुः ॥ ४० ॥

ष्टुना ष्टुः ॥ ४१ ॥

न पदान्ताट्टोरनाम्[१] ॥ ४२ ॥

तोः षि ॥ ४३ ॥

शात् ॥ ४४ ॥

यरो ऽनुनासिके ऽनुनासिको वा ॥ ४५ ॥

१ यरोऽनुनासिके प्रत्यये भाषायां नित्यवचनम् ।

अचो रहाभ्यां द्वे ॥ ४६ ॥

अनचि च ॥ ४७ ॥

१ द्विर्वचने यणो मयः ।

२ शरः खयः ।

३ अवसाने च ।

नादिन्याक्रोशे पुत्रस्य ॥ ४८ ॥

१ नादिन्याक्रोशे पुत्रस्येति तत्परे च ।

२ वा हतजग्धपरे च ।

३ चयो द्वितीयाः शरि पौष्करसादेः ।

शरो ऽचि ॥ ४९ ॥

त्रिप्रभृतिषु शाकटायनस्य ॥ ५० ॥

सर्वत्र शाकल्यस्य ॥ ५१ ॥

दीर्घादाचार्याणाम् ॥ ५२ ॥

झलां जश् झशि ॥ ५३ ॥

अभ्यासे चर्च ॥ ५४ ॥

खरि च ॥ ५५ ॥

वावसाने ॥ ५६ ॥

अणो ऽप्रगृह्यस्यानुनासिकः ॥ ५७ ॥

अनुस्वारस्य ययि परसवर्णः ॥ ५८ ॥

वा पदान्तस्य ॥ ५९ ॥

तोर्लि ॥ ६० ॥

उदः स्थास्तम्भोः पूर्वस्य ॥ ६१ ॥

१ उदः पूर्वत्वे स्कन्देश्छन्दस्युपसंख्यानम् ।

झयो हो ऽन्यतरस्याम् ॥ ६२ ॥

शश्छो ऽटि ॥ ६३ ॥

१ छत्वममि तच्छ्लोकेन तच्छ्मश्रुणेति प्रयोजनम् ।

हलो यमां यमि लोपः ॥ ६४ ॥

झरो झरि सवर्णे ॥ ६५ ॥

---

१ प. पुस्तके इतः परमधिकम् । अनाम्नवतिनगरीणामिति वक्तव्यम् ।

१ झरो झरि सवर्णग्रहणं समसंख्यप्रतिषेधार्थम् ।

उदात्तादनुदात्तस्य स्वरितः ॥ ६६ ॥

नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम् ॥ ६७ ॥

अ अ ॥ ६८ ॥

१ अकारस्य प्रत्यापत्तौ दीर्घप्रतिषेधः ।

२ आदेशस्य चानण्त्वान्न सवर्णग्रहणम् ।

३ सिद्धं तु तपरनिर्देशात् ।

४ एकशेषनिर्देशाद्वा स्वरभिन्नानां भगवतः पाणिनेः सिद्धम् ।

॥ समाप्तम् ॥

परिशिष्टवार्तिकानि कैयटाद्युक्तानि ।

अग्रग्रामाभ्यां नयतेर्णो वाच्यः । ३·२·६१.
अर्णसो लोपश्च । ५·२·१०९.
अवर्णान्ताद्वा । ६·३·९७.
अव्ययस्य च्वावीत्वं नेति वाच्यम् । ७·४·३२.
अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया । २·३·२३.
उशनसः संबुद्धौ वानङ् नलोपश्च वा वाच्यः। ७·१·८९.
ऋवर्णादपि । ५·३·८३.
एकाचो नित्यम् । ४·३·१४४.
ओतो णिदिति वाच्यम् । ६·१·९३.
कारके छे च न निषेधः । ६·३·९९.
कृष्णोदक्पाण्डुसंख्यापूर्वाया भूमेरच् । ५·४·७५.
कृत्यजादौ वा । ७·२·११४.
गतिकारकेतरपूर्वपदस्य यण् नेष्यते । ६·४·८२.
गम्यमानापि क्रिया कारकविभक्तीनां निमित्तम् । १·४·३१.
गुणकर्मणि वेष्यते । २·३·६५.
झलादाविति वक्तव्यम् । ६·४·३२.
तनिपतिदरिद्रातिभ्यः सनो वा इड्वाच्यः । ७·४·५६.
त्यदादीनां फिञ्वा वाच्यः । ४·१·१५६.
त्रिचतुर्भ्यां हायनस्य णत्वं वाच्यम् । ४·१·२७.
दोष उपसंख्यानम् । ७·३·५१.
पाशकल्पककाम्येष्विति वाच्यम् । ८·३·३८
मिथोऽनयोः समासे संख्या पूर्वं शब्दपरविप्रतिषेधात् । २·२·३५.
रादेशात्पूर्वविप्रतिषेधेन नुम् । ६·४·४.
वस्त्रात्समाच्छादने । ३·१·२१.
व्रताद्भोजनतन्निवृत्त्योः । ३·१·२१.
शुनो दन्तदंष्ट्राकर्णकुन्दवराहपुच्छपदेषु दीर्घो वाच्यः । ६·३·१३०.

---

१ वै. का. प्र. पुस्तकेषु सूत्रे इतीत्यधिकम् । २ प. पुस्तके इतः परमधिकम् । आदेशार्थं सवर्णार्थमकारो विवृतः स्मृतः । आकारस्य तथा ह्रस्वस्तदर्थं पाणिनेर अ ।

श्वशुरस्योकाराकारलोपश्च । ४·१·६८
संख्याया नदीगोदावरीभ्यां च । ५·४·७५
सनिण्वुलि ल्युटि च न । ६·४·११२
संभ्रमेण प्रवृत्तौ यथेष्टमनेकधा प्रयोगः । ८·१·१२

सामान्ये नपुंसकम् । २·४·१७
सृजेः श्रद्धोपपन्ने कर्तर्येव । ३·१·६३
सोपसर्गस्य न । ६·१·२८
हल्यादिभ्यो ग्रहणे । ३·१·२१

॥ समाप्तम् ॥

धातुपाठः ।

१ भू सत्तायाम् ॥ उदात्तः परस्मैभाषः॥ २ एध वृद्धौ । ३ स्पर्ध संघर्षे । ४ गाधृ प्रतिष्ठालिप्सयोर्ग्रन्थे च । ५ बाधृ लोडने । ६ नाथृ । ७ नाधृ याच्ञोपतापैश्वर्याशीःषु । ८ दध धारणे । ९ स्कुदि आप्रवणे । १० श्विदि श्वैत्ये । ११ वदि अभिवादनस्तुत्योः । १२ भदि कल्याणे सुखे च । १३ मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु । १४ स्पदि किंचिच्चलने । १५ क्लिदि परिदेवने । १६ मुद हर्षे । १७ दद दाने । १८ ष्वद १९ स्वर्द आस्वादने । २० उर्द माने क्रीडायां च । २१ कुर्द २२ खुर्द २३ गुर्द २४ गुद क्रीडायामेव । २५ षूद क्षरणे । २६ ह्राद अव्यक्ते शब्दे । २७ ह्लादी सुखे च । २८ स्वाद आस्वादने । २९ पर्द कुत्सिते शब्दे । ३० यती प्रयत्ने । ३१ युतृ ३२ जुतृ भासने । ३३ विथृ ३४ वेथृ याचने । ३५ श्रथि शैथिल्ये । ३६ ग्रथि कौटिल्ये । ३७ कत्थ श्लाघायाम् ॥ एधादय उदात्ता अनुदात्तेत आत्मनेभाषाः॥ ३८ अत सातत्यगमने । ३९ चिती संज्ञाने । ४० च्युतिर् आसेचने । ४१ श्च्युतिर् क्षरणे । ४२ मन्थ विलोडने । ४३ कुथि ४४ पुथि ४५ लुथि ४६ मथि हिंसासंक्लेशनयोः । ४७ षिध गत्याम् । ४८ षिधू शास्त्रे माङ्गल्ये च । ४९ खाद भक्षणे । ५० खद स्थैर्ये हिंसायां च । ५१ बद स्थैर्ये । ५२ गद व्यक्तायां वाचि । ५३ रद विलेखने । ५४ णद अव्यक्ते शब्दे । ५५ अर्द गतौ याचने च । ५६ नर्द ५७ गर्द शब्दे ५८ तर्द हिंसायाम् । ५९ कर्द कुत्सिते शब्दे । ६० खर्द दन्दशूके । ६१ अति ६२ अदि बन्धने । ६३ इदि परमैश्वर्ये । ६४ बिदि

अवयवे ॥ भिदि इत्येके ॥ ६५ गडि वदनैकदेशे । ६६ णिदि कुत्सायाम् । ६७ टुनदि समृद्धौ । ६८ चदि आह्लादे । ६९ त्रदि चेष्टायाम् । ७० कदि ७१ क्रदि ७२ क्लदि आह्वाने रोदने च । ७३ क्लिदि परिवेदने । ७४ शुन्ध शुद्धौ ॥ अतादय उदात्ता उदात्तेतः परस्मैभाषः ॥ ७५ शीकृ सेचने । ७६ लोकृ दर्शने । ७७ श्लोकृ संघाते । ७८ देकृ ७९ ध्रेकृ शब्दोत्साहयोः । ८० रेकृ शङ्कायाम् । ८१ सेकृ ८२ स्रेकृ ८३ स्रकि ८४ श्रकि ८५ श्लकि गतौ ८६ शकि शङ्कायाम् । ८७ अकि लक्षणे । ८८ वकि कौटिल्ये । ८९ मकि मण्डने । ९० कक लौल्ये । ९१ कुक ९२ वृक आदाने । ९३ चक तृप्तौ प्रतिघाते च । ९४ ककि ९५ वकि ९६ श्वकि ९७ त्रकि ९८ ढौकृ ९९ त्रौकृ १०० ष्वष्क १०१ वस्क १०२ मस्क १०३ टिकृ १०४ टीकृ १०५ तिकृ १०६ तीकृ १०७ रघि १०८ लघि गत्यर्थाः ॥ तृतीयो दन्त्यादिरित्येके । लघि भोजननिवृत्तावपि ॥ १०९ अघि ११० वघि १११ मघि गत्याक्षेपे । मघि कैतवे च ॥ ११२ राघृ ११३ लाघृ ११४ द्राघृ सामर्थ्ये ॥ ध्राघृ इत्यपि केचित् । द्राघृ आयामे च ॥ ११५ श्लाघृ कत्थने ॥ शीकादय उदात्ता अनुदात्तेत आत्मनेभाषाः ॥ ११६ फक्क नीचैर्गतौ । ११७ तक हसने । ११८ तकि कृच्छ्रजीवने । ११९ बुक्क भषणे । १२० कख हसने । १२१ ओखृ १२२ राखृ १२३ लाखृ १२४ द्राखृ १२५ ध्राखृ शोषणालमर्थयोः । १२६ शाखृ १२७ श्लाखृ व्याप्तौ । १२८ उख १२९ उखि १३० वख १३१ वखि १३२ मख १३३ मखि १३४ णख १३५ णखि १३६ रख १३७ रखि १३८ लख १३९ लखि १४० इख १४१ इखि १४२ ईखि १४३ वल्ग १४४ रगि १४५ लगि १४६ अगि १४७ वगि १४८ मगि १४९ तगि १५० त्वगि १५१ श्रगि १५२ श्लगि १५३ इगि १५४ रिगि १५५ लिगि गत्यर्थाः ॥ रिख त्रख त्रिखि शिखि इत्यपि केचित् । त्वगि कम्पने च ॥ १५६ युगि १५७ जुगि १५८ वुगि वर्जने । १५९ घघ हसने । १६० मघि मण्डने । १६१ शिघि आघ्राणे ॥ फक्कादय उदात्ता उदात्तेतः परस्मैभाषाः ॥ १६२ वर्च दीप्तौ । १६३ षच सेचने सेवने च । १६४ लोचृ दर्शने । १६५ शच व्यक्तायां वाचि । १६६ श्वच १६७ श्वचि गतौ । १६८ कच बन्धने । १६९ कचि १७० काचि दीप्तिबन्धनयोः । १७१ मच १७२ मुचि कल्कने ॥ कथन इत्यन्ये ॥ १७३ मचि धारणोच्छ्रायपूजनेषु । १७४ पचि व्यक्तीकरणे । १७५ ष्टुच प्रसादे । १७६ ऋज गतिस्थानार्जनोपार्जनेषु । १७७ ऋजि १७८ भृजी भर्जने । १७९ एजृ १८० भ्रेजृ १८१ भ्राजृ दीप्तौ । १८२ ईज गतिकुत्सनयोः ॥ वर्चादय उदात्ता अनुदात्तेत आत्मनेभाषाः ॥ १८३ शुच शोके । १८४ कुच शब्दे तारे । १८५ कुञ्च १८६ क्रुञ्च कौटिल्याल्पीभावयोः । १८७ लुञ्च

अपनयने । १८८ अन्चु गतिपूजनयोः । १८९ वन्चु १९० चन्चु १९१ तन्चु १९२ त्वन्चु १९३ म्रुन्चु १९४ म्लुन्चु १९५ म्रुचु १९६ म्लुचु गत्यर्थाः । १९७ ग्रुचु १९८ ग्लुचु १९९ कुजु २०० खुजु स्तेयकरणे । २०१ ग्लुन्चु २०२ षस्ज गतौ । २०३ गुजि अव्यक्ते शब्दे । २०४ अर्च पूजायाम् । २०५ म्लेछ अव्यक्ते शब्दे । २०६ लछ २०७ लाछि लक्षणे । २०८ वाछि इच्छायाम् । २०९ आछि आयामे । २१० ह्रीछ लज्जायाम् । २११ हुर्छा कौटिल्ये । २१२ मुर्छा मोहसमुच्छ्राययोः । २१३ स्फुर्छा विस्तृतौ । २१४ युछ प्रमादे । २१५ उछि उञ्छे । २१६ उछी विवासे । २१७ ध्रज २१८ ध्रजि २१९ धृज २२० धृजि २२१ ध्वज २२२ ध्वजि गतौ । २२३ कूज अव्यक्ते शब्दे । २२४ अर्ज २२५ षर्ज अर्जने । २२६ गर्ज शब्दे । २२७ तर्ज भर्त्सने । २२८ कर्ज व्यथने । २२९ खर्ज पूजने च । २३० अज गतिक्षेपणयोः । २३१ तेज पालने । २३२ खज मन्थे । २३३ खजि गतिवैकल्ये । २३४एजृ कम्पने । २३५ टुओस्फूर्जा वज्रनिर्घोषे । २३६ क्षि क्षये । २३७ क्षीज अव्यक्ते शब्दे । २३८ लज २३९ लजि भर्जने । २४० लाज २४१ लाजि भर्त्सने च । २४२ जज २४३ जजि युद्धे । २४४ तुज हिंसायाम् । २४५ तुजि पालने । २४६ गज २४७ गजि २४८ गृज २४९ गृजि २५० मुज २५१ मुजि शब्दार्थाः । गज मदने च । २५२ वज २५३ व्रज गतौ ॥ शुचादय उदात्ता उदात्तेतः (क्षिवर्जं) परस्मैभाषाः ॥ २५४ अट्ट अतिक्रमहिंसयोः । २५५ वेष्ट वेष्टने । २५६ चेष्ट चेष्टायाम् । २५७ गोष्ट २५८ लोष्ट संघाते । २५९ घट्ट चलने । २६० स्फुट विकसने । २६१ अठि गतौ । २६२ वठि एकचर्यायाम् । २६३ मठि २६४ कठि शोके । २६५ मुठि पालने । २६६ हेठ विबाधायाम् । २६७ एठ च । २६८ हिडि गत्यनादरयोः । २६९ हुडि संघाते । २७० कुडि दाहे । २७१ वडि विभाजने । २७२ मडि च । २७३ भडि परिभाषणे । २७४ पिडि संघाते । २७५ मुडि मार्जने । २७६ तुडि तोडने । २७७ हुडि वरणे ॥ हरण इत्येके ॥ २७८ चडि कोपे । २७९ शडि रुजायां संघाते च । २८० तडि ताडने । २८१ पडि गतौ । २८२ कडि मदे । २८३ खडि मन्थे । २८४ हेडृ २८५ होडृ अनादरे । २८६ बाडृ आप्लाव्ये । २८७ द्राडृ २८८ ध्राडृ विशरणे । २८९ शाडृ श्लाघायाम् ॥ अट्टादय उदात्ता अनुदात्तेत आत्मनेभाषाः ॥ २९० शौटृ गर्वे । २९१ यौटृ बन्धे । २९२ म्लेटृ २९३ म्रेडृ उन्मादे २९४ कटे वर्षावरणयोः ॥ चटे इत्येके ॥ २९५ अट २९६ पट गतौ । २९७ रट परिभाषणे । २९८ लट बाल्ये । २९९ शट रुजाविशरणगत्यवसादनेषु । ३०० वट वेष्टने । ३०१ किट ३०२ खिट त्रासे ।

३०३ शिट ३०४ षिट अनादरे । ३०५ जट ३०६ झट संघाते । ३०७ भट भृतौ । ३०८ तट उच्छ्राये । ३०९ खट काङ्क्षा-याम् । ३१० णट नृतौ । ३११ पिट शब्दसंघातयोः । ३१२ हट दीप्तौ । ३१३ षट अवयवे । ३१४ लुट विलोडने ॥ डान्तोऽयमित्येके ॥ ३१५ चिट परप्रेष्ये । ३१६ बिट शब्दे । ३१७ विट आक्रोशे ॥ हिट इत्येके ॥ ३१८ इट ३१९ किट ३२० कटी गतौ । ३२१ मडि भूषायाम् । ३२२ कुडि वैकल्ये । ३२३ मुड ३२४ प्रुड मर्दने । ३२५ चुडि अल्पीभावे । ३२६ मुडि खण्डने । पुडि चेत्येके ॥ ३२७ रुटि ३२८ लुटि स्तेये ॥ रुठि लुठि इत्येके ॥ रुडि लुडि इत्य-परे ॥ ३२९ स्फुटिर् विशरणे ॥ स्फुटि इत्यपि केचित् ॥ ३३० पठ व्यक्तायां वाचि । ३३१ वठ स्थौल्ये । ३३२ मठ मदनिवासयोः । ३३३ कठ कृच्छ्रजीवने । ३३४ रट परिभाषणे ॥ रठ इत्येके ॥ ३३५ हठ प्लुतिशठत्वयोः ॥ बलात्कार इत्यन्ये ॥ ३३६ रुठ ३३७ लुठ ३३८ उठ उपघाते ॥ ऊठ इत्येके ॥ ३३९ पिठ हिंसासंक्लेशनयोः । ३४० शठ कैतवे च । ३४१ शुठ प्रतिघाते ॥ शुठि इति स्वामी । ३४२ कुठि च । ३४३ लुठि आलस्ये प्रतिघाते च । ३४४ शुठि शोषणे ३४५ रुठि ३४६ लुठि गतौ । ३४७ चुड्ड भावकरणे । ३४८ अड्ड अभियोगे । ३४९ कड्ड कार्कश्ये ॥ चुड्डादयस्त्रयो दोपधाः ॥ ३५० क्रीडृ विहारे । ३५१ तुडृ तोडने ॥ तूडृ इत्येके ॥ ३५२ हुडृ ३५३ हूडृ ३५४ होडृ गतौ । ३५५ रौडृ अनादरे । ३५६ रोडृ ३५७ लोडृ उन्मादे । ३५८ अड उद्यमे । ३५९ लड विलासे ॥ लल इत्येके ॥ ३६० कड मदे ॥ कडि इत्येके ॥ ३६१ गडि वदनैकदेशे ॥ शौटादय उदात्ता उदा-त्तेतः परस्मैभाषाः ॥ ३६२ तिपृ ३६३ तेपृ ३६४ ष्टिपृ ३६५ ष्टेपृ क्षरणार्थाः ॥ तेपृ कम्पने च ॥ ३६६ ग्लेपृ दैन्ये । ३६७ टुवेपृ कम्पने । ३६८ केपृ ३६९ गेपृ ३७० ग्लेपृ च । ३७१ मेपृ ३७२ रेपृ ३७३ लेपृ गतौ ॥ ३७४ त्रपूष् लज्जायाम् । ३७५ कपि चलने । ३७६ रबि ३७७ लबि ३७८ अबि शब्दे । ३७९ लबि अवस्रंसने च । ३८० कबृ वर्णे । ३८१ क्लीबृ अधाष्टर्ये । ३८२ क्षीबृ मदे । ३८३ शीभृ कत्थने । ३८४ चीभृ च । ३८५ रेभृ शब्दे ॥ अभिरभी क्वचित्पठ्येते ॥ ३८६ ष्टभि ३८७ स्कभि प्रतिबन्धे । ३८८ जभि ३८९ जृभि गात्रविनामे । ३९० शल्भ कत्थने । ३९१ वल्भ भोजने । ३९२ गल्भ धाष्टर्ये । ३९३ श्रन्भु प्रमादे ॥ दन्त्यादिश्च ॥ ३९४ ष्टुभु स्तम्भे ॥ तिप्यादय उदात्ता अनुदात्तेत आत्मनेभाषाः । तिपिस्त्वनुदात्तः ॥ ३९५ गुपू रक्षणे । ३९६ धूप संतापे । ३९७ जप ३९८ जल्प व्यक्तायां वाचि । जप मानसे च । ३९९ चप सान्त्वने । ४०० षप समवाये । ४०१ रप ४०२ लप व्यक्तायां वाचि । ४०३ चुप मन्दायां गतौ । ४०४

तुप ४०५ तुन्प ४०६ त्रुप ४०७ त्रुन्प ४०८ तुफ ४०९ तुन्फ ४१० त्रुफ ४११ त्रुन्फ हिंसार्थाः । ४१२ पर्प ४१३ रफ ४१४ रफि ४१५ अर्ब ४१६ पर्ब ४१७ लर्ब ४१८ बर्ब ४१९ मर्ब ४२० कर्ब ४२१ खर्ब ४२२ गर्ब ४२३ शर्ब ४२४ षर्ब ४२५ चर्ब गतौ । ४२६ कुबि आच्छादने । ४२७ लुबि ४२८ तुबि अर्दने । ४२९ चुबि वक्त्रसंयोगे । ४३० षृभु ४३१ षृन्भु हिंसार्थौ । षिभु षिन्भु इत्येके ॥ ४३२ शुभ ४३३ शुन्भ भाषणे ॥ भासन इत्येके । हिंसायामित्यन्ये ॥ गुपादय उदात्ता उदात्तेतः परस्मैभाषाः ॥ ४३४ घिणि ४३५ घुणि ४३६ घृणि ग्रहणे । ४३७ घुण ४३८ घूर्ण भ्रमणे । ४३९ पण व्यवहारे स्तुतौ च । ४४० पन च । ४४१ भाम क्रोधे । ४४२ क्षमूष् सहने । ४४३ कमु कान्तौ ॥ घिण्यादय उदात्ता अनुदात्तेत आत्मनेभाषाः । ४४४ अण ४४५ रण ४४६ वण ४४७ भण ४४८ मण ४४९ कण ४५० क्वण ४५१ व्रण ४५२ भ्रण ४५३ ध्वण शब्दार्थाः ॥ धण इत्यपि केचित् ॥ ४५४ ओणृ अपनयने । ४५५ शोणृ वर्णगत्योः । ४५६ श्रोणृ संघाते । ४५७ श्लोणृ च । ४५८ पैणृ गतिप्रेरणश्लेषणेषु । ४५९ ध्रन शब्दे ॥ बण इत्यपि केचित् ॥ ४६० कनी दीप्तिकान्तिगतिषु । ४६१ ष्टन ४६२ वन शब्दे । ४६३ वन ४६४ षण संभक्तौ । ४६५ अम गत्यादिषु । ४६६ द्रम ४६७ हम्म ४६८ मीमृ गतौ । ४६९ चमु ४७० छमु ४७१ जमु ४७२ झमु अदने । ४७३ क्रमु पादविक्षेपे । अणादय उदात्ता उदात्तेतः परस्मैभाषाः ॥

४७४ अय ४७५ वय ४७६ पय ४७७ मय ४७८ चय ४७९ तय ४८० णय गतौ । ४८१ दय दानगतिरक्षणहिंसादानेषु । ४८२ रय गतौ । ४८३ ऊयी तन्तुसंताने । ४८४ पूयी विशरणे दुर्गन्धे च । ४८५ क्नूयी शब्दे उन्दे च । ४८६ क्ष्मायी विधूनने । ४८७ स्फायी ४८८ ओप्यायी वृद्धौ । ४८९ तायृ संतानपालनयोः । ४९० शल चलनसंवरणयोः । ४९१ वल ४९२ वल्ल संवरणे संचरणे च । ४९३ मल ४९४ मल्ल धारणे । ४९५ भल ४९६ भल्ल परिभाषणहिंसादानेषु । ४९७ कल शब्दसंख्यानयोः । ४९८ कल्ल अव्यक्ते शब्दे ॥ अशब्द इति स्वामी ॥ ४९९ तेवृ ५०० देवृ देवने । ५०१ षेवृ ५०२ गेवृ ५०३ ग्लेवृ ५०४ पेवृ ५०५ मेवृ ५०६ म्लेवृ सेवने ॥ शेवृ खेवृ क्लेवृ इत्येके ॥ ५०७ रेवृ प्लवगतौ ॥ अयादय उदात्ता अनुदात्तेत आत्मनेभाषाः ॥ ५०८ मव्य बन्धने । ५०९ सूर्क्ष्य ५१० ईर्क्ष्य ५११ ईर्ष्य ईर्ष्यार्थाः । ५१२ हय गतौ । ५१३ शुच्य अभिषवे ॥ चुच्य इत्येके । ५१४ हर्य गतिकान्त्योः । ५१५ अल भूषणपर्याप्तिवारणेषु ॥ अयं स्वरितेदित्येके ॥ ५१६ ञिफला विशरणे । ५१७ मील ५१८ श्मील ५१९ स्मील ५२० क्ष्मील निमेषणे । ५२१ पील प्रतिष्टम्भे । ५२२ नील वर्णे ।

५२३ शील समाधौ । ५२४ कील बन्धने । ५२५ कूल आवरणे । ५२६ शूल रुजायां संघोषे च । ५२७ तूल निष्कर्षे । ५२८ पूल संघाते । ५२९ मूल प्रतिष्ठायाम् । ५३० फल निष्पत्तौ ॥ ५३१ चुल्ल भावकरणे । ५३२ फुल्ल विकसने । ५३३ चिल्ल शैथिल्ये भावकरणे च । ५३४ तिल गतौ ॥ तिल्ल इत्येके ॥ ५३५ वेल्ल ५३६ चेल्ल ५३७ केल्ल ५३८ खेल्ल ५३९ क्ष्वेल्ल ५४० वेल्ल चलने । ५४१ पेल्ल ५४२ फेल्ल ५४३ शेल्ल गतौ ॥ षेल्ल इत्येके ॥ ५४४ स्खल संचलने । ५४५ खल संचये । ५४६ गल अदने । ५४७ षल गतौ । ५४८ दल विशरणे । ५४९ श्वल ५५० श्वल्ल आशुगमने । ५५१ खोल्ल ५५२ खोर्ऋ गतिप्रतिघाते । ५५३ धोर्ऋ गतिचातुर्ये । ५५४ त्सर छद्मगतौ । ५५५ क्मर हूर्च्छने । ५५६ अभ्र ५५७ वभ्र ५५८ मभ्र ५५९ चर गत्यर्थाः ॥ चरतिर्भक्षणेऽपि ॥ ५६० ष्ठिवु निरसने । ५६१ जि जये । ५६२ जीव प्राणधारणे । ५६३ पीव ५६४ मीव ५६५ तीव ५६६ णीव स्थौल्ये । ५६७ क्षीवु ५६८ क्षेवु निरसने । ५६९ उर्वी ५७० तुर्वी ५७१ थुर्वी ५७२ दुर्वी ५७३ धुर्वी हिंसार्थाः । ५७४ गुर्वी उद्यमने । ५७५ मुर्वी बन्धने । ५७६ पुर्व ५७७ पर्व ५७८ मर्व पूरणे । ५७९ चर्व अदने । ५८० भर्व हिंसायाम् । ५८१ कर्व ५८२ खर्व ५८३ गर्व दर्पे । ५८४ अर्व ५८५ शर्व ५८६ षर्व हिंसायाम् । ५८७ इवि व्याप्तौ । ५८८ पिवि ५८९ मिवि ५९० णिवि सेचने ॥ सेवन इत्येके ॥ ५९१ हिवि ५९२ दिवि ५९३ धिवि ५९४ जिवि प्रीणनार्थाः । ५९५ रिवि ५९६ रवि ५९७ धवि गत्यर्थाः । ५९८ कृवि हिंसाकरणयोश्च । ५९९ मव बन्धने । ६०० अव रक्षणगतिकान्तिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसादानभागवृद्धिषु ॥ मव्यादय उदात्ता उदात्तेतः परस्मैभाषाः । जिस्त्वनुदात्तः ॥ ६०१ धावु गतिशुद्ध्योः । उदात्तः स्वरितेदुभयतोभाषः ॥ ६०२ धुक्ष ६०३ धिक्ष संदीपनक्लेशनजीवनेषु । ६०४ वृक्ष वरणे । ६०५ शिक्ष विद्योपादाने । ६०६ भिक्ष भिक्षायामलाभे लाभे च । ६०७ क्लेश अव्यक्तायां वाचि ॥ बाधन इति दुर्गः ॥ ६०८ दक्ष वृद्धौ शीघ्रार्थे च । ६०९ दीक्ष मौण्ड्येज्योपनयननियमव्रतादेशेषु । ६१० ईक्ष दर्शने । ६११ ईष गतिहिंसादर्शनेषु । ६१२ भाष व्यक्तायां वाचि । ६१३ वर्ष स्नेहने । ६१४ गेषृ अन्विच्छायाम् ॥ ग्लेषृ इत्येके ॥ ६१५ पेषृ प्रयत्ने । ६१६ जेषृ ६१७ णेषृ ६१८ एषृ ६१९ प्रेषृ गतौ । ६२० रेषृ ६२१ हेषृ ६२२ ह्रेषृ अव्यक्ते शब्दे । ६२३ कासृ शब्दकुत्सायाम् । ६२४ भासृ दीप्तौ । ६२५ णासृ ६२६ रासृ शब्दे । ६२७ णस कौटिल्ये । ६२८ भ्यस भये । ६२९ आङः शसि इच्छायाम् । ६३० ग्रसु ६३१ ग्लसु अदने । ६३२ ईह चेष्टायाम् । ६३३ वहि

६३४ महि वृद्धौ । ६३५ अहि गतौ । ६३६ गर्ह ६३७ गल्ह कुत्सायाम् । ६३८ बर्ह ६३९ बल्ह प्राधान्ये । ६४० वर्ह ६४१ वल्ह परिभाषणहिंसाच्छादनेषु । ६४२ प्लिह गतौ । ६४३ वेहृ ६४४ जेहृ ६४५ बाहृ प्रयत्ने ॥ जेहृ गतावपि ॥ ६४६ द्राहृ निद्राक्षये ॥ निक्षेप इत्येके ॥ ६४७ काशृ दीप्तौ । ६४८ ऊह वितर्के । ६४९ गाहू विलोडने । ६५० गृहू ग्रहणे । ६५१ ग्लह च । ६५२ घुषि कान्तिकरणे ॥ घष इति केचित् ॥ धुक्षादय उदात्ता अनुदात्तेत आत्मनेभाषाः ॥ ६५३ घुषिर् अविशब्दने । ६५४ अक्षू व्याप्तौ । ६५५ तक्षू ६५६ त्वक्षू तनूकरणे । ६५७ उक्ष सेचने । ६५८ रक्ष पालने । ६५९ णिक्ष चुम्बने । ६६० तृक्ष ६६१ स्तृक्ष ६६२ णक्ष गतौ । ६६३ वक्ष रोषे ॥ संघात इत्येके । ६६४ मृक्ष संघाते । म्रक्ष इत्येके ॥ ६६५ तक्ष त्वचने । ६६६ सूर्क्ष आदरे । ६६७ काक्षि ६६८ वाक्षि ६६९ माक्षि काङ्क्षायाम् । ६७० द्राक्षि ६७१ ध्राक्षि ६७२ ध्वाक्षि घोरवासिते च । ६७३ चूष पाने । ६७४ तूष तुष्टौ । ६७५ पूष वृद्धौ । ६७६ मूष स्तेये । ६७७ लूष ६७८ रूष भूषायाम् । ६७९ शूष प्रसवे । ६८० यूष हिंसायाम् । ६८१ जूष च । ६८२ भूष अलंकारे । ६८३ ऊष रुजायाम् । ६८४ ईष उञ्छे । ६८५ कष ६८६ खष ६८७ शिष ६८८ जष ६८९ झष ६९० शष ६९१ वष ६९२ मष ६९३ रुष ६९४ रिष हिंसार्थाः । ६९५ भष भर्त्सने । ६९६ उष दाहे । ६९७ जिषु ६९८ विषु ६९९ मिषु सेचने । ७०० पुष पुष्टौ । ७०१ श्रिषु ७०२ श्लिषु ७०३ प्रुषु ७०४ प्लुषु दाहे । ७०५ पृषु ७०६ वृषु ७०७ मृषु सेचने ॥ मृषु सहने च । इतरौ हिंसासंक्लेशनयोश्च ॥ ७०८ घृषु संघर्षे । ७०९ हृषु अलीके । ७१० तुस ७११ ह्रस ७१२ ह्लस ७१३ रस शब्दे । ७१४ लस श्लेषणक्रीडनयोः ७१५ घस्लृ अदने । ७१६ जर्ज ७१७ चर्च ७१८ झर्झ परिभाषणहिंसातर्जनेषु । ७१९ पिसृ ७२० पेसृ गतौ । ७२१ हसे हसने । ७२२ णिश समाधौ । ७२३ मिश ७२४ मश शब्दे रोषकृते च । ७२५ शव गतौ । ७२६ शश प्लुतगतौ । ७२७ शसु हिंसायाम् । ७२८ शंसु स्तुतौ ॥ दुर्गतावित्येके । ७२९ चह परिकल्कने । ७३० मह पूजायाम् । ७३१ रह त्यागे । ७३२ रहि गतौ । ७३३ दृह ७३४ दृहि ७३५ बृह ७३६ बृहि वृद्धौ । बृहि शब्दे च । बृहिर् चेत्येके ॥ ७३७ तुहिर् ७३८ दुहिर् ७३९ उहिर् अर्दने । ७४० अर्ह पूजायाम् ॥ घुषिरादय उदात्ता उदात्तेतः परस्मैभाषाः । घसिस्त्वनुदात्तः । ७४१ द्युत दीप्तौ । ७४२ श्विता वर्णे । ७४३ ञिमिदा स्नेहने । ७४४ ञिष्विदा स्नेहनमोचनयोः ॥ मोहनयोरित्येके । ञिक्ष्विदा चेत्येके । ७४५ रुच दीप्तावभिप्रीतौ च । ७४६ घुट परिवर्तने ७४७ रुट ७४८ लुट ७४९ लुठ

प्रतिघाते । ७५० शुभ दीप्तौ । ७५१ क्षुभ संचलने । ७५२ णभ ७५३ तुभ हिंसायाम् । आद्योऽभावेऽपि । ७५४ स्रन्सु ७५५ ध्वन्सु ७५६ भ्रन्सु अवस्रंसने ॥ ध्वन्सु गतौ च । भ्रन्शु इत्यपि केचित् ॥ ७५७ स्रम्भु विश्वासे । ७५८ वृतु वर्तने । ७५९ वृधु वृद्धौ । ७६० शृधु शब्दकुत्सायाम् । ७६१ स्यन्दू प्रस्रवणे । ७६२ कृपू सामर्थ्ये ॥ द्युतादय उदात्ता अनुदात्तेत आत्मनेभाषाः ॥ वृत् ॥ ७६३ घट चेष्टायाम् । ७६४ व्यथ भयसंचलनयोः । ७६५ प्रथ प्रख्याने । ७६६ प्रस विस्तारे । ७६७ म्रद मर्दने । ७६८ स्खद स्खदने । ७६९ क्षजि गतिदानयोः । ७७० दक्ष गतिहिंसनयोः । ७७१ क्रप कृपायां गतौ च । ७७२ कदि ७७३ क्रदि ७७४ क्लदि वैक्लव्ये ॥ वैकल्य इत्येके । त्रयोऽप्यनिदित इति नन्दी । इदित इति स्वामी । कदि क्रदि इदितौ क्रद क्लद इति चानिदितौ इति मैत्रेयः ॥ ७७५ ञित्वरा संभ्रमे ॥ घटादयः षितः । उदात्ता अनुदात्तेत आत्मनेभाषाः ॥ ७७६ ज्वर रोगे । ७७७ गड सेचने । ७७८ हेड वेष्टने । ७७९ वट ७८० भट परिभाषणे । ७८१ णट नृत्तौ ॥ गतावित्यन्ये ॥ ७८२ ष्टक प्रतिघाते । ७८३ चक तृप्तौ । ७८४ कखे हसने । ७८५ रगे शङ्कायाम् । ७८६ लगे सङ्गे । ७८७ ह्रगे ७८८ ह्लगे ७८९ षगे ७९० ष्ठगे संवरणे । ७९१ कगे नोच्यते । ७९२ अक ७९३ अग कुटिलायां गतौ । ७९४ कण ७९५ रण गतौ । ७९६ चण ७९७ शण ७९८ श्रण दाने च ॥ शण गतावित्यन्ये ॥ ७९९ श्रथ ८०० श्लथ ८०१ क्नथ ८०२ क्लथ हिंसार्थाः । ८०३ वन च । वनु च नोच्यते । ८०४ ज्वल दीप्तौ । ८०५ ह्वल ८०६ ह्मल चलने । ८०७ स्मृ आध्याने । ८०८ दॄ भये । ८०९ नॄ नये । ८१० श्रा पाके । मारणतोषणनिशामनेषु ८११ ज्ञा । कम्पने ८१२ चलिः । ८१३ छदिर् ऊर्जने । जिह्वोन्मथने ८१४ लडिः । ८१५ मदी हर्षग्लेपनयोः । ८१६ ध्वन शब्दे । दलि-वलि-स्खलि-रणि-ध्वनि-त्रपि-क्षपयश्चेति भोजः । ८१७ स्वन अवतंसने ॥ घटादयो मितः ॥ जनी-जॄष्-क्नसु-रञ्जो-ऽमन्ताश्च । ज्वल-ह्वल-ह्मल-नमामनुपसर्गाद्वा । ग्ला-स्ना-वनु-वमां च । न कमि-अमि-चमाम् । ८१८ शमो दर्शने । ८१९ यमोऽपरिवेषणे । ८२० स्खदिर् अवपरिभ्यां च । ८२१ फण गतौ ॥ घटादयः फणान्ता मितः । वृत् । ज्वरादय उदात्ता उदात्तेतः परस्मैभाषाः ॥ ८२२ राजृ दीप्तौ ॥ उदात्तः स्वरितेदुभयतोभाषः ॥ ८२३ टुभ्राजृ ८२४ टुभ्राशृ ८२५ टुभ्लाशृ दीप्तौ ॥ उदात्ता अनुदात्तेत आत्मनेभाषाः ॥ ८२६ स्यमु ८२७ स्वन ८२८ ध्वन शब्दे । ८२९ षम ८३० ष्टम अवैक्लव्ये ॥ वृत् ॥ ८३१ ज्वल दीप्तौ । ८३२ चल कम्पने । ८३३ जल घातने । ८३४ टल ८३५ ट्वल वैक्लव्ये । ८३६ स्थल स्थाने । ८३७ हल विलेखने ।

८३८ णल गन्धे ॥ बन्धन इत्येके ॥ ८३९ पल गतौ । ८४० बल प्राणने धान्यावरोधने च । ८४१ पुल महत्त्वे । ८४२ कुल संस्त्याने बन्धुषु च । ८४३ शल ८४४ हुल ८४५ पत्लृ गतौ । ८४६ क्वथे निष्पाके । ८४७ पथे गतौ । ८४८ मथे विलोडने । ८४९ टुवम् उद्गिरणे । ८५० भ्रमु चलने । ८५१ क्षर संचलने ॥ ज्वलादय उदात्ता उदात्तेतः परस्मैभाषाः॥ ८५२ षह मर्षणे ॥ उदात्तोऽनुदात्तेदात्मनेभाषः ॥ ८५३ रमु क्रीडायाम्। अनुदात्तः उदात्तेदात्मनेभाषः ॥ ८५४ षद्लृ विशरणगत्यवसादनेषु । ८५५ शद्लृ शातने । ८५६ क्रुश आह्वाने रोदने च ॥ षदादयस्त्रयोऽनुदात्ता उदात्तेतः परस्मैभाषाः॥ ८५७ कुच संपर्चनकौटिल्यप्रतिष्टम्भविलेखनेषु । ८५८ बुध अवगमने । ८५९ रुह बीजजन्मनि प्रादुर्भावे च । ८६० कस गतौ ॥ वृत् ॥ कुचादय उदात्ता उदात्तेतः परस्मैभाषाः । रुहिस्त्वनुदात्तः ॥ ८६१ हिक्क अव्यक्ते शब्दे । ८६२ अन्चु गतौ याचने च ॥ अचु इत्येके । अचि इत्यपरे ॥ ८६३ टुयाचृ याच्ञायाम् । ८६४ रेटृ परिभाषणे । ८६५ चते ८६६ चदे याचने । ८६७ प्रोथृ पर्याप्तौ । ८६८ मिदृ ८६९ मेदृ मेधाहिंसनयोः ॥ थान्ताविमाविति स्वामी । धान्ताविति न्यासः ॥ ८७० मेधृ संगमे च । ८७१ णिदृ ८७२ णेदृ कुत्सासंनिकर्षयोः । ८७३ शृधु ८७४ मृधु उन्दने । ८७५ बुधिर् बोधने । ८७६ उबुन्दिर् निशामने । ८७७ वेणृ गतिज्ञानचिन्तानिशामनवादित्रग्रहणेषु ॥ नान्तोऽप्ययम् ॥ ८७८ खनु अवदारणे । ८७९ चीवृ आदानसंवरणयोः । ८८० चायृ पूजानिशामनयोः । ८८१ व्यय गतौ । ८८२ दाशृ दाने । ८८३ भेषृ भये ॥ गतावित्येके ॥ ८८४ भ्रेषृ ८८५ भ्लेषृ गतौ । ८८६ अस गतिदीप्त्यादानेषु ॥ अष इत्येके ॥ ८८७ स्पश बाधनस्पर्शनयोः । ८८८ लष कान्तौ । ८८९ चष भक्षणे । ८९० छष हिंसायाम् । ८९१ झष आदानसंवरणयोः । ८९२ भ्रक्ष ८९३ भ्लक्ष अदने । ८९४ दासृ दाने । ८९५ माहृ माने । ८९६ गुहू संवरणे ॥ हिक्कादय उदात्ताः स्वरितेत उभयतोभाषाः ॥ ८९७श्रिञ् सेवायाम्॥ उदात्त उभयतोभाषः॥ ८९८ भृञ् भरणे । ८९९ हृञ् हरणे । ९०० धृञ् धारणे । ९०१ णीञ् प्रापणे ॥ भृञादयश्चत्वारोऽनुदात्ता उभयतोभाषाः ॥ ९०२ धेट् पाने । ९०३ ग्लै ९०४ म्लै हर्षक्षये । ९०५ द्यै न्यक्करणे । ९०६ द्रै स्वप्ने । ९०७ ध्रै तृप्तौ । ९०८ ध्यै चिन्तायाम् । ९०९ रै शब्दे । ९१० स्त्यै ९११ ष्ट्यै शब्दसंघातयोः । ९१२ खै खदने । ९१३ क्षै ९१४ जै ९१५ षै क्षये । ९१६ कै ९१७ गै शब्दे । ९१८ शै ९१९ श्रै पाके । ९२० पै ९२१ ओवै शोषणे । ९२२ ष्टै वेष्टने । ९२३ ष्णै वेष्टने ॥ शोभायां चेत्येके ॥ ९२४ दैप् शोधने । ९२५ पा पाने । ९२६ घ्रा गन्धोपादाने । ९२७ ध्मा शब्दाग्निसंयोगयोः । ९२८ ष्ठा गतिनिवृत्तौ ।

९२९ म्ना अभ्यासे । ९३० दाण् दाने । ९३१ ह्वृ कौटिल्ये । ९३२ स्वृ शब्दोपतापयोः । ९३३ स्मृ चिन्तायाम् । ९३४ ह्वृ संवरणे । ९३५ सृ गतौ । ९३६ ऋ गतिप्रापणयोः । ९३७ गृ ९३८ घृ सेचने। ९३९ ध्वृ हूर्च्छने । ९४० स्रु गतौ । ९४१ षु प्रसवैश्वर्ययोः । ९४२ श्रु श्रवणे । ९४३ ध्रु स्थैर्ये । ९४४ दु ९४५ द्रु गतौ । ९४६ जि ९४७ ज्रि अभिभवे ॥ घयत्यादयोऽनुदात्ताः परस्मैभाषाः ॥ ९४८ ष्मिङ् ईषद्धसने । ९४९ गुङ् अव्यक्ते शब्दे । ९५० गाङ् गतौ । ९५१ कुङ् ९५२ घुङ् ९५३ उङ् ९५४ ङुङ् शब्दे ॥ उङ् कुङ् खुङ् गुङ् घुङ् ङुङ् इत्यन्ये ॥ ९५५ च्युङ् ९५६ ज्युङ् ९५७ प्रुङ् ९५८ प्लुङ् गतौ ॥ क्लुङ् इत्येके ॥ ९५९ रुङ् गतिरेषणयोः । ९६० धृङ् अवध्वंसने । ९६१ मेङ् प्रणिदाने । ९६२ देङ् रक्षणे । ९६३ श्यैङ् गतौ । ९६४ प्यैङ् वृद्धौ । ९६५ त्रैङ् पालने ॥ ष्मिङादयोऽनुदात्ता आत्मनेभाषाः ॥ ९६६ पूङ् पवने । ९६७ मूङ् बन्धने । ९६८ डीङ् विहायसा गतौ ॥ पूङादयस्त्रय उदात्ता आत्मनेभाषाः ॥ ९६९ तॄ प्लवनतरणयोः ॥ उदात्तः परस्मैभाषः ॥ ९७० गुप गोपने । ९७१ तिज निशाने । ९७२ मान पूजायाम् । ९७३ बध बन्धने ॥ गुपादयश्चत्वार उदात्ता अनुदात्तेत आत्मनेभाषाः ॥ ९७४ रभ राभस्ये । ९७५ डुलभष् प्राप्तौ । ९७६ ष्वन्ज परिष्वङ्गे । ९७७ हद पुरीषोत्सर्गे ॥ रभादयश्चत्वार उदात्ता अनुदात्तेत आत्मनेभाषाः ॥ ९७८ ञिष्विदा अव्यक्ते शब्दे । उदात्त उदात्तेत् परस्मैभाषः ॥ ९७९ स्कन्दिर् गतिशोषणयोः । ९८० यभ मैथुने ९८१ णम प्रह्वत्वे शब्दे च । ९८२ गम्लृ ९८३ सृप्लृ गतौ । ९८४ यम उपरमे । ९८५ तप संतापे । ९८६ त्यज हानौ । ९८७ षन्ज सङ्गे । ९८८ दृशिर् प्रेक्षणे । ९८९ दन्श दशने । ९९० कृष विलेखने। ९९१ दह भस्मीकरणे। ९९२ मिह सेचने॥ स्कन्दादयोऽनुदात्ता उदात्तेतः परस्मैभाषाः ॥ ९९३ कित निवासे रोगापनयने च ॥ उदात्तेत् परस्मैभाषः ॥ ९९४ दान खण्डने। ९९५ शान तेजने ॥ उदात्तौ स्वरितेतावुभयतोभाषौ ॥ ९९६ डुपचष् पाके । ९९७ षच समवाये। ९९८ भज सेवायाम्। ९९९ रन्ज रागे । १००० शप आक्रोशे । १००१ त्विष दीप्तौ । १००२ यज देवपूजासंगतिकरणदानेषु । १००३ डुवप् बीजसंताने । छेदनेऽपि । १००४ वह प्रापणे ॥ पचादयोऽनुदात्ताः स्वरितेत उभयतोभाषाः । षचिरनुदात्तः ॥ १००५ वस निवासे ॥ अनुदात्त उदात्तेत् परस्मैभाषः ॥ १००६ वेञ् तन्तुसंताने । १००७ व्येञ् संवरणे । १००८ ह्वेञ् स्पर्धायां शब्दे च ॥ वेञादयस्त्रयोऽनुदात्ता उभयतोभाषाः ॥ १००९ वद व्यक्तायां वाचि । १०१० टुओश्वि गतिवृद्धयोः ॥ वृत् । अयं वदतिश्चोदात्तौ परस्मैभाषौ ॥ इति शब्विकरणा भ्वादयः॥१॥

१०११ अद भक्षणे । १०१२ हन हिंसागत्योः ॥ अनुदात्तावुदात्तेतौ परस्मैपदिनौ ॥ १०१३ द्विष अप्रीतौ । १०१४ दुह प्रपूरणे । १०१५ दिह उपचये । १०१६ लिह आस्वादने ॥ द्विषादयोऽनुदात्ताः स्वरितेत उभयतोभाषाः॥ १०१७ चक्षिङ् व्यक्तायां वाचि । दर्शनेऽपि ॥ अनुदात्तोऽनुदात्तेदात्मनेपदी ॥ १०१८ ईर गतौ कम्पने च । १०१९ ईड स्तुतौ । १०२० ईश ऐश्वर्ये । १०२१ आस उपवेशने । १०२२ आङ्शासु इच्छायाम् । १०२३वस आच्छादने । १०२४ कसि गतिशासनयोः ॥ कस इत्येके । कश इत्यपि ॥ १०२५ णिसि चुम्बने । १०२६ णिजि शुद्धौ । १०२७ शिजि अव्यक्ते शब्दे । १०२८ पिजि वर्णे ॥ संपर्चन इत्येके । उभयत्रेत्यन्ये । अवयव इत्येके । अव्यक्ते शब्द इतीतरे । पृजि इत्येके ॥ १०२९ वृजी वर्जने ॥ वृजि इत्यन्ये ॥ १०३० पृची संपर्चने ॥ ईरादय उदात्ता अनुदात्तेत आत्मनेभाषाः ॥ १०३१ षूङ् प्राणिगर्भविमोचने । १०३२ शीङ् स्वप्ने ॥ उदात्तावात्मनेभाषौ । १०३३ यु मिश्रणेऽमिश्रणे च । १०३४ रु शब्दे । १०३५ णु स्तुतौ । १०३६ टुक्षु शब्दे । १०३७ क्ष्णु तेजने । १०३८ ष्णु प्रस्रवणे ॥ युप्रभृतय उदात्ता उदात्तेतः परस्मैभाषाः ॥ १०३९ उर्णुञ् आच्छादने ॥उदात्त उभयतोभाषः ॥ १०४० द्यु अभिगमने । १०४१ षु प्रसवैश्वर्ययोः । १०४२ कु शब्दे । १०४३ ष्टुञ् स्तुतौ ॥ द्युप्रभृतयोऽनुदात्ताः परस्मैभाषाः। स्तौतिस्तूभयतोभाषः ॥ १०४४ ब्रूञ् व्यक्तायां वाचि ॥ उदात्त उभयतोभाषः ॥ १०४५ इण् गतौ । १०४६ इङ् अध्ययने । १०४७ इक् स्मरणे । १०४८ वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु । १०४९ या प्रापणे । १०५० वा गतिगन्धनयोः । १०५१ भा दीप्तौ । १०५२ ष्णा शौचे । १०५३ श्रा पाके । १०५४ द्रा कुत्सायां गतौ । १०५५ प्सा भक्षणे । १०५६ पा रक्षणे । १०५७ रा दाने । १०५८ ला आदाने ॥ द्वावपि दान इति चन्द्रः ॥ १०५९ दाप् लवने । १०६० ख्या प्रकथने । १०६१ प्रा पूरणे । १०६२ मा माने । १०६३ वच परिभाषणे ॥ इण्प्रभृतयोऽनुदात्ताः परस्मैभाषाः। इङ् त्वात्मनेपदी ॥ १०६४ विद ज्ञाने । १०६५ अस भुवि । १०६६ मृजू शुद्धौ । १०६७ रुदिर् अश्रुविमोचने ॥ विदादय उदात्ता उदात्तेतः परस्मैभाषाः ॥ १०६८ ञिष्वप् शये ॥ उदात्तः परस्मैभाषः । १०६९ श्वस प्राणने । १०७० अन च । १०७१ जक्ष भक्षहसनयोः ॥ वृत् ॥ १०७२ जागृ निद्राक्षये । १०७३ दरिद्रा दुर्गतौ । १०७४ चकासृ दीप्तौ । १०७५ शासु अनुशिष्टौ । श्वसादय उदात्ता उदात्तेतः परस्मैभाषाः ॥ १०७६ दिधीङ् दीप्तिदेवनयोः । १०७७ वेवीङ् वेतिना तुल्ये ॥ उदात्तावात्मनेभाषौ ॥ १०७८ षस १०७९ सस्ति स्वप्ने । १०८० वश कान्तौ ॥ षसादय उदात्ता उदात्तेतः परस्मैभाषाः ॥ १०८१ चर्करीतं च । १०८२

डुङ् अपनयने ॥ अनुदात्ता आत्मनेभाषाः ॥ इति लुग्विकरणा अदादयः ॥ २ ॥

१०८३ हु दानादानयोः ॥ आदाने चेत्येके ॥ १०८४ ञिभी भये । १०८५ ह्री लज्जायाम् ॥ जुहोत्यादयोऽनुदात्ताः परस्मैभाषाः ॥ १०८६ पृ पालनपूरणयोः ॥ पॄ इत्येके ॥ उदात्तः परस्मैभाषः ॥ १०८७ डुभृञ् धारणपोषणयोः ॥ अनुदात्त उभयतोभाषः ॥ १०८८ माङ् माने शब्दे च । १०८९ ओहाङ् गतौ ॥ अनुदात्तावात्मनेपदिनौ ॥ १०९० ओहाक् त्यागे ॥ अनुदात्तः परस्मैपदी ॥ १०९१ डुदाञ् दाने ॥ १०९२ डुधाञ् धारणपोषणयोः ॥ दान इत्यप्येके ॥ अनुदात्तावुभयतोभाषौ ॥ १०९३ णिजिर् शौचपोषणयोः । १०९४ विजिर् पृथग्भावे । १०९५ विष्लृ व्याप्तौ ॥ णिजिरादयोऽनुदात्ताः स्वरितेत उभयतोभाषाः ॥ १०९६ घृ क्षरणदीप्त्योः । १०९७ हृ प्रसह्यकरणे । १०९८ ऋ १०९९ सृ गतौ ॥ घृप्रभृतयोऽनुदात्ताः परस्मैभाषाः ॥ ११०० भस भर्त्सनदीप्त्योः ॥ उदात्त उदात्तेत् परस्मैपदी ॥ ११०१ कि ज्ञाने ॥ अनुदात्तः परस्मैपदी ॥ ११०२ तुर त्वरणे । ११०३ धिष शब्दे । ११०४ धन धान्ये । ११०५ जन जनने ॥ तुरादय उदात्ता उदात्तेतः परस्मैभाषाः ॥ ११०६ गा स्तुतौ ॥ अनुदात्तः परस्मैभाषः । घृप्रभृतय एकादश च्छन्दसि । इयर्ति भाषायामपि ॥ इति श्लुविकरणा जुहोत्यादयः ॥ ३ ॥

११०७ दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु । ११०८ षिवु तन्तुसंताने । ११०९ स्रिवु गतिशोषणयोः । १११० ष्ठिवु निरसने । ११११ ष्णुसु अदने ॥ आदान इत्येके । अदर्शन इत्यपरे ॥ १११२ ष्णसु निरसने । १११३ क्नसु ह्वरणदीप्त्योः । १११४ व्युष दाहे । १११५ प्लुष च । १११६ नृती गात्रविक्षेपे । १११७ त्रसी उद्वेगे । १११८ कुथ पूतीभावे । १११९ पुथ हिंसायाम् । ११२० गुध परिवेष्टने । ११२१ क्षिप प्रेरणे ११२२ पुष्प विकसने । ११२३ तिम ११२४ ष्टिम ११२५ ष्टीम आर्द्रीभावे । ११२६ व्रीड चोदने लज्जायां च । ११२७ इष गतौ । ११२८ षह ११२९ षुह चक्यर्थे । ११३० जॄष् ११३१ झॄष् वयोहानौ ॥ दिवादय उदात्ता उदात्तेतः परस्मैभाषाः । क्षिपिस्त्वनुदात्तः ॥ ११३२ षूङ् प्राणिप्रसवे। ११३३ दूङ् परितापे ॥ उदात्तावात्मनेभाषौ ॥ ११३४ दीङ् क्षये । १२३५ डीङ् विहायसा गतौ । ११३६ धीङ् आधारे । ११३७ मीङ् हिंसायाम् । ११३८ रीङ् श्रवणे । ११३९ लीङ् श्लेषणे । ११४० व्रीङ् वृणोत्यर्थे ॥ वृत् । स्वादय ओदितः ॥ ११४१ पीङ् पाने । ११४२ माङ् माने । ११४३ ईङ् गतौ । ११४४ प्रीङ् प्रीतौ ॥ दीङादय आत्मनेपदिनोऽनुदात्ताः । डीङ् तूदात्तः ॥ ११४५ शो तनूकरणे । ११४६ छो छेदने । ११४७ षो अन्तकर्मणि । ११४८ दो अव-

खण्डने ॥ श्यतिप्रभृतयोऽनुदात्ताः परस्मैभाषाः ॥ ११४९ जनी प्रादुर्भावे । ११५० दीपी दीप्तौ । ११५१ पूरी आप्यायने । ११५२ तूरी गतित्वरणहिंसनयोः । ११५३ धूरी ११५४ गूरी हिंसागत्योः । ११५५ घूरी ११५६ जूरी हिंसावयोहान्योः । ११५७ शूरी हिंसास्तम्भनयोः । ११५८ चूरी दाहे । ११५९ तप ऐश्वर्ये वा । ११६० वृतु वरणे । ११६१ क्लिश उपतापे । ११६२ काशृ दीप्तौ । ११६३ वाशृ शब्दे ॥ जन्यादय उदात्ता अनुदात्तेत आत्मनेभाषाः । तपिस्त्वनुदात्तः ॥ ११६४ मृष तितिक्षायाम् । ११६६ शुचिर् पूतीभावे । उदात्तौ स्वरितेतावुभयतोभाषौ ॥ ११६७ णह बन्धने । ११६८ रन्ज रागे । ११६९ शप आक्रोशे ॥ णहादयस्त्रयोऽनुदात्ताः स्वरितेत उभयतोभाषाः ॥ ११७० पद गतौ । ११७१ खिद दैन्ये । ११७२ विद सत्तायाम् । ११७३ बुध अवगमने । ११७४ युध संप्रहारे । ११७५ अनोरुध कामे । ११७६ अण प्राणने ॥ अन इत्येके ॥ ११७७ मन ज्ञाने । ११७८ युज समाधौ । ११७९ सृज विसर्गे । ११८० लिश अल्पीभावे ॥ पदादयोऽनुदात्ता अनुदात्तेत आत्मनेभाषाः ॥ ११८१ राधोऽकर्मकाद्वृद्धावेव । ११८२ व्यध ताडने । ११८३ पुष पुष्टौ । ११८४ शुष शोषणे । ११८५ तुष प्रीतौ । ११८६ दुष वैकृत्ये । ११८७ श्लिष आलिङ्गने । ११८८ शक विभाषितो मर्षणे । ११८९ ष्विदा गात्रप्रक्षरणे ॥ ११९० क्रुध क्रोधे । ११९१ क्षुध बुभुक्षायाम् । ११९२ शुध शौचे । ११९३ षिधु संराद्धौ । राधादयोऽनुदात्ता उदात्तेतः परस्मैभाषाः ॥ ११९४ रध हिंसासंराध्योः । ११९५ णश अदर्शने । ११९६ तृप प्रीणने । ११९७ दृप हर्षमोहनयोः । ११९८ द्रुह जिघांसायाम् । ११९९ मुह वैचित्त्ये । १२०० ष्णुह उद्गिरणे । १२०१ ष्णिह प्रीतौ ॥ वृत् । रधादय उदात्ता उदात्तेतः परस्मैभाषाः ॥ १२०२ शमु उपशमे । १२०३ तमु काङ्क्षायाम् । १२०४ दमु उपशमे । १२०५ श्रमु तपसि खेदे च । १२०६ भ्रमु अनवस्थाने । १२०७ क्षमू सहने । १२०८ क्लमु ग्लानौ । १२०९ मदी हर्षे ॥ वृत् ॥ १२१० असु क्षेपणे । १२११ यसु प्रयत्ने । १२१२ जसु मोक्षणे । १२१३ तसु उपक्षये । १२१४ दसु च । १२१५ वसु स्तम्भे । १२१६ व्युष विभागे ॥ व्युस इत्यन्ये । युस इत्यपरे ॥ १२१७ प्लुष दाहे । १२१८ विस प्रेरणे । १२१९ कुस संश्लेषणे । १२२० बुस उत्सर्गे । । १२२१ मुस खण्डने । १२२२ मसी परिणामे ॥ समी इत्येके ॥ १२२३ लुठ विलोडने । १२२४ उच समवाये । १२२५ भृशु १२२६ भ्रन्शु अधःपतने । १२२७ वृश वरणे । १२२८ कृश तनूकरणे । १२२९ ञितृष पिपासायाम् । १२३० हृष तुष्टौ । १२३१ रुष १२३२ रिष हिंसायाम् । १२३३ डिप क्षेपे ।

१२३४ कुप क्रोधे । १२३५ गुप व्याकुलत्वे । १२३६ युपु १२३७ रुपु १२३८ लुपु विमोहने । १२३९ लुभ गार्ध्ये । १२४० क्षुभ संचलने । १२४१ णभ १२४२ तुभ हिंसायाम् ॥ क्षुभिनभितुभयो द्युतादौ क्र्यादौ च पठ्यन्ते ॥ १२४३ क्लिद आर्द्रीभावे । १२४४ ञिमिदा स्नेहने । १२४५ ञिक्ष्विदा स्नेहनमोचनयोः । १२४६ ऋधु वृद्धौ । १२४७ गृधु अभिकाङ्क्षायाम् ॥ वृत् । असुप्रभृतय उदात्ता उदात्तेतः परस्मैभाषाः । इति श्यन्विकरणा दिवादयः ॥ ४ ॥

१२४८ षुञ् अभिषवे । १२४९ षिञ् बन्धने । १२५० शिञ् निशाने । १२५१ डुमिञ् प्रक्षेपणे । १२५२ चिञ् चयने । १२५३ स्तृञ् आच्छादने । १२५४ कृञ् हिंसायाम् । १२५५ वृञ् वरणे । १२५६ धुञ् कम्पने । धूञ् इत्येके ॥ स्वादयोऽनुदात्ता उभयतोभाषाः । वृञ् उदात्तः ॥ १२५७ टुदु उपतापे । १२५८ हि गतौ वृद्धौ च । १२५९ पृ प्रीतौ । १२६० स्पृ प्रीतिपालनयोः ॥ प्रीतिचलनयोः इत्यन्ये । स्मृ इत्येके ॥ १२६१ आप्लृ व्याप्तौ । १२६२ शक्लृ शक्तौ । १२६३ राध १२६४ साध संसिद्धौ । दुनोतिप्रभृतयोऽनुदात्ताः परस्मैभाषाः ॥ १२६५ अशू व्याप्तौ संघाते च । १२६६ ष्टिघ आस्कन्दने ॥ आशिस्तिघी उदात्तावनुदात्तेतावात्मनेभाषौ ॥ १२६७ तिक १२६८ तिग गतौ च । १२६९ षघ हिंसायाम् । १२७० ञिधृषा प्रागल्भ्ये । १२७१ दन्भु दम्भने । १२७२ ऋधु वृद्धौ । तृप प्रीणने इत्येके ॥ छन्दसि ॥ १२७३ अह व्याप्तौ । १२७४ दघ घातने पालने च । १२७५ चमु भक्षणे । १२७६ रि १२७७ क्षि १२७८ चिरि १२७९ जिरि १२८० दाश १२८१ दृ हिंसायाम् ॥ क्षिर भाषायाम् इत्येके । ऋक्षीत्यजादिरेके । रेफवानित्यन्ये ॥ वृत् । तिकादय उदात्ता उदात्तेतः परस्मैभाषाः॥ इति श्नुविकरणाः स्वादयः ॥५॥

१२८२ तुद व्यथने । १२८३ णुद प्रेरणे । १२८४ दिश अतिसर्जने । १२८५ भ्रस्ज पाके । १२८६ क्षिप प्रेरणे । १२८७ कृष विलेखने ॥ तुदादयोऽनुदात्ताः स्वरितेत उभयतोभाषाः ॥ १२८८ ऋषी गतौ ॥ उदात्त उदात्तेत्परस्मैपदी ॥ १२८९ जुषी प्रीतिसेवनयोः । १२९० ओविजी भयचलनयोः । १२९१ ओलजी १२९२ ओलस्जी व्रीडने ॥ जुषादय उदात्ता अनुदात्तेत आत्मनेभाषाः ॥ ११९३ ओव्रश्चू छेदने । १२९४ व्यच व्याजीकरणे । १२९५ उछि उञ्छे । १२९६ उछी विवासे । १२९७ ऋछ गतीन्द्रियप्रलयमूर्तिभावेषु । १२९८ मिछ उत्क्लेशे । १२९९ जर्ज १३०० चर्च १३०१ झर्झ परिभाषणभर्त्सनयोः । १३०२ त्वच संवरणे । १३०३ ऋच स्तुतौ । १३०४ उब्ज आर्जवे । १३०५ उज्झ उत्सर्गे । १३०६ लुभ विमोहने । १३०७ रिफ कत्थनयुद्धनिंदाहिंसादानेषु ॥

रिह इत्येके ॥ १३०८ तृप १३०९ तृन्फ तृप्तौ ॥ द्वावपि फान्तावित्येके ॥ १३१० तुप १३११ तुन्प १३१२ तुफ १३१३ तुन्फ हिंसायाम् । १३१४ दृप १३१५ दृन्फ उत्क्लेशे ॥ प्रथमोऽपि द्वितीयान्त इत्येके ॥ १३१६ ऋफ १३१७ ऋन्फ हिंसायाम् । १३१८ गुफ १३१९ गुन्फ ग्रन्थे । १३२० उभ १३२१ उन्भ पूरणे । १३२२ शुभ १३२३ शुन्भ शोभार्थे । १३२४ दृभी ग्रन्थे । १३२५ चृती हिंसाग्रन्थनयोः । १३२६ विध विधाने । १३२७ जुड गतौ ॥ जुन इत्येके ॥ १३२८ मृड सुखने । १३२९ पृड च । १३३० पृण प्रीणने । १३३१ वृण च । १३३२ मृण हिंसायाम् । १३३३ तुण कौटिल्ये । १३३४ पुण कर्मणि शुभे । १३३५ मुण प्रतिज्ञाने ॥ १३३६ कुण शब्दोपकरणयोः । १३३७ शुन गतौ । १३३८ द्रुण हिंसागतिकौटिल्येषु । १३३९ घुण १३४० घूर्ण भ्रमणे । १३४१ षुर ऐश्वर्यदीप्त्योः । १३४२ कुर शब्दे । १३४३ खुर छेदने । १३४४ मुर संवेष्टने । १३४५ क्षुर विलेखने । १३४६ घुर भीमार्थशब्दयोः । १३४७ पुर अग्रगमने । १३४८ वृहू उद्यमने ॥ बृहू इत्यन्ये ॥ १३४९ तृहू १३५० स्तृहू १३५१ तृन्हू हिंसार्थाः । १३५२ इष इच्छायाम् । १३५३ मिष स्पर्धायाम् । १३५४ किल श्वैत्यक्रीडनयोः । १३५५ तिल स्नेहे । १३५६ चिल वसने । १३५७ चल विलसने । १३५८ इल स्वप्नक्षेपणयोः । १३५९ विल संवरणे । १३६० बिल भेदने । १३६१ णिल गहने । १३६२ हिल भावकरणे १३६३ शिल १३६४ षिल उञ्छे । १३६५ मिल श्लेषणे । १३६६ लिख अक्षरविन्यासे । १३६७ कुट कौटिल्ये । १३६८ पुट संश्लेषणे । १३६९ कुच संकोचने । १३७० गुज शब्दे । १३७१ गुड रक्षायाम् । १३७२ डिप क्षेपे । १३७३ छुर छेदने । १३७४ स्फुट विकसने । १३७५ मुट आक्षेपमर्दनयोः । १३७६ त्रुट छेदने । १३७७ तुट कलहकर्मणि । १३७८ चुट १३७९ छुट छेदने । १३८० जुट बन्धने । १३८१ कड मदे । १३८२ लुट संश्लेषणे १३८३ कृड घनत्वे । १३८४ कुड बाल्ये । १३८५ पुड उत्सर्गे । १३८६ घुट प्रतिघाते । १३८७ तुड तोडने । १३८८ थुड १३८९ स्थुड संवरणे ॥ खुड छुड इत्येके ॥ १३९० स्फुर १३९१ फुल संचलने ॥ स्फुर स्फुरणे स्फुल संचलने इत्येके । स्फर इत्यन्ये ॥ १३९२ स्फुड १३९३ चुड १३९४ व्रुड संवरणे ॥ १३९५ क्रुड १३९६ मृड निमज्जन इत्येके ॥ व्रश्चादय उदात्ता उदात्तेतः परस्मैभाषाः ॥ १३९७ गुरी उद्यमने ॥ उदात्तोऽनुदात्तेदात्मनेपदी ॥ १३९८ णू स्तवने । १३९९ धू विधूनने ॥ उदात्तौ परस्मैभाषौ ॥ १४०० गु पुरीषोत्सर्गे । १४०१ ध्रु गतिस्थैर्ययोः ॥ ध्रुव इत्येके ॥ अनुदात्तौ परस्मैपदिनौ ॥ १४०२ कुङ् शब्दे ॥ उदात्त आत्मनेपदी ॥ दीर्घान्त इति

कैयटादयः । ह्रस्वान्त इति न्यासः ॥ वृत् ॥ १४०३ पृङ् व्यायामे । १४०४ मृङ् प्राणत्यागे ॥ अनुदात्तावात्मनेभाषौ ॥ १४०५ रि १४०६ पि गतौ । १४०७ धि धारणे । १४०८ क्षि निवासगत्योः ॥ रियत्यादयोऽनुदात्ताः परस्मैभाषाः ॥ १४०९ षू प्रेरणे । १४१० कॄ विक्षेपे । १४११ गॄ निगरणे । उदात्ताः परस्मैभाषाः॥ १४१२ दृङ् आदरे । १४१३ धृङ् अवस्थाने ॥ अनुदात्तावात्मनेभाषौ ॥ १४१४ प्रच्छ ज्ञीप्सायाम् ॥ वृत् ॥ १४१५ सृज विसर्गे । १४१६ टुमस्जो शुद्धौ । १४१७ रुजो भङ्गे । १४१८ भुजो कौटिल्ये । १४१९ छुप स्पर्शे । १४२० रुश १४२१ रिश हिंसायाम् । १४२२ लिश गतौ । १४२३ स्पृश संस्पर्शने । १४२४ विच्छ गतौ । १४२५ विश प्रवेशने । १४२६ मृश आमर्शने । १४२७ णुद प्रेरणे । १४२८ षद्लृ विशरणगत्यवसादनेषु । १४२९ शद्लृ शातने ॥ प्रच्छत्यादयोऽनुदात्ता उदात्तेतः परस्मैभाषाः ॥ विछस्तूदात्तः ॥ १४३० मिल संगमे ॥ उदात्तः स्वरितेदुभयतोभाषः॥ १४३१ मुच्लृ मोक्षणे । १४३२ लुप्लृ छेदने । १४३३ विद्लृ लाभे । १४३४ लिप उपदेहे । १४३५ षिच क्षरणे ॥ मुचादयोऽनुदात्ताः स्वरितेत उभयतोभाषाः । विन्दातिस्तूदात्तः ॥ १४३६ कृती छेदने ॥ उदात्त उदात्तेत्परस्मैपदी ॥ १४३७ खिद परिघाते ॥ अनुदात्त उदात्तेत्परस्मैपदी ॥ १४३८ पिश अवयवे ॥ उदात्त उदात्तेत्परस्मैपदी ॥ वृत् ॥ इति शविकरणास्तुदादयः ॥ ६ ॥

१४३९ रुधिर् आवरणे । १४४० भिदिर् विदारणे । १४४१ छिदिर् द्वैधीकरणे । १४४२ रिचिर् विरेचने । १४४३ विचिर् पृथग्भावे । १४४४ क्षुदिर् संपेषणे । १४४५ युजिर् योगे ॥ रुधादयोऽनुदात्ताः स्वरितेत उभयतोभाषाः ॥ १४४६ उछृदिर् दीप्तिदेवनयोः । १४४७ उतृदिर् हिंसानादरयोः॥ उदात्तौ स्वरितेतावुभयतोभाषौ ॥ १४४८ कृती वेष्टने ॥ उदात्त उदात्तेत्परस्मैपदी ॥ १४४९ ञिइन्धी दीप्तौ ॥ उदात्तोऽनुदात्तेदात्मनेपदी ॥ १४५० खिद दैन्ये । १४५१ विद विचारणे ॥ अनुदात्तावनुदात्तेतावात्मनेपदिनौ ॥ १४५२ शिष्लृ विशेषणे । १४५३ पिष्लृ संचूर्णने । १४५४ भञ्जो आमर्दने । १४५५ भुज पालनाभ्यवहारयोः॥ शिषादयोऽनुदात्ता उदात्तेतः परस्मैभाषाः ॥ १४५६ तृह १४५७ हिंसि हिंसायाम् । १४५८ उन्दी क्लेदने । १४५९ अञ्जू व्यक्तिमर्षणकान्तिगतिषु । १४६० तञ्चु संकोचने । १४६१ ओविजी भयचलनयोः। १४६२ वृजी वर्जने । १४६३ पृची संपर्के । तृहादय उदात्ता उदात्तेतः परस्मैपदिनः ॥ वृत् ॥ इति श्नम्विकरणा रुधादयः ॥७॥

१४६४ तनु विस्तारे । १४६५ षणु दाने । १४६६ क्षणु हिंसायाम् । १४६७ क्षिणु च । १४६८ ऋणु गतौ । १४६९ तृणु अदने । १४७० घृणु दीप्तौ ॥ तनादय

उदात्तः स्वरितेत उभयतोभाषाः ॥ १४७१ वनु याचने । १४७२ मनु अवबोधने ॥ उदात्तावनुदात्तेतावात्मनेभाषौ ॥ १४७३ डुकृञ् करणे ॥ अनुदात्त उभयतोभाषः ॥ इत्युविकरणास्तनादयः ॥ ८ ॥

१४७४ डुक्रीञ् द्रव्यविनिमये । १४७५ प्रीञ् तर्पणे कान्तौ च । १४७६ श्रीञ् पाके । १४७७ मीञ् हिंसायाम् । १४७८ षिञ् बन्धने । १४७९ स्कुञ् आप्रवणे । १४८० युञ् बन्धने ॥ क्र्यादयोऽनुदात्ता उभयतोभाषाः ॥ १४८१ क्नूञ् शब्दे । १४८२ द्रूञ् हिंसायाम् । १४८३ पूञ् पवने । १४८४ लूञ् छेदने । १४८५ स्तॄञ् आच्छादने । १४८६ कॄञ् हिंसायाम् । १४८७ वॄञ् वरणे । १४८८ धूञ् कम्पने ॥ क्नूप्रभृतय उदात्ता उभयतोभाषाः ॥ १४८९ शॄ हिंसायाम् । १४९० पॄ पालनपूरणयोः । १४९१ वॄ वरणे ॥ भरण इत्येके ॥ १४९२ भॄ भर्त्सने । १४९३ मॄ हिंसायाम् । १४९४ दॄ विदारणे । १४९५ जॄ वयोहानौ ॥ झॄ इत्येके । धॄ इत्यन्ये । १४९६ नॄ नये । १४९७ कॄ हिंसायाम् । १४९८ ॠ गतौ । १४९९ गॄ शब्दे ॥ शॄणातिप्रभृतय उदात्ता उदात्तेतः परस्मैपदिनः ॥ १५०० ज्या वयोहानौ । १५०१ री गतिरेषणयोः । १५०२ ली श्लेषणे । १५०३ व्ली वरणे । १५०४ प्ली गतौ ॥ वृत् ॥ १५०५ व्री वरणे । १५०६ भ्री भये ॥ भर इत्येके ॥ १५०७ क्षीष् हिंसायाम् । १५०८ ज्ञा अवबोधने । १५०९ बन्ध बन्धने ॥ ज्यादयोऽनुदात्ता उदात्तेतःपरस्मैभाषाः॥ १५१० वृङ् संभक्तौ॥ उदात्त आत्मनेपदी ॥ १५११ श्रन्थ विमोचनप्रतिहर्षयोः । १५१२ मन्थ विलोडने । १५१३ श्रन्थ १५१४ ग्रन्थ संदर्भे । १५१५ कुन्थ संश्लेषणे ॥ संक्लेश इत्येके ॥ कुथ इति दुर्गः ॥ १५१६ मृद क्षोदे । १५१७ मृड च ॥ अयं सुखेऽपि ॥ १५१८ गुध रोषे । १५१९ कुष निष्कर्षे । १५२० क्षुभ संचलने । १५२१ णभ १५२२ तुभ हिंसायाम् । १५२३ क्लिशू विबाधने । १५२४ अश भोजने । १५२५ उध्रस उञ्छे । १५२६ इष आभीक्ष्ण्ये । १५२७ विष विप्रयोगे । १५२८ प्रुष १५२९ प्लुष स्नेहनसेवनपूरणेषु । १५३० पुष पुष्टौ । १५३१ मुष स्तेये । १५३२ खच भूतप्रादुर्भावे ॥ वान्तोऽयमित्येके ॥ १५३३ हेठ च ॥ श्रन्थादय उदात्ता उदात्तेतो विषिवर्जं परस्मैभाषाः॥ १५३४ ग्रह उपादाने ॥ उदात्तः स्वरितेदुभयतोभाषः ॥ इति श्नाविकरणाः क्र्यादयः ॥ ९ ॥

१५३५ चुर स्तेये । १५३६ चिति स्मृत्याम् । १५३७ यत्रि संकोचे । १५३८ स्फुडि परिहासे ॥ स्फुटि इत्यपि ॥ १५३९ लक्ष दर्शनाङ्कनयोः । १५४० कुद्रि अनृतभाषणे । १५४१ लड उपसेवायाम् । १५४२ मिदि स्नेहने । १५४३ ओलडि उत्क्षेपणे ॥ ओकारो धात्ववयव इत्येके । न इत्यपरे । उलडि इत्यन्ये ॥ १५४४ जल

